CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) नं० ४३७४ शालग्रामदानविधिः (स्फुटपत्रिका)

श्री ५ को सरकार

श्रीगणेशायनमः॥अथशालग्रामदानम्॥मदनरत्ने हरिवंशेच· चतुःसागरपर्यंतांसशैलवनकाननां· दत्वायत्फलमाप्नोति
शालग्रामात्तदश्नुते·शालग्रामशिलादानमतिदानंप्रकीर्तितम्·शालग्रामंतथालिंगंयोददातिकुरूद्वह· ममलोकमवाप्नो
तिशिवलिंगप्रदस्ततः·पाद्मे·शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमम्·भूचक्रंतेनदत्तंस्यात्सशैलवनकाननं·पौरुषे
णैवसूक्तेनसंपूज्यचयथाविधि॥सौवर्णेराजतेवापिताम्रेवाभाजनेनवे·नववस्त्रसमाच्छन्नेसौप्रतिष्ठाप्यहरिंततः॥संपूज्य
क्षीरपक्वान्नैर्नैवेद्याद्यैस्समर्पयेत्·ततःसंपूज्यविप्रेंद्रंमधुपर्कपुरःसरं·ततःसुवर्णसहितंवस्त्रयुग्मसमन्वितं·ग्राह्यंस
पात्रंहस्तेनशिलाचक्रंनराधिप·ततःपरमिमंमंत्रंदेशकालादिकीर्त्यच·शालग्रामशिलाचक्रेभुवनानिचतुर्दश·त
स्मादस्यप्रदानेनप्रीयतांहरिरीश्वरः॥नारायणजगन्नाथशंखचक्रगदाधर·सप्तजन्मनियज्ञादेर्विघ्नाद्धेविकृतंमम॥
चक्रहस्तगदापाणेशमयाच्युतजगत्पते·प्रणवंचसमुच्चार्यशिलाचक्रंमहात्मकम्·सद्भक्तायप्रदातव्यंजलदानपुरःस
रं·देवस्यलेतिराजालेतीमंमंत्रमतःपरं·प्रतिग्रहीत्रायतेनपठनीयोयथाक्रमम्·ततःपरंकृतंकर्मकार्यंसर्वंमद

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पेशां॰एवंयःकुरुतेमर्त्त्यःशिलादानंयथाविधि ॰समहापापसंघेभ्यःसद्यएवविमुच्यते॰यंयमर्थंसमुद्दिश्यशिलादा
नंकरोतियः॰सतंतमर्थंलभतेमत्प्रसादान्नराधिप॰शालग्रामसमंदानंनास्तिकुत्रापिवैयतः॰सर्वेषामपिदानाना
मुत्तमंतत्प्रचक्ष्यते।यःकरोतिविधानेनसमेतिप्रीतिवर्द्धनः॰व्यासः॰योददातिशिलांविष्णोःशालग्रामसमुद्भवां॰वै
ष्णवोविष्णुभक्तायतेनेष्टंक्रतुभिःशतैः॥ ॥इतिश्रीदानदीनकरोद्धृतोशालग्रामदानविधिः॥ ॥शुभम्भूयात्॥ ॥

नं॰ ४२६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३७१ (२) सांख्यतत्त्वकौमुदीटीका ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थो भवति ६

सां०त०कौ० श्रीगणेशाय नमः॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः। अजा ये तां जुषमाणां भजन्ते जह सेवमानाम् १
१ त्येनां भुक्तभोगां नुमस्तान्॥१॥ कपिलाय महामुनये शिष्याय तस्य चासुरये। पंचशिखाय तथेश्वरकृष्णाय चैते
नमस्यामः॥२॥ इह खलु प्रतिपित्सितमर्थं प्रतिपादयन्नेव प्रतिपादयिताऽवधेयवचनो भवति प्रेक्षावतां। व्य गाल २
तिरेकमाह· अप्रतिपित्सितमर्थं तु प्रतिपादयन्नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्षणी
यः। स च एवां प्रतिपित्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पते। इति प्रारिप्सितशास्त्रविषयज्ञानस्य प
रमपुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयति॥ दुःखत्रयाभिघाताज्जिज्ञासेति। दुःखत्रयाभिघा
६ शास्त्रविषयेजिज्ञासा ताज्जिज्ञासा तदपघातके हेतौ। दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्॥१॥ एवं हि शास्त्रविषयो न जिज्ञास्येत
यदि दुःखं नाम जगति न स्यात्। सद्वा न जिहासितं। जिहासितं वा अशक्यसमुच्छेदं। अशक्यसमुच्छेदता च द्विविधा
दुःखस्य नित्यत्वाद्वा दुःखोच्छेदोपायापरिज्ञानाद्वा। शक्यसमुच्छेदत्वेपि च शास्त्रविषयज्ञानस्यानुपायभूतत्वाद्वा सु दा
करस्योपायांतरस्य सद्भावाद्वा। तत्र न तावद्दुःखं नास्ति नाप्यजिहासितमित्युक्तं दुःखत्रयाभिघातादिति। दुःखानां
त्रयं दुःखत्रयं। तत्खल्वाध्यात्मिकमाधिभौतिकमाधिदैविकं च। तत्राध्यात्मिकं द्विविधं शारीरं मानसं च। शारी
रं कफवातपित्तश्लेष्मणां वैषम्यनिमित्तं। मानसं कामक्रोधमोहलोभेर्ष्याविषादविषयविशेषादर्शननिमि
त्तं। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखं। बाह्योपायसाध्यं दुःखं द्वेधा आधिभौतिकमाधिदैविकं च। न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्र। आधिभौतिकंमानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तं। आधिदैविकंयक्षराक्षसविनायकग्रहाद्यावेशनिबंधनं। त
देतत्त्रयस्यात्मवेदनीयंदुःखंरजःपरिणतिभेदोनशक्यंकर्तुंप्रत्याख्यातुं। तदनेनदुःखत्रयेणांतःकरणवर्तिनाप्रतिकू
लवेदनीयतयाचेतनाशक्तेरभिसंबंधोभिघातः। एतावताप्रतिकूलवेदनीयमत्रजिहासाहेतुरुक्तः। यद्यपिचनसंनिरु
ध्यतेदुःखंतथापितदभिभवःशक्यःकर्तुमित्युपरिष्टादुपपादयिष्यते। तथाचोपपन्नंतदपघातकेहेताविति। तस्यदुः
खत्रयस्यापघातकस्तदपघातकः। उपसर्जनस्यापिबुद्ध्यानिःकृष्यतदापरामर्शः। अपघातकश्चहेतुःशास्त्रमूला
घोनान्यस्तस्याशयात्तत्राशंकते। दृष्टेसापार्थाचेदिति। अस्यायमर्थः। अस्तुदुःखत्रयंजिहासितंच। भवतुचतच्छकाहा
नसहतांचशास्त्रगम्यउपायस्तदुच्छेदे। तथाप्यत्रजिज्ञासाप्रेक्षावतामयुक्ता। दृष्टस्यैवोपायस्यतदुच्छेदकस्यसुकर
स्यविद्यमानत्वात्। तत्त्वज्ञानस्यत्वनेकजन्माभ्यासपरंपरायासेनसाध्यतयातिदुष्करत्वात्। तथाचलौकिकानामाभा
सं णकः। अर्केचेन्मधुविंदेतकिमर्थंपर्वतंव्रजेत्। इष्टस्यार्थस्यसंसिद्धौकोविद्वान्यत्नमाचरेत्इति। संतिचोपायाःश
तशः। शारीरदुःखप्रतीकारायेषत्कराभिषजांवरैरुपदिष्टाः। मानसस्यापिसंतापस्यप्रतीकारायमनोज्ञस्त्रीपानभो
जनविलेपनवस्त्रालंकारादिविषयसंप्राप्तिरुपायः। एवमाधिभौतिकस्यापिनीतिशास्त्राभ्यासकुशलतानिरत्य
यस्थानाध्यासनादिःप्रतीकारहेतुरीषत्करः। तथाधिदैविकस्यापिदुःख~~निवृत्तेरवश्यंभावः। असंतोनिवृत्तस्य~~
~~दुःखस्यपुनरुत्पादः। तयोरेकात्वासंतयोरपावः~~स्यमणिमंत्राद्युपयोगःसुकरःप्रतीकारोपायइति। निराकरोतिनेति। कु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तः एकासंत्तौ ततो भावात्। एकांतो दुःखनिवृत्तेरवश्यंभावः। असंतो निवृत्तस्य दुःखस्य पुनरनुत्पादः। तयोरेकान्तासंतयोरभा
वः। एकान्तासंतत इति षष्ठ्याः स्थाने सार्वविभक्तिकस्तसिल्। एतदुक्तं भवति। यथा विधिरसायनकामिनीनीतिशास्त्राभ्या
समंत्राद्युपयोगेपि तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शनान्नैकान्तिकत्वं। निवृत्तस्यापि पुनरुत्पत्तिदर्शनादनासंतिक
त्वमिति। अतः सुकरोप्यैकांतिकासंतिकदुःखनिवृत्तेर्न दृष्टोपाय इति नापार्था जिहासेत्यर्थः। यद्यपि दुःखममंगलं त
थापि तत्परिहार्यत्वेन तदपघातो मंगलमेवेति युक्तं शास्त्रादौ तत्संकीर्त्तनमिति॥१॥ दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयाति
शययुक्तः॥ तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥ स्यादेतत् मा भूद्दृष्ट उपायो वैदिकस्तु ज्योतिष्टोमादिः सहस्रवर्षपर्यंतं क
र्मकलापस्तापत्रयमेकांतमसंतं चापनेष्यति। श्रूयते हि स्वर्गकामो यजेतेति। स्वर्गस्तु यन्न दुःखेन संभिन्नं न च ग्रस्तम
नंतरं। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदं। दुःखविरोधि सुखविशेषः स्वर्गः। स च स्वसत्तया समूलघातमपहंति दुः
खं न चैष क्षयी तथा हि श्रूयते अपाम सोमममृता अभूमेति। तत्क्षये कुतोऽस्यामृतत्वसंभवः। तस्माद्वैदिकस्तापत्रयप्रती
कारहेतोर्मुहूर्तमासाहोरात्रमासादिनिवर्त्तनीयतयाऽनेकजन्मपरंपरायाससाध्याद्विवेकज्ञानादीषत्करत्वात्पुनर
प्यपार्था जिज्ञासेत्याशंक्याह। दृष्टवदानुश्रविक इति। गुरुपाठादनुश्रूयत इत्यनुश्रवो वेदः। एतदुक्तं भवति। श्रूयत एव
परं न तु केनापि क्रियत इति। तत्र भव आनुश्रविकः तत्र प्राप्तो ज्ञात इति यावत्। आनुश्रविकोपि कर्मकलापो दृष्टेन तुल्यो
वर्त्तते। इत्यैकांतासंतिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात्। यद्यपि चानुश्रविक इति सामान्येनाभिहितं त २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थापिकर्मकलापाभिप्रायं द्रष्टव्यं। विवेकज्ञानस्याप्यानुश्रविकत्वात्। तथा चानुश्रूयते। आत्मा ज्ञातव्यः प्रकृतितो विवेक्तव्यः न स पु
नरावर्त्तते न स पुनरावर्त्तत इति· अस्यां प्रतिज्ञायां हेतुमाह· स ह्यविशुद्धिक्षयातिशययुक्त इति अविशुद्धिः सोमादियागस्य पशु
बीजादिवधसाधनता· यथाह भगवान् पञ्चशिखाचार्यः स्वल्पः संकरः सपरिहारः सप्रत्यवमर्ष इति· स्वल्पः संकरो ज्योतिष्टो
मादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मना अनर्थहेतुना अपूर्वेण सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः अ
थ च प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मपरिपाकसमये स पच्यते· तथापि यावदसावनर्थं प्रसूते तावत् सप्रत्यवम
र्षः। मृष्यन्ते हि पुण्यसंभारोपनीतस्वर्गसुखसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकां॥
प्रत्यवमर्षेण सह हि स्फुटतया सह वर्त्तत इति सप्रत्यवमर्षः। न च न हिंस्यात् सर्वभूतानि इति सामान्यशास्त्रं विशेषशास्त्रेण।
अग्नीषोमीयं पशुमालभेत इत्यनेन बाध्यत इति युक्तं· विरोधाभावात्। विरोधे हि बलीयसा दुर्बलं बाध्यते न चात्रास्ति कश्चि
द्विरोधो भिन्नविषयत्वात्। तथा च न हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते। न तु क्रत्वर्थत्वमपि अग्नी
षोमीयवाक्येन च पशुहिंसायाः क्रत्वंगभावो ज्ञाप्यते। न त्वनर्थहेतुत्वाभावोऽपि। न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चि
हे२ द्स्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यति· क्षयातिशयौ च फलगतावप्युपाये उपचरितौ क्ष
यित्वं च स्वर्गादेः सत्त्वे सति कार्यत्वादनुमितं। ज्योतिष्टोमादयः स्वर्गमात्रसाधनं। वाजपेयादयस्तु स्वाराज्यस्य साध
नमिति सातिशयत्वमुक्तं। परसंपदुत्कर्षो हि हीनसंपदं पुरुषं दुःखाकरोति· अपाम सोमममृता अभूमेति चामृताभिधानं

स्वर्गः क्षयी सत्त्वे सति कार्यत्वात् घटवत् २८

चिरस्थानमुपलक्षयति। यथाहुः आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते इति। अत एव च श्रुतिः नकर्मणेति त्यागस्य दुःखत्र
यप्रतीकारहेतुत्वं निराकरोति। नकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजते यद्यत
यो विशन्ति। तथा कर्मणा मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः। तथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशु
रिति। तदेतत्सर्वमभिप्रेत्याह तद्विपरीतः श्रेयानित्यादि। तस्माद्दृष्टानुश्रविकाद्दुःखापघातकोपायात् सोमपानादेरविशुद्धादनित्य
सातिशयफलाद्विपरीतो विशुद्धो हिंसादिसंकराभावान्नित्यो निरतिशयफलोऽसकृत्पुनरावृत्तिश्रुतेः। न च कार्यत्वेनानित्यता
फलस्योक्ताभावरूपस्य कार्यस्य तथाभावात्। दुःखप्रध्वंसस्य तु कार्यस्यापि तद्वैपरीत्यात्। न च दुःखान्तरोत्पादः कारणाप्रवृत्तौ
कार्यानुत्पादात्। विवेकज्ञानोपजननपर्यन्तत्वाच्च कारणप्रवृत्तेः। एतच्चोपरिष्टादुपपादयिष्यते। अक्षरार्थस्तु तस्माद्दृष्टानुश्रवि
काद्दुःखापघातकाद्धेतोर्विपरीतः सत्त्वपुरुषान्यताप्रत्ययः साक्षात्कारो दुःखापघातक~~त्वाच्च प्रशस्यः सत्त्वपुरुषान्यताप्र~~ सँसौक्षा
को हेतुः अत एव श्रेयान्। आनुश्रविको हि वेदविहितत्वादात्रया दुःखापघातकत्वाच्च प्रशस्यः सत्त्वपुरुषान्यताप्रत्ययोऽपि प्रश
स्यः। तदनयोः प्रशस्ययोर्मध्ये सत्त्वपुरुषान्यताप्रत्ययः श्रेयान्। कुतः पुनरस्योत्पत्तिरित्यत उक्तं व्यक्ताव्यक्तज्ञविज्ञानात्। व्यक्तं
चाव्यक्तं च ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकेन ज्ञानं व्यक्ताव्यक्तज्ञविज्ञानं व्यक्तज्ञानपूर्वकअव्यक्तस्य तत्कारणस्य अर्थक्रमेण पाठक्रमो बाध्यते स्मत एव विपरीतः ३=
ज्ञानं तमो ज्ञस्य पारार्थ्येन आत्मा परो ज्ञायत इति ज्ञानक्रमेण क्रमाभिधानं। एतदुक्तं भवति श्रुतिस्मृतीतिहासपुराणेभ्यो व्य
क्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घकालादरनैरन्तर्यसत्कारसेविताद्भावनामयाद्विज्ञानादिति। तथा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्षेपतो हि शास्त्रार्थस्य वक्तव्यो विधा। कश्चिदर्थः प्रकृतिरेव कश्चिद्विकृतिरेव कश्चित्प्रकृतिर्विकृतिरेव ३-४

सर्वजनिका प्रकृतिरविकृतिः अन्यस्मात् तथा यानन्यत्वस्मात्तज्जनकत्वं प्रकृतित्वं ७=

चवक्ष्यति एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषं। अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति २ मूलप्रकृतिरविकृ
तिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः। तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारंभ
समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमाधानाय तदर्थं संक्षेपतः प्रतिजानीते॥३॥ ~~कश्चित्प्रकृतिविकृतिः~~। कश्चिदनुभय
रूप इति। तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरविकृतिः। तत्र प्रकरोतीति प्रकृतिः। प्रधानं सत्त्वरजस्तमसां साम्यावस्था। सा
प्रकृतिरविकृतिरेवेत्यर्थः। कस्मादित्यत उक्तं मूलेति मूलं चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्यकलापस्य सा मूलं
न त्वस्या मूलांतरमस्ति। अनवस्थाप्रसंगात् न चानवस्थायां प्रमाणमस्तीति भावः। कतमाः पुनः प्रकृतिविकृतयः कियंत्यश्च
इत्यत उक्तं महदाद्याः प्रकृतिविकृतयः सप्त। प्रकृतयश्च ता विकृतयश्चेति प्रकृतिविकृतयः। तथा हि महत्तत्वमहंकारस्य प्रकृ
तिर्विकृतिश्च मूलप्रकृतेः। एवमहंकारतत्वं तन्मात्राणामिंद्रियाणां च प्रकृतिर्विकृतिश्च महतः। एवं पंच तन्मात्राणि तत्वा
नि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहंकारस्य। अथ का विकृतिरेव कियती चेत्यत उक्तं षोडशकस्तु विकार इति
। षोडशसंख्यापरिमितो गणः षोडशकः तुशब्दोवधारणे। भिन्नक्रमश्च पंच भूतान्येकादशेंद्रियाणीति षोडशको
गणो विकार एव। न प्रकृतिरिति। यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः। एवं तद्विकारभेदानां पयोबीजा
दीनां दध्यंकुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्वांतरं। तत्वांतरोपादानत्वं च प्रकृतित्वमिहाभिप्रेत
मिति न दोषः। सर्वेषां गोघटादीनां स्थूलतेंद्रियग्राह्यता च समेति न तत्वांतरं ~~[illegible]~~

तत्वविभागकोपायस्य हि तत्वांतरजनकत्वे सति जनकत्वस्वर्थः ३=

[illegible]

सा०त०कौ० अनुभयरूपमाह· नप्रकृतिर्नविकृतिः पुरुष इति। एतच्चसर्वमुपरिष्टादुपपादयिष्यामः॥३॥ दृष्टमनुमानमाप्तवचनंसर्वप्रमाणसिद्ध ते
४ त्वात्। त्रिविधंप्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॥४॥ तमिममर्थंप्रामाणिकंकर्त्तुमभिप्रेता॥ प्रमाणभेदालक्षणीयाः। नचसामा
न्यलक्षणमंतरेणशक्यंविशेषलक्षणंकर्त्तुमितिप्रमाणसामान्यंतावल्लक्षयति· प्रमाणमिति· अत्रचप्रमाणमितिसमाख्या
लक्ष्यपदंतन्निर्वचनंचलक्षणं· प्रमीयतेऽनेनेतिनिर्वचनात्· प्रमांप्रतिकरणंगम्यते असंदिग्धाऽविपरीताऽनधिगतविषया
चित्तवृत्तिः। बोधश्चपौरुषेयः फलंप्रमा तत्साधनंप्रमाणमिति। एतेनसंशयविपर्ययस्मृतिसाधनेष्वप्रसंगः। संख्याविप्र
तिपत्तिंनिराकरोति· त्रिविधमिति· तिस्रोविधाअस्यप्रमाणसामान्यस्यतत्त्रिविधमितिनन्यूनंनाप्यधिकमित्यर्थः। विशे
षलक्षणानंतरंचैतदुपपादयिष्यामः। कतमाःपुनस्ताःतिस्रोविधाइत्यतआह· दृष्टमनुमानमाप्तवचनमिति। एतच्चलौ
किकप्रमाणाभिप्रायंइतिलोकव्युत्पादनार्थत्वाच्छास्त्रस्यतस्यैवात्राधिकारात्· आर्षंतुविज्ञानंयोगिनांनलोकव्युत्पादनाया
लमितिसदपिनाभिहितमनधिकारात्· स्यादेतत्। माभून्न्यूनमधिकंतुकस्मान्नभवति। संगिरंतेहिप्रतिवादिनउपमानादीन्य
पिप्रमाणानीत्यतआह· सर्वप्रमाणसिद्धत्वादिति· एष्वेवदृष्टानुमानाप्तवचनेषुसर्वेषुसर्वेषांप्रमाणानांसिद्धत्वात् तर्भावादि
त्यर्थः। एतच्चोपपादयिष्यतइत्युक्तं। अथप्रमेयव्युत्पादनायप्रवृत्तंशास्त्रंकस्मात्प्रमाणंसामान्यतोविशेषतश्चलक्षयतीत्यतआ त
ह· प्रमेयसिद्धिःप्रमाणाद्धीति· सिद्धिःप्रतीतिः सेयमर्थक्रमानुरोधेनपाठक्रममनादृत्यमाख्याता॥४॥ प्रतिविषयाध्यवसा
यो दृष्टंत्रिविधमनुमानमाख्यातं। तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवचनंतु॥५॥ संप्रतिविशेषलक्षणावसरेप्रत्यक्षस्य ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणेषु श्रेष्ठत्वात्तेन तच्चानुमानादीनां प्रतिवादिनाम विप्रतिपत्तेश्च तदेव तावल्लक्षयति· प्रतिविषयाध्यवसायो दृष्टमिति·
अत्र दृष्टमिति लक्ष्यनिर्देशः। परिशिष्टं तु लक्षणं समानासमानजातीयव्यवच्छेदो लक्षणार्थः। अवयवार्थस्तु· विषिण्वंति·
विषयिणमनुबध्नंति स्वेन रूपेण निरूपणीयं कुर्वंतीति यावत्। विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनां अविषयाश्च
तन्मात्रलक्षणाः योगिनामूर्ध्वस्रोतसां देवादीनां च विषयाः। विषयं विषयं प्रतिवर्तत इति प्रतिविषयमिंद्रियं वृत्तिश्च सन्नि
कर्षः अर्थसन्निकृष्टमिंद्रियमित्यर्थः। तस्मिन्नध्यवसायस्तदाश्रित इत्यर्थः। अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्त
विषयाणामिंद्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्वसमुद्रेकः सोध्यवसाय इति च वृत्तिरिति च ज्ञानमिति चाख्या
यते इदं तत्प्रमाणं· अनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्रमाबोधः। बुद्धितत्वं हि प्राकृतत्वादचेतनमिति तदीयोध्यवसायो
प्यचेतनो घटादिवत्। एवं हि बुद्धितत्वस्य सुखादयोपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषंगी चेतनः सोयं
बुद्धितत्ववर्तिना ज्ञानसुखादिना तत्प्रतिबिंबितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोनुगृह्यते· चितिच्छा
यापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायोप्यचेतनश्चेतनावत् इव भवतीति। तथा च वक्ष्यति। तस्मात्तत्संयोगादचेतनं
चेतनावदिव लिंगम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति। संशय
स्यानवस्थितग्रहणेनानिश्चितरूपत्वात्। निश्चयोध्यवसाय इति चानर्थांतरं विषयग्रहणेन चासद्विषयं विपर्ययमपा
करोति। प्रतिग्रहणेन चेंद्रियार्थसन्निकर्षसूचनात् अनुमानस्मृत्यादयश्च निराकृता भवंति। तदेवं समानासमानजातीय

व्यवछेदकत्वात्प्रतिविषयाध्यवसायइतिदृष्टस्यसंपूर्णलक्षणं।तत्रांतरेषुलक्षणांतराणितैर्थिकानांनभूषितानिदूषितानि
।विस्तरभयादि।अनुमानंनप्रमाणमितिवदतालोकायतिकेनाप्रतिपन्नः संदिग्धोविपर्यस्तोवापुरुषःकथंप्रतिपाद्येत·नचपु
रुषांतरगताअज्ञानसंदेहविपर्ययाःशक्याअर्वाग्दृशाप्रत्यक्षेणप्रतिपत्तुं·नापिमानांतरेणअनभ्युपगमात्।अनवधृता
ज्ञानसंशयविपर्यासस्तुयंकंचनपुरुषंप्रतिप्रवर्त्तमानोऽनवधेयवचनतयाप्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत।तदनेनाज्ञानादयः
परपुरुषवर्त्तिनोभिप्रायभेदाद्वचनभेदाद्वालिंगादनुमातव्याइत्यकामेनाप्यनुमानमभ्युपेतव्यम्·तत्रप्रत्यक्षका
र्यत्वादनुमानंप्रत्यक्षानंतरंलक्षणीयं।तत्रापिसामान्यलक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यंतावल्लक्षय
ति·लिंगलिंगिपूर्वकमिति।लिंगंव्याप्यं।लिंगिव्यापकं·शंकितसमारोपितोपाधिनिराकरणेनचस्वभावप्रतिबंधंव्याप्यं
·येनप्रतिबद्धंतद्व्यापकं·लिंगलिंगिग्रहणेनचाविषयवाचिनाविषयिणंप्रत्ययमुपलक्षयति·धूमादिर्व्याप्योवन्ह्यादि
र्व्यापकइतियःप्रत्ययस्तत्पूर्वकम्।लिंगिग्रहणंचावर्त्तनीयंतेनचलिंगमस्यास्तीतिपक्षधर्मताज्ञानमपिदर्शितंभवति।
तद्व्याप्य·व्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमित्यनुमानसामान्यंलक्षितं।अनुमानविशेषांस्तुतंत्रांतरल
क्षितानभिमतान्स्मारयति।त्रिविधमनुमानमाख्यातमिति।तदितितत्सामान्यतोलक्षितंविशेषतस्तु
त्रिविधं।पूर्ववच्छेषवत्सामान्यतोदृष्टंच·तत्रप्रथमंतावत्द्विविधंवीतमवीतंच।अन्वयमुखेनप्रवर्त्तमा
नंविधायकंवीतं·व्यतिरेकमुखेनप्रवर्त्तमानंनिषेधकमवीतं।तत्रावीतंशेषवत्।शिष्यतेपरिशिष्यत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षित्यादिकं सकर्तृकं· कार्यत्वात् घटवत्· तेन ईश्वरस्य परिशेषात्सिद्धिः· २

इति शेषः। स एव विषयतया यस्यास्तदनुमानज्ञानस्य तत् च्छेषवत्। यदाहुः। प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात् शिष्य चैत्रमैत्रादौ १
माणे संप्रत्ययः परिशेष इति। अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यत इति। वीतं च द्वेधा· तत्रैकं
नैवंके २+ पूर्ववत् सामान्यतोदृष्टं चाऽदृष्टस्वलक्षणसामान्यविषयं यत्तत्पूर्ववत्। पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति
यावत्· तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत्· यथा धूमाद्वह्नित्वसामान्यविशेषः पर्वतेऽनुमीयते· त वह्नित्वसामान्यविशेषः वह्निः ४
स्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्यां। अपरं च वीतं सामान्यतोदृष्टं। अदृष्ट
स्वलक्षणसामान्यविषयमनुमानं। यथेंद्रियविषयमनुमानं। अत्र हि रूपादिविज्ञानानां क्रियात्वेन करण रूपादिविज्ञानं करणवत् क्रियात्वात् छिदादिक्रियावत्
वत्त्वमनुमीयते। यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं तथापि यज्जातीयं रू
पादिज्ञाने करणत्वमनुमीयते। तज्जातीयस्य करणत्वस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण। इंद्रियजातीयकं हि तत्क
रणं। न चेंद्रियत्वस्य सामान्यस्य स्वलक्षणमिंद्रियविशेषः प्रत्यक्षगोचरो वाक्दृशां। यथा वह्नित्वसामान्यस्य स्व
लक्षणं वह्निः। सोऽयं पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वेन तुल्यत्वे विशेषः। अत्र च दृष्टं दर्शनं· सामान्यतः
इति सार्वविभक्तिकस्तसिः· अदृष्टस्वलक्षणस्य सामान्यविशेषस्य दर्शनमनुमानमित्यर्थः। सर्वं
चैतदस्माभिर्न्यायवार्तिकतात्पर्यटीकायां व्युत्पादितमिति नेहोक्तं विस्तरभयात्। प्रयोजकवृद्धशब्दश्रवण
समनंतरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वाच्छब्दार्थसंबंधग्रहस्य स्वार्थसंबंधग्रहसहकारिणश्च

शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्वकत्वमित्यनुमानानंतरं शब्दं लक्षयति आप्तश्रुतिराप्तवचनं तु। तत्राप्तवचनमिति
लक्ष्यनिर्देशः। शेषं लक्षणं। आप्ता प्राप्ता युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः। श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं।
तच्च स्वतः प्रमाणं अपौरुषेयवेदवाक्यजनितत्वेन सकलदोषाशंकाविनिर्मुक्तं युक्तं भवति। एवं वेदमूलस्मृतीतिहास
पुराणवाक्यजनितमपि ज्ञानं युक्तं भवति आदिविदुषश्च कपिलस्य कल्पादौ कल्पांतराधीतश्रुतिस्मरणसंभवः।
सुप्तप्रतिबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्युः। तथा चावट्यजैगीषव्यसंवादे भगवान्जैगीषव्यो दशमहाकल्पवर्ति जी५+
जन्मस्मरणमात्मन उवाच। दशसु महाकल्पेषु विपरिवर्तमानेन मयेत्यादिना ग्रंथसंदर्भेण आप्तग्रहणेन चायुक्ताः
शाक्यभिक्षुनिर्ग्रंथकसंसारमोचकादीनामागमाभासाः निराकृता भवंति अयुक्तत्वं चैषां विगानाद्विच्छिन्नमूलत्वात्प्र
माणविरुद्धार्थाभिधानाच्च कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्बोद्धव्यं। तु शब्देनानुमानाद्व्यवच्छि
नत्ति। वाक्यार्थो हि प्रमेयो न तु तद्धर्मो वाक्यं। येन तत्र लिंगं भवेत्। न च वाक्यं वाक्यार्थं बोधयत्संबंधग्रहणमपेक्षते। अभि
नवकविविरचितस्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वादिति। एवं प्रमाणसामान्यलक्षणेषु सत्सु वि
शेषलक्षणेषु च सत्सु यानि प्रमाणांतराण्युपमानादीन्यभ्युपेयंते प्रतिवादिभिस्तान्युक्तलक्षणप्रमाणेष्वंतर्भवंति।
तथा हि। उपमानं तावद्यथा गौस्तथा गवयः इति वाक्यं तज्जनिता धीरागम एव। योऽप्ययं गोसदृशस्य गवयशब्दो वाच
क इति प्रत्ययः सोऽप्यनुमानमेव। यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यंतरे तस्य वाचको यथा गोशब्दो गोत्वस्य

प्रयुज्यते चैत्र गवयशब्दो गोसदृश इति तस्यैव वाचक इति ज्ञानमप्यनुमानमेव। यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञा
नं तत्प्रत्यक्षमेव। अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षमेव न त्वन्यत्। गवि सादृश्यमन्यदेव गवये भू
योवयवसामान्ययोगो हि जात्यन्तरवर्त्ति जात्यन्तरे सादृश्यमुच्यते। सामान्ययोगश्चैकः। स च गवये प्रत्यक्षो गव्यपि
तथेति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणान्तरमुपमानं भवेदिति। अतो न प्रमाणान्तरमुपमानमिति। एवम
र्थापत्तिरपि न प्रमाणान्तरम्। तथा हि। जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिर
भिमता तदज्ञानं साप्यनुमानमेव। यदा खल्वव्यापकः सन्नेकत्र नास्ति तदान्यत्रास्ति यदा चाव्यापक एकत्रास्ति
तदान्यत्र नास्तीति सुकरः स्वशरीरे व्याप्तिग्रहः। तथा च सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानान
च चैत्रस्य क्वचित्सत्त्वेन गृहाभावः शक्योऽपह्नोतुं येनाक्षिप्तो गृहाभावो बहिर्भावेन हेतुः स्यात्। गृहाभावेन वास
मान त्त्वमपह्नूयते येन सत्त्वमेवानुपपद्यमानं न बहिरवस्थापयेत्। तथा हि। चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्येत
गृहसत्त्वं वा। न तावद्यत्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन भिन्नविषयत्वात्। देशसामान्येन गृहविशेषाक्षेपो
विपाक्षिक इति समानविषयतया विरोध इति चेन्न। प्रमाणनिश्चितस्य गृहासत्त्वस्य पाक्षिकतया सांशयिकेन गृह
सत्त्वेन प्रतिक्षेपायोगात्। नापि प्रमाणनिश्चितो गृहाभावः पाक्षिकमस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षे
प्तुं सांशयिकत्वापनेतुमर्हतीति युक्तं गृहावच्छिन्नेन चैत्राभावेन गृहे सत्त्वं विरुद्धत्वात्प्रतिक्षिप~~[illegible]~~प्यातेन

त्पत्तिमात्रं। तस्य तत्रौदासीन्यात्। तस्माद्गृहाभावेन सिद्धेन सतो बहिर्भावोऽनुमीयते। इति युक्तं। एतेन विरुद्धयोः प्रमाण
योरविरोधापादनं विषयव्यवस्थया अर्थापत्ते विषय इति परास्तं। अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात्। उदाहरणान्त
राणि चार्थापत्तेरेवमनुमानेऽन्तर्भावनीयानि। तस्मान्नानुमानात्प्रमाणान्तरमर्थापत्तिरिति सिद्धं। एवमभावोऽपि प्रत्य
क्षमेव। न हि भूतलस्य परिणामविशेषात् कैवल्यलक्षणादन्यो घटाभावो नाम। प्रतिक्षणपरिणामिनो हि सर्व एव भा
वाः ऋते चितिशक्तेः। स च परिणामभेद ऐन्द्रियिक इति नास्ति प्रत्यक्षानवरुद्धो विषयो यत्राभावाख्यं प्रमाणांतरम
भ्युपेयमिति। संभवस्तु। यथा खार्यां द्रोणाढकप्रस्थाद्यवगमः स चानुमानमेव। खारीत्वं द्रोणाद्यविनाभूतं प्रतीत
खार्यां द्रोणादिसत्त्वमवगमयतीति। यच्चानिर्दिष्टप्रवक्तृकं प्रवादमात्रमिहोचुर्वृद्धा इति ऐतिह्यं। यथेह वटे यक्षः
प्रतिवसतीति। न तत्प्रमाणं। अनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात्। आप्तप्रवक्तृकत्वनिश्चये त्वागम इत्युप
पन्नं त्रिविधं प्रमाणमिति॥५॥ सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्। तस्मादपि चासिद्धं परोक्षमाप्ता
गमात्सिद्धं॥ एवं तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिध्यर्थं प्रमाणानि लक्षितानि। तत्र व्यक्तं पृथिव्यादि स्वरूपतः पां
सुलपादकोऽपि हालिकोऽपि प्रत्यक्षतः प्रतिपद्यते। पूर्ववता चानुमानेन धूमादिदर्शनाद्वह्न्यादीति तद्व्युत्पादनाय मं
दप्रयोजनं शास्त्रमिति दुरधिगममनेन व्युत्पादनीयं। तत्र यत्प्रमाणं यत्र समर्थं तदुक्तलक्षणेभ्यः प्रमाणेभ्यो वि
निःकृष्य दर्शयति। सामान्यतस्त्विति। तुशब्दः प्रत्यक्षपूर्ववद्भ्यां विशिनष्टि। सामान्यतो दृष्टादध्यवसाया ७

इतीन्द्रियाणांप्रधानपुरुषादीनांप्रतीतिश्चितिच्छायापत्तिर्बुद्धेरध्यवसायइत्यर्थः।उपलक्षणंचैतच्छेषवतइत्यपिद्रष्टव्यं।त
त्किंसर्वेष्वतीन्द्रियेषुसामान्यतोदृष्टमेवप्रवर्त्ततेतथाचयत्रतन्नास्तिमहदाद्यारम्भक्रमेस्वर्गापूर्वदेवतादौचतेषांमभावः
प्राप्तइत्यतआह·तस्मादपिचासिद्धंपरोक्षमाप्तागमात्सिद्धं।तस्मादपिचेति।तस्मादपिएतावतैवसिद्धेचकारेणशेषवद
पिसमुच्चितमिति॥६॥अतिदूरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्।सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहा
राच्च·स्यादेतत्यथागगनकुसुमकूर्मरोमनरविषाणादिषुप्रत्यक्षमप्रवर्त्तमानंतदभावमवगमयति।एवंप्रधानादि
ष्वपितत्कथंतेषांसामान्यतोदृष्टादिभ्यःसिद्धिरित्यतआह·अतिदूरादिति·अनुपलब्धिरितिवक्ष्यमाणंसिंहाव
लोकनन्यायेनानुषंजनीयं।यथाउत्पतन्वियतिपतत्रीअतिदूरतयासन्नपिप्रत्यक्षेणनोपलभ्यतेसामीप्यादि
त्यत्राप्यतिरनुवर्त्तनीयः।यथालोचनस्थमंजनमतिसामीप्यान्नदृश्यते।बाह्येन्द्रियघातोंधबधिरत्वादिः।मनो
नवस्थानात्।यथाकामाद्युपहतमनाःस्फीतालोकमध्यवर्त्तिनमिंद्रियसन्निकृष्टमप्यर्थंनपश्यति·सौक्ष्म्याद्यथे
न्द्रियसन्निकृष्टपरमाण्वादिप्रणिहितमनाअपिनपश्यति।व्यवधानाद्यथाकुड्यादिव्यवहितंराजदारादिनपश्यति।अभि
भवाद्यथाअहनिसौरीभिर्नाडीभिरभिभूतंग्रहनक्षत्रमण्डलंनपश्यति।समानाभिहारात्यथातोयदमुक्तानुदविन्दून्
जलाशयेनपश्यति।चकारोनुक्तसमुच्चयार्थः।तेनानुद्भवोपिसंगृहीतः।तद्यथाक्षीराद्यवस्थायांदध्याद्यनुद्भवान्नदृ
श्यते।एतदुक्तंभवति·नप्रत्यक्षनिवृत्तिमात्रादवस्त्वभावोभवति।अतिप्रसंगात्।तथाहि।गृहाद्बहिर्निर्गतोगृहजन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मपश्यंस्तदभावं विनिश्चिनुयान्नत्वेवं अपितु योग्यप्रत्यक्षनिवृत्तेरयमभावं विनिश्चिनोति। नच प्रधानपुरुषादीनामु
स्तिप्रत्यक्षयोग्यतेति। नचतन्निवृत्तिमात्रादभावनिश्चयो युक्तः प्रामाणिकानामिति॥७॥ सौक्ष्म्यात्तदनुपलब्धिर्ना
भावात्कार्यतस्तदुपलब्धेः। महदादितच्च कार्यं प्रकृतिस्वरूपं विरूपंच॥८॥ कतमत्पुनरेतेषु कारणं प्रधानादीनाम
नुपलब्धावित्यत आह· सौक्ष्म्यात्तदनुपलब्धिरिति अर्थाभावादेव शशविषाणवदेतेषामनुपलब्धिः कस्मान्नभवती
त्यत आह· नाभावात्। कुतः कार्य्यतस्तदुपलब्धेः। तदिति· प्रधानं परामृशति। पुरुषोपलब्धौतु प्रमाणं वक्ष्यति सं
घातपरार्थत्वादिति। इदंतावत्प्रमाणावधारिते हि प्रत्यक्षप्रवर्त्तमानमयोग्यत्वान्न प्रवर्त्तत इति कल्प्यते। सप्तमृत्तरसो
न प्रमाणेनावधारित इति न तत्र प्रत्यक्षयोग्यताशङ्काध्यवसातुमिति भावः। किंपुनस्तत्कार्य्यं यतः प्रधानमनुमान
मित्यत आह· महदादितच्च कार्यं। एतच्च यथागमकं तदुपरिष्टादुपपादयिष्यते। तस्य च कार्यस्य विवेकज्ञानोपयोगि
नी सारूप्यवैरूप्ये आह। प्रकृतिसरूपं विरूपंच। एते चोपरिष्टाद्विभजनीये इति॥८॥ असदकरणादुपादानग्र
हणात्सर्वसंभवाभावात्। शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यं॥९॥ कार्यकारणमात्रं गम्यते। सन्तिचात्रवा
दिनां विप्रतिपत्तयः। केचिदाहुरसतः सज्जायत इति· एकस्यसतो विवर्त्तः कार्य्यजातं न वस्तु सदित्यपरे। अन्येतुस
तोऽसज्जायत इति। सतः सज्जायत इति वृद्धाः। तत्र पूर्वस्मिन्कल्पत्रये प्रधानं न सिध्यति। सुखदुःखमोहभेदवत्स
रूपपरिणामशब्दाद्यात्मकत्वं हि जगत्कारणस्य प्रधानस्य प्रधानत्वं। सत्वरजस्तमः स्वभावकत्वं। यदिपुनरसतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सज्जायत इत्यसन्निरूपात्मकं कारणं कथं सुखादिरूपशब्दाद्यात्मकं स्यात्। सदसतोस्तादात्म्यानुपपत्तेः अथापि एकस्य स
तो विवर्त्तः शब्दादिप्रपंचः तथापि सतः सज्जायत इति न स्यात् नचास्याद्वयस्य प्रपंचात्मकत्वं अपि तु प्रपंचस्य प्रपं
चात्मकतया भासनं भ्रान्तिरेव येषामपि कणभक्षाक्षचरणादीनां सत एव कारणादसतो जन्म तेषामपि सदसतोरेकत्वानु
पपत्तेरिति न कार्यात्मकं कारणमिति न तन्मते प्रधानसिद्धिरतः प्रधानसिध्यर्थं प्रथमं तावत्सत्कार्यं प्रतिजानीते अस
दकरणादिति। सत्कार्यं कारणव्यापारात्प्रागपीति शेषः। तथा च न सिद्धसाधनं नैयायिकादितनयैरुद्भावनीयं। यद्यपि च
बीजमृत्पिंडादिप्रध्वंसानंतरमंकुरघटाद्युत्पत्तिर्लभ्यते तथापि न प्रध्वंसस्य कारणत्वं अपि तु भावस्यैव बीजाद्यवयवस्य
अभावात्तु भावस्योत्पत्तौ सर्वत्र सुलभत्वात्सर्वत्र कार्योत्पादप्रसंग इत्यादि न्यायवार्त्तिकतात्पर्यटीकायामुपपादित
मस्माभिरिह नोक्तं विस्तरभयात्। प्रपंचप्रत्यय एवास्त्वसति बाधके न शक्यो मिथ्येति वक्तुमिति। कणभक्षाक्षचरण
मतमवशिष्यते। तत्रेदं प्रतिज्ञातं सत्कार्यमिति। अत्र हेतुमाह असदकरणात्। असच्चेत्कारणव्यापारात्पूर्वं कार्यं ना
स्य सत्त्वं केनापि शक्यं कर्त्तुं। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्त्तुं शक्यते। सदसत्वे घटस्य धर्माविति चेत्। तथाप्य
सति धर्मिणि न तस्य धर्म इति सत्वं तदवस्थमेव। तथा च नासत्वं असंबद्धेन तदात्मना चाऽसत्वेन कथमसन्घटः
तस्मात्कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्यमिति। कारणाच्चास्य सतो भिव्यक्तिरेवावशिष्यते सतश्चा
भिव्यक्तिरुपपन्ना। यथा च पीडनेन तिलेषु तैलस्य यथावघातेन धान्येषु तण्डुलानां। दोहनेन सौरभेयीषु पयसः।

विशेषेण सर्वं कार्यजातं सर्वस्मात् भवेन्न चैतदस्ति। तस्मात् संवद्धं संवद्धेन जन्यते। यथाहुः सांख्यवृद्धाः। असत्वा ५

सा॰त॰कौ॰ ९

असतः करणे तु न निदर्शनं किंचिदस्ति। नो खल्व भिद्यमानमुत्पाद्यमानं वा कचिदसद् दृष्टं। इतश्च कारणव्यापारात् प्रागेव

कार्यं सदित्याह। उपादानग्रहणात्। उपादानानि कारणानि तेषां ग्रहणं कार्येण संबंधः। उपादानैः कार्यस्य संबंधादिति यावत्।

एतदुक्तं भवति। कार्येण संवद्धं कारणं कार्यजनकं भवति। संबंधश्च कारणैः कार्यस्यासतो न संभवति। तस्मात् सदिति।

स्यादेतत्। असंवद्धमेव कस्मात् कारणैः कार्यं न जन्यते तथा वा सदेवोत्पत्स्यत इत्यत आह। सर्वसंभवाभावात्। असंवद्धस्य

जन्यत्वे ऽसंवद्धत्वाविशेषात् सर्वं सर्वस्मात् जायेत। न चैतदस्ति। तस्मान्नासंवद्धमसंवद्धेन जन्यते अपि तु संवद्धं संवद्धेन जन्यते यथाहुः। स्यादेतत्। अ

संवद्धं ~~सवद्धं~~ मपि तदेव करोति यत्र यत्कारणं शक्तं शक्तिश्च कार्यदर्शनादेव गम्यते। तेन नाव्यवस्थेत्यत आह। शक्तस्य

शक्यकरणात्। सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात् शक्ये वा सर्वत्र चेत् तदवस्थैवाव्यवस्था। शक्ये चेत् कथमसति शक्ये

तत्रेति वक्तव्यं। शक्तिभेद एव स तादृशो यतः किंचिदेव कार्यं जनयेन्न सर्वमिति चेत् हन्त भोः शक्तिविशेषः कार्यसंवद्धो ऽसं

वद्धो वा। संवद्धे नासतः सता संवंध इति सत्कार्यं असंवद्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्का

र्यमित्याह। कारणभावाच्च। कार्यस्य कारणात्मकत्वात्। नहि कारणाद्भिन्नं कार्यं। कारणं च सदिति कथं तदभिन्नं कार्यमस

द्भवेत्। कार्यस्य कारणाभेदसाधनानि प्रमाणानि। न पटस्तन्तुभ्यो भिद्यते तन्तुधर्मत्वात्। इह यद्यतो भिद्यते तत्तस्य ध

र्मो न भवति यथा गौरश्वस्य। धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरं। उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः। ययोर

र्थान्तरत्वं न तयोरुपादानोपादेयभावो यथा घटपटयोः। उपादानोपादेयभावश्च तन्तुपटयोस्तस्मान्नार्थान्तरत्वमिति। इतश्च

+१ इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावात्। अर्थान्तरत्वे हि संयोगो दृष्टः कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः। न चेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पटस्तंतुभ्योनभिद्यतेगुरुत्वांतरकार्याग्रहणात्।इहयद्यस्माद्भिन्नंतत्तस्माद्गुरुत्वांतरकार्यंगृह्यते।यथाएकप
लिकस्यस्वस्तिकस्ययोगुरुत्वकार्योऽवनतिविशेषस्ततोद्विपलिकस्यस्वस्तिकस्यगुरुत्वकार्योवनतिभेदो
धिकः।नतथातंतुगुरुत्वकार्यात्पटगुरुत्वकार्यांतरंदृश्यते।तस्मादभिन्नस्तंतुभ्यःपटइति।तावेतावभेदसाध
नाववीतानि।तदेवमभेदेसिद्धेतंतवएवतेनतेनसंस्थानभेदेनपरिणताःपटोनतंतुभ्योऽर्थांतरंपटः।स्वात्म
निक्रियानिरोधबुद्धिव्यपदेशार्थक्रियाभेदाश्चनैकान्तिकंभेदंसाधयितुमर्हंति।एकस्मिन्नपितत्तद्विशेषा
विर्भावतिरोभावाभ्यामेतेषामविरोधात्।यथाहिकूर्मस्यांगानिकूर्मशरीरेनिविशमानानितिरोभवंति।
निःसरंतिवाविर्भवंतिनतुकूर्मतस्तदंगानिचोत्पद्यंतेप्रध्वंसंतेवा।एवमेकस्यामृदःसुवर्णस्यवातेतेघट
मुकुटादयोविशेषाःनिःसरंतःआविर्भवंतःउत्पद्यंतइत्युच्यंते।निविशमानास्तिरोभवंतोविनश्यंतीत्यु
च्यंते।नपुनरसतामुत्पादःसतांवानिरोधः।यथाहभगवान्कृष्णद्वैपायनः।नासतोविद्यतेभावोनाभावोविद्य
तेसतइति।यथाकूर्मःस्वावयवेभ्यःसंकोचविकाशिभ्योनभिन्नःएवंघटमुकुटादयोपिमृत्सुवर्णादिभ्योनभि
न्नाः।एवंचेहतंतुषुपटइतिव्यपदेशोयथेहवनेतिलकाइत्युपपन्नः।नचार्थक्रियाभेदोपिभेदमापादयति।
एकस्यापिनानार्थक्रियासंदर्शनात्।यथाएकएववह्निर्दाहकःपाचकःप्रकाशकश्चेति।नाप्यर्थक्रिया
व्यवस्थावस्तुभेदेहेतुः।तेषामेवसमस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात्।यथाप्रत्येकंविष्टयोव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्मदर्शनलक्षणामर्थक्रियां कुर्वंति। ननु शिविकावहनं। मिलितास्तु शिविकामुद्वहंति। एवं तंतवः प्रत्येकं प्रावरण
मकुर्वाणाः अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यंति। स्यादेतत् आविर्भावः पटस्य कारणव्यापारात्प्राक्
सन् असन् वा। असंश्चेत्प्राप्तमसदुत्पादनमिति। अथ सन् कृतं तर्हि कारणव्यापारेण। नहि सति कार्ये कारणा
नां प्रयोजनं पश्यामः आविर्भावे चाविर्भावांतरकल्पनेऽनवस्थाप्रसंगः। तस्मादाविर्भूतपटभावास्तांतव एवाक्रि
यन्तेइति रिक्तं वचः मैवं। अथासदुत्पद्यते इत्यत्रापि ते मते केयमसदुत्पत्तिः। सती असती वा सती चेत् किं कार
णैः। असती चेत्तत्राप्युत्पत्त्यंतरमित्यनवस्था। अथोत्पत्तिः पटान्नार्थांतरमपि तु पट एवासौ। तथापि यावदुक्तं भ
वति पट इति तावदुक्तं भवत्युत्पद्यत इति। ततश्च पट इत्युक्ते उत्पद्यत इति न वाच्यं पौनरुक्त्यात्। विनश्यतीत्यपि न
वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्। तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा उभयथा
पि नोत्पद्यते। अथ च तदर्थानि कारणानि व्यापार्यंते। एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नं। न च पटरूपे
ण कारणानां संबंधः। तद्रूपस्याक्रियात्वात्। क्रियासंबंधित्वाच्च कारकाणां। अन्यथा कारकत्वाभावात्। तस्मात्सत्का
र्यमिति पुष्कलं। तदेवं प्रधानसाधनानुगुणं सत्कार्यमुपपाद्य यादृशं तत्प्रधानं साधनीयं तादृशमादर्शयितुं विवेक
ज्ञानोपयोगिनी व्यक्ताव्यक्तसारूप्यवैरूप्ये तावदाह।।८।। हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं।। सावयवं पर
तंत्रं व्यक्तं तद्विपरीतमव्यक्तं।।१०।। व्यक्तं हेतुमत्। हेतुः कारणं तद्वत्। यस्य च यो हेतुस्तमुपरिष्टाद्वक्ष्यति। अनित्यं वि

नाशितिरोभावीतियावत्।अव्यापिसर्वंपरिणामिनमाप्नोतिकारणेन हिकार्यंसमाविष्टंनकार्येणकारणं।नचबुद्ध्यादयःप्रधा
नंवेविषंतीसमापकाः।सक्रियंपरिस्पंदवत्।तथाहिबुद्ध्यादयःउपात्तमुपात्तंदेहंत्यजंतिदेहांतरंचोपाददतइति।ते
षांपरिस्पंदइति।शरीरपृथिव्यादीनांचपरिस्पंदःप्रसिद्धएव।अनेकंप्रतिपुरुषंबुद्ध्यादीनांभेदात्।पृथिव्याद्यपिशरी
रघटादिभेदेनानेकमेव।आश्रितंस्वकारणमाश्रितंबुद्ध्यादिकार्यं।अभेदेपिहिकथंचिद्भेदविवक्षयाऽऽश्रयाश्रयिभा
वोयथेहवनेतिलकाइत्युक्तं।लिंगंप्रधानस्ययथाचैतेबुद्ध्यादयःप्रधानस्यलिंगंतथोपरिष्टाद्वक्ष्यति।प्रधानंतुप्रधा
नस्यालिंगंपुरुषस्यलिंगंभवेदपीतिभावः।सावयवमिति।अवयवावयविसंयोगसंयोगि।अथवाअवयविनंअव
यवोऽवयवानामवयविनांमिथःसंश्लेषोमिश्रणंसंयोगइतियावत्।अप्राप्तिपूर्विकाप्राप्तिःसंयोगःतेनसहवर्त्ततइ
तिसावयवं।तथाहिपृथिव्यादयःपरस्परंसंयुज्यंते।एवमन्येपि।ननुप्रधानस्यबुद्ध्यादिभिःसंयोगस्तादात्म्यात्।नापि
सत्वरजस्तमसांपरस्परंसंयोगःअप्राप्तेरभावात्।परतंत्रंबुद्ध्यादि।स्वकार्येहंकारजननेपितव्येप्रकृत्यापूरमपेक्षते।अ
न्यथाक्षीणाहतीनालमहंकारंजनयितुमितिस्थितिः।एवमहंकारादिभिरपिस्वकार्यजननइति।सर्वंस्वकार्येप्रकृ
त्यापूरमपेक्षते।तेनप्रकृतिपरामपेक्षमाणंकारणमपिकार्योपजनेनेपरतंत्रंव्यक्तं।विपरीतमव्यक्तंमक्तान्।अहेतु
मत्·नित्यंव्यापिनिःक्रियं।यद्यप्यव्यक्तस्यास्तिपरिणामलक्षणाक्रियातथापिपरिस्पंदोनास्तीति।एकंअनाश्रि
तंअलिंगंअनवयवंस्वतंत्रंअव्यक्तं।तदनेनप्रबंधेनव्यक्ताव्यक्तयोर्वैधर्म्यमुक्तंसंप्रतितयोःसाधर्म्यंपुरुषाच्चवै

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्म्ममाह॥१०॥ त्रिगुणमविवेकि विषयः सामान्यमचेतनंप्रसवधर्म्मि॥ व्यक्तंतथाप्रधानंतद्विपरीतस्तथाचपुमान्॥
सां०त०कौ० ११॥ त्रिगुणंत्रयोगुणाः सुखदुःखमोहाअस्येतित्रिगुणं। तदनेनसुखादीनामात्मगुणत्वंपराभिमतमपाकृतं। अवि
११ वेकि। प्रधानंयथास्वतोनविविच्यते। एवंमहदादयोपिनप्रधानाद्विविच्यन्तेतदात्मकत्वात्। अथवासंभूयकारिता
त्राविवेकिता। नहिकिंचिदेकंपर्य्याप्तंस्वकार्येअपितुसंभूय। तत्रनैकस्मात्कस्यचित्केनचित्संभवः इति। येत्वाहु
र्विज्ञानमेवहर्षविषादमोहशब्दाद्यात्मकंनपुनरितोन्यदस्तिधर्म्मीतितान्प्रत्याहविषयइति। विषयोग्राह्योविज्ञा
नाद्बहिरितियावत्। अतएवसामान्यंसाधारणंघटादिवत्। विज्ञानाकारत्वेत्वसाधारण्याद्विज्ञानानांवृत्तिरूपाणांत
थासाधारणाःस्युः। विज्ञानंयथापरेणनगृह्यतेपरबुद्धेरप्रत्यक्षत्वादित्यभिप्रायः। तथाचनर्त्तकीभ्रूलताभंगेएकस्मिन्ब
हूनांप्रतिसंधानंयुक्तमन्यथातन्नस्यादितिभावः। अचेतनं। सर्वएवप्रधानबुद्ध्यादयोऽचेतनाः। नतुवनाशिकवच्चै ल
तन्यंबुद्धेरित्यर्थः। प्रसवधर्म्मि। प्रसवरूपोधर्म्मोयः सोऽस्यास्तीतिप्रसवधर्म्मिप्रसवधर्म्मेतिवक्तव्येमत्वर्थीयःप्रस
वधर्म्मस्यनित्ययोगमाख्यातुंसरूपविरूपपरिणामाभ्यांनकदाचिद्वियुज्यतेइत्यर्थः। व्यक्तंदृष्टमव्यक्तोऽतिदिशति॥
मा तथाप्रधानंयथाव्यक्तंतथाप्रधानमपीत्यर्थः। आभ्यांवैधर्म्यंपुरुषस्याह। तद्विपरीतःपुमान्। स्यादेतत्। अहेतुमत्त्वनि
त्यत्वादिप्रधानस्य [illegible] धर्म्मम्मस्तिपुरुषस्य एवमनेकत्वंव्यक्तसाधर्म्यंतत्कथमुच्यतेतद्विपरीतःपुमान्। नित्यत्वआ
हेतुमत्त्वादिकंसाधर्म्यंतथाप्यत्रैगुण्यादिवैपरीत्यमस्यास्तीत्यर्थः॥११॥ त्रि ११
ह। तथाच। चकारोऽप्यर्थः। यद्यप्यहेतुमत्त्वादिकंसाधर्म्यंतथाप्यत्रैगुण्यादिवैपरीत्यमस्यास्तीत्यर्थः॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुण मित्युक्तं तत्र के ते त्रयो गुणाः किं च तदुपलक्षित मित्यत आह। प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥१२॥ प्रीत्यप्रीतिविषादात्मका गुणा इति पराधीः। सत्त्वं लघु
प्रकाशकमित्यत्र च सत्त्वादयः क्रमेण निर्दिश्यंते तदनागतावेक्षणे न त्वत्र युक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यं। ए
तदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः। विषादो मोहः विषादात्म
कस्तमोगुण इति। ये तु मन्यंते प्रीतिर्दुःखाभावान्नातिरिच्यते। एवं दुःखमपि न प्रीत्यभावादन्यदिति तान्प्रत्यात्मग्रह
णं। तेन नेतरेतराभावाः सुखादयोऽपि भावाः आत्मशब्दस्य भाववचनत्वात्। प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः।
एवमन्यदपि व्याख्येयं। भावरूपता चैषामनुभवसिद्धा। परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धे
रुभयासिद्धिरिति भावः। स्वरूपमेषामुक्त्वा प्रयोजनमाह। प्रकाशप्रवृत्तिनियमार्थाः इति अत्रापि यथासंख्यमेव। रजः
प्रवर्त्तकतया सर्वत्र सत्त्वं लघु प्रवर्त्तयेद्यदि तमसा गुरुणा न नियम्येत। तमो तिपतंतु क्वचिदेव प्रवर्त्तयतीति भवति
तमो नियमार्थं प्रयोजनमुक्त्वा क्रियामाह। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चेति। वृत्तिः क्रिया सा च प्रत्ये
कमभिसंबध्यते। अन्योन्याभिभववृत्तयः एतेषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते। तथा हि सत्त्वं रजस्तम
सी अभिभूय शांतामात्मनो वृत्तिं प्रतिलभते। एवं रजः सत्त्वं तमसी अभिभूय घोरां। एवं तमः सत्त्वरजसी अभिभूय
मूढामिति। अन्योन्याश्रयवृत्तयः। यद्यप्याधाराधेयभावो नाश्रयार्थस्तथापि यदपेक्षया यस्यार्थक्रिया स तस्या

श्रयः। तथा हि। सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति। रजः प्रकाशनियमावाश्रित्य प्रवृत्त्येतरयोः
तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोः। अन्योन्यजननवृत्तयः। अन्यतमोऽन्यतमं जनयति। जननं च परिणामः
स च गुणानां सदृशरूपः। अत एव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरसंभवात्। नाप्यनित्यत्वं तत्त्वान्तरे लयाभावात्। अन्योन्य
मिथुनवृत्तयः। अन्योन्यसहचराः अविनिर्भागवर्त्तिन इति यावत्। चः समुच्चये। भवति चात्रागमः। अन्योन्यमिथु
नाः सर्वे सर्वे सर्वत्रगामिनः। रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः
सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगश्चोपलभ्यते इति। प्रकाशप्रवृत्तिनियमार्था इत्युक्तम्। त
त्र के ते इत्थंभूताः कुतश्चेत्यत आह॥१२॥ सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः प्रदी
पवच्चार्थतो वृत्तिः॥१३॥ सत्त्वमेव लघु प्रकाशकमिष्टं सांख्याचार्यैः। तत्र कार्योद्गमने हेतुर्धर्मो लाघवं गौरवप्रति
द्वन्द्वि यतोऽग्नेरूर्द्ध्वज्वलनं भवति। तदेव लाघवं कस्यचित्तिर्यग्गमने हेतुर्भवति। यथा वायोः एवं करणानां वृत्तिपटुत्वे
हेतुर्लाघवं। गुरुत्वे हि मन्दानि स्युरिति। सत्त्वस्य प्रकाशात्मकत्वमुक्तं सत्त्वतमसी स्वयमक्रियतया स्वकार्यं प्रति प्रत्यवसीद
न्ती रजसोपष्टभ्येते अवसादात्प्रच्याव्य स्वकार्ये उत्साहप्रयत्नं कार्येते। तदिदमुक्तमुपष्टम्भकं रज इति। कस्मादित्यत उक्तं
चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितं। रजस्तु चलतया परितस्त्रैगुण्यं चालयेत्। गुरुणा आवृण्वता च तमसा तत्र
तत्र प्रवृत्तिप्रतिबंधेन क्वचिदेव प्रवर्त्तत इति ततस्ततो व्यावर्त्य तमो नियामकमुक्तं। गुरु वरणकमेव तम इति। एव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारः प्रत्येकं भिन्नक्रमस्तत्त्वं बध्यते सत्त्वमेव रज एव तम एवेति। ननु ते परस्परविरोधशीला गुणाः सुन्दोपसुन्दन्यायेन प
रस्परं ध्वंसन्त इत्येवमुक्तं प्रागेव तु तेषामेकक्रियाकर्तृतेत्यत आह· प्रदीपवच्चार्थतो वृत्तिः। दृष्टमेवैतत् यथा वर्त्तिते
ले अनलविरोधिनी अथ च मिलिते सह अनलेन रूपप्रकाशनलक्षणं कार्यं कुरुतः। यथा वा वातपित्तश्लेष्माणः पर
स्परविरोधिनः शरीरधारणकार्यकारिणः एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यपि अनुवर्त्तिष्यन्ते स्वकार्यं करिष्यं
ति च। अर्थतः इति पुरुषार्थत इति यावत्। यथा च वक्ष्यति· पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति। अत्र च सुख
दुःखमोहात्मकान्येव निमित्तानि कल्पयति। तेषां च परस्पराभिभाव्याभिभावकभावात् नानात्वं तद्यथा। एकैव स्त्री
रूपयौवनकुलशीलसंपन्ना स्वामिनं सुखाकरोति। तत्कस्य हेतोः स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव
स्त्री सपत्नीं दुःखाकरोति तत्कस्य हेतोः तां प्रति तस्याः दुःखरूपसमुद्भवात्। एवं पुरुषान्तरं तामविंदमानं सैव स्त्री
मोहयति तत्कस्य हेतोः तं प्रति तस्या मोहरूपसमुद्भवात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुख
हेतुस्तत्सुखात्मकं सत्त्वं। यद्दुःखहेतुः तद्दुःखात्मकं रजः। यन्मोहहेतुस्तन्मोहात्मकं तमः। सुखप्रकाशलाघवानां
त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात्। तस्मात् सुखदुःखमोहैरिव विरोधिभिः अविरोधिभिरेकैकगुणवृत्ति
भिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते। एवं दुःखोपष्टंभकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरकत्वैरिति सि
द्धं त्रैगुण्यमिति। स्यादेतत्· अनुभूयमानेषु पृथिव्यादिष्वनुभवसिद्धा भवन्त्वविवेकित्वादयो ये पुनः सत्त्वादयो ना

सां॰त॰कौ॰ नुभवपथमधिरोहंति तेषां कुतस्त्यमविवेकित्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसवधर्मित्वं चेत्यत आह॥१३॥ अविवेक्यादेः
१३ सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात्। कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धं॥१४॥ अविवेकित्वं अविवेकि यथा
द्व्येकयोर्द्विवचनैकवचने इत्यत्र द्वित्वैकत्वयोरिति अन्यथा द्व्येके स्थितिः स्यात्। कुतः पुनरविवेकित्वादेः सिद्धिरित्यत
आह। त्रैगुण्यात्। यद्यत्सुखदुःखमोहात्मकं तत्तदविवेक्यादि [redacted] योगि यथेदमनुभूयमानं व्यक्तमिति स्फुटत्वात्
दन्वयेनोक्तं। व्यतिरेकमाह। तद्विपर्ययाभावात्। अविवेक्यादिविपर्यये पुरुषे त्रैगुण्याभावात्। अथवा व्यक्ताव्यक्ते प
क्षीकृत्यान्वयाभावेन त्रैगुण्यादित्ययं वीत एव हेतुर्वक्तव्यः स्यादेतत् अव्यक्तसिद्धौ सत्यां तस्यां विवेकित्वादयो धर्माः सिध्ये
ति अव्यक्तमेव त्वद्यापि न सिध्यति तत्कथमविवेक्यादिसिद्धिरित्यत आह। कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सि
द्धं अयमभिसंधिः कार्यं हि कारणगुणात्मकं दृष्टं यथा तंत्वादिगुणात्मकं पटादि तथा महदादिलक्षणेनापि कार्येण सुखदुः
ख मोहरूपेण स्वकारणगतसुखदुःखमोहात्मना भवितव्यं। तथा च तत्कारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्धं भ
वतीति॥१४॥ स्यादेतत्। व्यक्ताद्व्यक्तमुत्पद्यते इति कणभक्षाक्षचरणतनयाः परमाणवो हि व्यक्तास्तैर्द्व्यणुकादिप्रक्रमेण ण
पृथिव्यादिलक्षणं व्यक्तं कार्यमारभ्यते। पृथिव्यादिषु च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः तस्माद्व्यक्ताद्व्यक्तस्योत्प
त्तेः कृतमव्यक्तेनादृष्टचरेणेत्यत आह। भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागा
द्वैश्वरूप्यस्य॥१५॥ भेदानां विशेषाणां महदादीनां भूतान्तानां कारणमस्त्यव्यक्तं। कुतः कारणकार्यविभागादविभागाद्वै १३

श्वरूपस्य कारणे सत्कार्यमिति हि स्थितं तथा च यथा कूर्मस्य शरीरे संत्येवाङ्गानि निःसरंति विभज्यंते इदं कूर्मशरीरमे
तान्येतस्याङ्गानीति। एवं निविशमानानि तस्मिन्नव्यक्तीभवंति। एवं कारणान्मृत्पिंडाद्धेमपिंडाद्वा कार्याणि घटमुकुटा
दीनि संत्येवाविर्भवंति विभज्यंते। संत्येव पृथिव्यादीनि कारणात्तन्मात्राज्जुआविर्भवंति विभज्यंते। संत्येव च तन्मात्राण्य
हंकारात्। संत्येवाहंकारः कारणान्महतः संत्येव च महान्परमाव्यक्तादिति। सोयं कारणात्परमाव्यक्तात्साक्षात्पारंपर्ये
णान्वितस्य विश्वस्य कार्यस्य विभागः प्रतिसर्गे तु मृत्पिंडं हेमपिंडं वा घटमुकुटादयो निविशंतो ऽव्यक्तीभवंति तत्का
रणरूपमेवानभिव्यक्तं कार्यमपेक्ष्याव्यक्तं भवति। एवं पृथिव्यादयस्तन्मात्राणि विशंतस्तान्यपेक्ष्य तन्मात्राण्यव्य
क्तयंति। एवं तन्मात्राण्यहंकारं विशंति अहंकारमव्यक्तयंति। एवमहंकारो महांतं विशन्महांतमव्यक्तयति। महा
न्प्रकृतिं स्वकारणं विशन्प्रकृतिमव्यक्तयति। प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव सोयमविभा
गः प्रकृतौ विश्वरूपस्य नानारूपस्य कार्यस्य स्यात्। तस्मात्कारणे कार्यस्य सत एव विभागाविभागा
भ्यामव्यक्तं कारणमस्तीति इतश्चाव्यक्तमस्तीत्यत आह। शक्तितः प्रवृत्तेश्च। कारणशक्तितः कार्यं प्रवर्त्तत इति
सिद्धम्। अशक्तात्कारणात्कार्यस्यानुत्पत्तेः शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वादन्या न हि सत्कार्यपक्षे कार्य
स्याव्यक्ततायाः अन्यस्यां शक्तावस्ति प्रमाणं। अयमेव सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्य
नागतावस्थं न सिकतास्विति। स्यादेतत् शक्तितः प्रवृत्तिः कारणकार्यविभागाविभागौ च महत एव परमाव्यक्तत्वं सा।

हं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां॰ त॰ कौ॰ धायिष्यतः कृतं ततः परेणाव्यक्तेनेत्यत आह। परिमाणात्परिमितत्वात् अव्यापित्वादिति यावत् विवादाध्यासिता
१४ महदादिभेदा अव्यक्तकारणवन्तः परिमितत्वात् घटादिवत्। घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः
उक्तमेतत् यथा कार्यस्याव्यक्तावस्था कारणमेवेति। यन्महतः कारणं तत्परमाव्यक्तं। ततः परतराव्यक्तकल्प
नायाः प्रमाणाभावात्। इतश्च विवादाध्यासिता भेदाः अव्यक्तकारणवन्तः स[redacted]मन्वयात्। भिन्नानां
समानरूपता समन्वयः। सुखदुःखमोहसमन्विता हि बुद्ध्यादयो ध्यवसायादिलक्षणाः प्रतीयन्ते। यानि च य मु
द्रूपमनुगतानि तानि तत्स्वभावाव्यक्तकारणकानि। यथा मृद्धेमपिंडसरूपमनुगता घटमुकुटादयो मृद्धेम
पिंडाव्यक्तकारणका दृष्टा इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धं ॥१५॥ अव्यक्तं साधयित्वास्य प्रवृत्तिप्रका
रमाह। कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च। परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषा
त॥१६॥ प्रवर्त्तते त्रिगुणतः प्रतिसर्गावस्थायां हि सत्वं रजश्च तमश्च सदृशपरिणामानि भवन्ति। परिणाम
स्वभावका हि गुणाः। नापरिणम्य क्षणमप्यवतिष्ठन्ते। तस्मात् सत्वं सत्वरूपतया रजो रजोरूपतया तमस्त
मोरूपतया प्रतिसर्गावस्थायामपि प्रवर्त्तन्ते। तदिदमुक्तं त्रिगुणत इति। प्रवृत्त्यन्तरमाह। समुदयाच्च। समेत्यो
दयः समुदयः समवायः समुदयश्च गुणानां न गुणप्रधानभावमन्तरेण संभवति। न च गुणप्रधानभावो वैषम्य
विना न च वैषम्यमुपमर्द्योपमर्दकभावादृत इति महदादिभावेन प्रवृत्तिर्द्वितीया। स्यादेतत् कथमेकरूपा १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णां गुणानामनेकरूपा प्रवृत्तिरित्यत आह परिणामतः सलिलवत्। यथा वारिदविमुक्तमुदकमेकरसमपि तत्तद्भूवि
कारानासाद्य नालिकेरतालतालीबिल्वचिरबिल्वतिंदुकामलकप्राचीनामलककपित्थफलरसतया परिणत
वमे मपि मधुराम्लतिक्तकटुकषायतया विकल्प्यते। एवमेकैकगुणसमुद्भवात् प्रधानगुणमाश्रित्याप्रधाना गुणाः परिणा
मभेदान् प्रवर्त्तयन्तीति तदिदमुक्तं प्रतिप्रतिगुणाश्रयविशेषात्। एकैकगुणाश्रयेण यो विशेषस्तस्मादित्यर्थः॥
१६॥ ये तु तौष्टिका अव्यक्तं वा बुद्धिं वाहंकारं वेन्द्रियाणि वा भूतानि वात्मानमभिमन्यमाना स्तानेवोपासते तान्प्रत्याह
संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च॥१७॥ पुरुषोऽस्त्यव्य
क्तादेर्व्यतिरिक्तः। कुतः संघातपरार्थत्वात् अव्यक्तमहदहंकारादयः परार्थाः संघातत्वात् शयनासनादिवत् सु
खदुःखमोहात्मकतया अव्यक्तादयः सर्वे संघाताः। स्यादेतत् शयनासनादयः संघाताः संहतशरीराद्यर्था दृष्टा न त्वा
त्मानमव्यक्ताद्व्यतिरिक्तं प्रति परार्थाः। तस्मात् संघातान्तरमेव गमयेयुर्न त्वसंहतमात्मानमित्यत आह। त्रिगुणादिवि
पर्ययात् अयमभिप्रायः। संघातान्तरार्थत्वे हि तस्यापि संघातत्वात्तेनापि संघातान्तरार्थेन भवितव्यम्। एवं तेन ते
नेत्यनवस्था स्यात्। न च व्यवस्थायां सत्यामनवस्था युक्ता कल्पनागौरवप्रसंगात्। न च प्रमाणवत्त्वेन कल्पनागौरवम
पि कल्पनीयमिति युक्तं संघातत्वस्य पारार्थ्यमात्रेणान्वयात् दृष्टान्तदृष्टसर्वधर्मानुरोधेनानुमानमिच्छतः सर्वानु
मानोच्छेदप्रसंग इत्युपपादितं न्यायवार्त्तिकतात्पर्यटीकायामस्माभिः। तस्मादनवस्थाभियाऽस्यासंघातत्वमि

ष्ठता। त्रिगुणत्वं विवेकित्वमविषयत्वमसामान्यत्वमचेतनत्वमप्रसवधर्मित्वं चाभ्युपेतव्यम्। त्रिगुणत्वादयो हि धर्माः
संहतत्वेन व्याप्ताः। तत्संहतत्वमस्मिन्नरे व्यावर्त्तमानं त्रैगुण्यादि व्यावर्त्तयति। ब्राह्मणत्वमिव व्यावर्त्तमानं कठत्वादि व्या
वर्त्तयति। तस्मात्संहतार्थेण त्रिगुणादिविपर्ययादिति वदताऽसंहतः परो विवक्षितः स चात्मेति सिद्धं। इतश्च पुरुषोऽस्ति
अधिष्ठानात्। त्रिगुणात्मकानामधिष्ठीयमानत्वात्। यद्यत्सुखदुःखमोहात्मकं चेद्बुद्ध्यादि तस्मादेतद्विपरेणाधि
ष्ठातव्यम्। स च परः त्रैगुण्यादन्य आत्मेति। इतश्चास्ति पुरुषो भोक्तृभावात्। भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षय
ति। भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन के
नचिदन्येन भवितव्यम्। न चानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयः। तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधा
त्। तस्माद्योऽसुखाद्यात्मानुकूलनीयः प्रतिकूलनीयो वा स आत्मेति। अन्ये त्वाहुः भोग्या दृश्या बुद्ध्यादयः न च द्रष्टारमन्त
रेण दृश्यता युक्ता तेषां तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्तः स चात्मेति। भोक्तृभावात् द्रष्टृभावात् दृश्येन द्रष्टुरनुमा
नादित्यर्थः। दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितं। इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्च
शास्त्राणां महर्षीणां च दिव्यलोचनानां कैवल्यं चात्यन्तिकदुःखत्रयप्रशमनलक्षणं न बुद्ध्यादीनां संभवति। ते हि दुःखा
द्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते। तदतिरिक्तस्य त्वात्मनस्ततो वियोगः शक्यसंपादः। तस्मात्कैवल्यार्थं प्र
वृत्तेरागमानां महाधियां चास्ति बुद्ध्याद्यतिरिक्तं आत्मेति सिद्धम्। तदेवं पुरुषास्तित्वं प्रतिपाद्य स किं सर्वशरीरेष्वेकः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमनेकः प्रतिक्षेत्रमिति संशयेतस्यप्रतिक्षेत्रमनेकत्वमुपपादयति॥१७॥जननमरणकरणानांप्रतिनियमादयुगप
त्प्रवृत्तेश्च।पुरुषबहुत्वंसिद्धंत्रैगुण्यविपर्ययाच्चैव॥१८॥पुरुषबहुत्वंसिद्धंकस्मात्जननमरणकरणानांप्रतिनियमात्।निका जानिः२
यविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोहंकारबुद्धिवेदनाभिः पुरुषस्याभिसंबंधोजन्म।नतुपुरुषस्यपरिणामः तस्यापरि
णामित्वात्।तेषामेवचदेहादीनामुपात्तानांपरित्यागोमरणं।नत्वात्मनोविनाशस्तस्यकूटस्थस्यनित्यत्वात्।करणा
निबुध्यादीनित्रयोदश।तेषांजन्ममरणकरणानांप्रतिनियमोव्यवस्था।साखल्वियंसर्व~~[illegible]~~
[illegible]शरीरेष्वेकस्मि~~[illegible]~~ पुरुषेनोपपद्यते।तदाखल्वेकस्मिन्जायमानेसर्वेजायेरन्
म्रियमाणेचम्रियेरन्।अन्धादौचैकस्मिन्सर्वएवांधाः।बधिरादयो।विचित्तेचैकस्मिन्सर्वएवविचित्ताःस्युरित्यव्यवस्था।प्रति
क्षेत्रंतुपुरुषभेदेभवतिव्यवस्था।नचैकस्यापिपुरुषस्यदेहोपधानभेदाद्व्यवस्थेतियुक्तं।पाणिस्तनाद्युपाधिभे
देनापिजन्ममरणादिव्यवस्थाप्रसंगात्।नहिपाणौछिन्नेजातेवास्तनादौमहत्सवयवेयुवतिर्मृतावाभवतीति।इ
तःप्रतिक्षेत्रंपुरुषभेदइत्याह।अयुगपत्प्रवृत्तेश्च।प्रवृत्तिःप्रयत्नलक्षणा।यद्यप्यंतःकरणवर्तिनीतथापिपुरुषेउ
पचर्य्यते।तथाचतस्मिन्नेकत्रशरीरेप्रयतमानेसएवसर्वशरीरेष्वेकइतिसर्वत्रप्रयतेत।ततश्चसर्वाण्येवशरीरा
णियुगपच्चलेयुः।नानात्वेतुनायंदोषइति।इतश्चपुरुषभेदइत्याह।त्रैगुण्यविपर्य्ययाच्चैव।एवकारोभिन्नक्रमःसि
द्धमित्यस्यानंतरंद्रष्टव्यः।सिद्धमेवनासिद्धं।त्रयोगुणास्त्रैगुण्यं।तस्यविपर्य्ययोन्यथात्वं।केचित्खलुसत्वनिकायाःसत्व

कुलाः यथोर्द्ध्वस्रोतसः। केचिद्रजोबहुला यथा मनुष्याः। केचित्तमोबहुला यथा तिर्य्यग्योनयः। सोयमीदृशस्त्रैगुण्यविप
र्य्ययोन्यथाभावस्तेषु तेषु सत्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात्। भेदे त्वयमदोषः इति। एवं पुरुषबहुत्वं प्रसाध्य वि
वेकज्ञानोपयोगितया तस्य धर्म्मानाह। तस्माच्च विपर्य्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृ
भावश्च॥१९॥ तस्माच्चेति। चः पुरुषबहुत्वेन सह धर्म्मान्तराणि समुच्चिनोति। विपर्यासात् सिद्धं साक्षित्वमस्मादित्युक्ते त्रैगुण्य
विपर्य्ययादिसनन्तरोक्तः संबध्येत। अतस्तन्निरासाय तस्मादित्युक्तम्। अनन्तरोक्तं हि सन्निधानादिदमो विषयो विप्रकृष्टं च त
द इति विप्रकृष्टं त्रिगुणमविवेकी सादि संबध्यते। तस्मात्त्रिगुणादेः विपर्य्यासः पुरुषस्य। त्रिगुणत्वं विवेकित्वमविष
यत्वमसाधारणत्वं चेतनत्वमप्रसवधर्म्मित्वं च। तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते। चेतनो हि द्रष्टा भ
वति नाचेतनः। साक्षी च दर्शितविषयो भवति यस्मै दर्श्यते विषयः स साक्षी। यथा हि लोके अर्थिप्रत्यर्थिनौ विवादविषयं सा
क्षिणे दर्शयतः। एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न चाचेतनो विषयो वा शक्यो विषयं
दर्शयितुमिति चेतनत्वादविषयत्वाच्च भवति साक्षी। अत एव द्रष्टापि भवति। अत्रैगुण्याच्चास्य कैवल्यम्। आत्यन्तिको दुःखत्रया
भावः कैवल्यम्। तच्च तस्य स्वाभाविकादेवात्रैगुण्यात् सुखदुःखमोहरहितत्वात् सिद्धम्। अत एवात्रैगुण्यान्माध्यस्थ्यम्। सुखी हि सु
खैस्तृप्यन् दुःखी हि दुःखं द्विषन् न मध्यस्थो भवति तदुभयरहितस्तु मध्यस्थ इत्युदासीन इति चाख्यायते। विवेकित्वादप्रसव
धर्म्मित्वाच्चाकर्त्तेति सिद्धम्॥१९॥ स्यादेतत्प्रमाणेन कर्त्तव्यमर्थमवगम्य चेतनोऽहं चिकीर्षन् करोमि इति कृतिचेतन्ययोः सा १६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानाधिकरण्यमनुभवसिद्धं। तदेतस्मिन्मते नावकल्पते चेतनस्याकर्तृत्वात् कर्तुश्चाचैतन्यादित्यत आह। तस्मात्तत्संयोगाद
चेतनं चेतनावदिव लिंगं। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥२०॥ यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सि
द्धे तस्माद्भ्रांतिरियमित्यर्थः। लिंगं महदादिसूक्ष्मपर्यंतं वक्ष्यति। भ्रांतिवीजं तत्संयोगस्तत्संनिधानं अतिरोहितार्थमन्यत्॥
नतु संयोगादित्युक्तं न च भिन्नयोः संयोगोऽपेक्षां विना न चापेक्षोपकार्योपकारकभावं विनेत्यपेक्षाहेतुमुपकारमाह। पुरुषस्य
न दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः॥२१॥ प्रधानस्येति कर्मणि षष्ठी। प्रधानस्य
सर्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं। तदनेन भोग्यता प्रधानस्य दर्शिता। ततश्च भोग्यं प्रधानं भोक्तारमंतरेण न संभवती
ति युक्तास्य भोक्त्रपेक्षा। पुरुषस्यापेक्षां दर्शयति। पुरुषस्य कैवल्यार्थं तथा भोग्येन हि प्रधानेन संभिन्नः पुरुषस्तत्कृतं
दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यार्थं प्रार्थयते। तच्च सत्वपुरुषान्यताख्यातिनिबंधनं न च सत्वपुरुषान्यताख्या
तिः प्रधानमंतरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च संयोगपरंपराया भोगाय संयुक्तोऽपि कैवल्यार्थं
पुनः संयुज्यत इति युक्तं। ननु भवत्वनयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत आह। तत्कृतः सर्गः संयोगो हि न महदादि
सर्गमंतरेण भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थं सर्गं करोतीत्यर्थः। सर्गक्रममाह। प्रकृतेर्महांस्त
तोऽहंकारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात्पंचभ्यः पंचभूतानि॥२२॥ प्रकृतिरव्यक्तं महदहंकारौ वक्ष्य
माणलक्षणौ। ~~गणश्च षोडशकः। तस्मादपि षोडशकात्पंचभ्यः पंचभूतानि~~को। एकादशेंद्रियाणि वक्ष्यमाणानि तन्मा

त्राणि पंच। सोयं षोडशसंख्यापरिमितो गणः षोडशकः तस्मादपि षोडशकादपकृष्टेभ्यः पंचभ्यस्तन्मात्रेभ्यः पंचभूतान्याका
शादीनि। तत्र शब्दतन्मात्रादाकाशं शब्दगुणं। शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः। शब्दस्पर्शतन्मात्र
सहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं। शब्दस्पर्शरूप~~रसगन्धगुणा पृथिवी आपस्तेजः स्पर्शन~~तन्मात्रसहिताद्रसतन्मा
त्रादापः स्पर्शरूपरसगुणाः। शब्दस्पर्शरूपरसतन्मात्रसहिताद्गंधतन्मात्राच्छब्दस्पर्शरूपरसगंधगुणा पृथिवी जाय
शब्द ते इत्यर्थः। अव्यक्तं सामान्यतो लक्षितं तद्विपरीतमव्यक्तमिति अनेन। विशेषतश्च सत्त्वं लघु प्रकाशकमित्यादिना। व्यक्त
मपि सामान्यतो लक्षितं हेतुमदित्यादिना। संप्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षयति। अध्यवसायो बु
द्धिर्धर्म्मो ज्ञानं विराग ऐश्वर्य्यं॥ सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तं॥२३॥ अध्यवसायो बुद्धिः। क्रियाक्रियावतोरभेद
विवक्षया सर्वोपि व्यवहर्त्ता आलोच्य मत्वाहमत्राधिकृत इत्यभिमत्य कर्त्तव्यमेतन्मयेति अध्यवस्यति। ततश्च प्रवर्त्तत इति
लोकप्रसिद्धं। तत्र योऽयं कर्त्तव्यमिति विनिश्चयश्चितिसन्निधानादापन्नचैतन्याया बुद्धेः सोध्यवसायो बुद्धेरसाधारणो
व्यापारस्तदभेदाद्बुद्धिः। सच बुद्धेर्लक्षणं समानासमानजातीयव्यवच्छेदकत्वात्। तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयो
गिनस्तस्या धर्म्मान् सात्विकतामसानाह। धर्म्मो ज्ञानं विराग ऐश्वर्य्यं। सात्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तं। धर्म्मोभ्युद
यनिःश्रेयसहेतुः। तत्र यागदानाद्यनुष्ठानजनितो धर्म्मोभ्युदयहेतुः अष्टांगयोगानुष्ठानजनितश्च निःश्रेयसहेतुः। गुण
पुरुषान्यताख्यातिर्ज्ञानं। विरागो रागाभावः। तस्य यतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञेति चतस्रः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संज्ञाः रागादयः कषायाश्चित्तवर्त्तिनस्तैरिंद्रियाणि यथास्वंस्व विषयेषु प्रवर्त्तंते तन्मा प्रवर्त्तिषत विषयेष्विंद्रियाणीति तत्
त्परिपाचनायारंभः प्रयत्नो यतमानसंज्ञा। परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्काः पक्ष्यंते च केचित् तत्रैवं पू
र्वापरीभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्कानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा। इंद्रियप्रवृत्त्यसमर्थत
या पक्कानामौत्सुक्यमात्रेण मनसि व्यवस्थापनमेकेंद्रियसंज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरूपा स्थिते ष्वपि दृष्टा
नुश्राविक विषयेषु यासंज्ञात्रयात्पराचीनासा वशीकारसंज्ञा यामत्र भगवान्पतंजलिर्वर्णयांचकार। दृष्टानुश्राविक
विषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति। सोयं बुद्धिधर्म्मो विरागइति। ऐश्वर्य्यमपि बुद्धिधर्म्मो यतोऽणिमादि
प्रादुर्भावः। तत्राणिमा भवत्यणुः। यतः शिलामपि प्रविशति। लघिमा लघुर्भवति। यतः सूर्य्यमरीचीनालंब्य सूर्य्य
लोकं याति। महिमा यतो महान् भवति। येन समस्त ब्रह्मांडे पि न समवैति प्रा[illegible]प्तिरंगुल्यग्रेण स्पृशति चंद्रमसं। प्राका
म्यमिच्छानभिघातः। यतो भूमावुन्मज्जति निमज्जति च यथोदके वशित्वं भूतभौतिकं यतोवशी भवत्यवश्यं। ईशित्व
भूतभौतिकानां प्रभवव्यूहप्ययानामीष्टे। यत्रकामावसायित्वं सत्यसंकल्पता। यथास्य संकल्पो भवति भूतेषु तथैव
भूतानि भवंति। अन्येषां निश्चयाः। निश्चेतव्यमनुविधीयंते योगिनस्तु निश्चेतव्याः पदार्थाः निश्चयमिति। चत्वारः सा
त्विकाः बुद्धिधर्माः। तामसास्तु तद्विपरीता बुद्धिधर्म्माः अधर्म्माज्ञानावैराग्यानैश्वर्य्याभिधानाश्चत्वारः इत्यर्थः अ
हंकारस्य लक्षणमाह। अभिमानोहंकारस्तस्माद्द्विविधः प्रवर्त्ततेसर्गाः। एकादशकश्चगणस्तन्मात्रपंचकंचैव॥२४

सां॰त॰कौ॰ अभिमानोहंकारः। यत्खल्वालोचितं मतं च तत्राहं अधिकृतः शक्तः खल्वहमत्र मदर्था एवामी विषयाः मत्तो नान्योत्राधिकृ
१८ तः कश्चिदस्ति अतोहमस्मीति योभिमानः सोहंकारव्यापारत्वादहंकारः। तमुपजीव्य हि बुद्धिरध्यवस्यति कर्त्तव्यमेतन्मये
ति। तस्य कार्यभेदमाह। तस्माद्द्विविधः प्रवर्त्तते सर्गः। प्रकारद्वयमाह। एकादशकश्च गण इन्द्रियाह्वयः। तन्मात्रपंचकश्चैव द्वि
विध एव सर्गोहंकारात्। न त्वन्य इत्येवकारेणावधारयति॥२४॥ स्यादेतत् अहंकारादेककारणात् कथं जडप्रकाशकौ
गणौ विलक्षणौ भवत इत्यत आह। सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात्। भूतादेस्तन्मात्रः स तामसस्तैजसा
दुभयं॥२५॥ प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्त्विको वैकृतात् सात्त्विकादहंकारात्प्रवर्त्तते। भूतादेस्त्वहंका
रात्तामसात्तन्मात्रो गणः प्रवर्त्तते। कस्मात् यतः स तामसः। एतदुक्तं भवति यद्यप्येकोहंकारस्तथापि गुणभेदोद्भवाभिभवा
भ्यां भिन्नं कार्यं करोति। ननु यदि सत्त्वतमोभ्यामेव सर्वकार्यं जन्यते तदा कृतमकिंचित्करेण रजसेत्यत आह तैजसादुभय
तैजसाद्राजसादुभयं गणद्वयं भवति। यद्यपि रजसो न कार्यान्तरमस्ति तथापि सत्त्वतमसी स्वयमक्रिये समर्थे अपि न
स्वकार्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वकार्यं कुरुत इति तदुभयस्मिन्नपि कार्ये सत्त्वतमसोः क्रि
योत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज इति। सात्त्विकमेकादशकमाख्यातुं बाह्येन्द्रियदशकं तावदाह। बु
द्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि। वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः॥२६॥ सात्त्विकाहंकारोपा
द्वि दानत्वमिन्द्रियत्वं। तच्च द्विविधं बुद्धीन्द्रियं कर्मेन्द्रियं च। उभयमप्येतदिन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते। तानि च स्वसं १८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्राभिश्चक्षुरिरादिभिरुक्तानि। तत्र रूपग्रहणलिंगं चक्षुः शब्दग्रहणलिंगं श्रोत्रं गंधग्रहणलिंगं घ्राणं रसग्रहणलिंगं
रसनं स्पर्शग्रहणलिंगं त्वक् वागादीनां कार्य्यं वक्ष्यति। एकादशकमिंद्रियमाह। उभयात्मकमत्र मनः संकल्पकमिंद्रियं
च साधर्म्यात्। गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥२७॥ एकादशस्विंद्रियेषु मध्ये मन उभयात्मकं बुद्धींद्रियं कर्मे
न्द्रियं च। चक्षुरादीनां वागादीनां च मनोधिष्ठितानां स्वविषयेषु प्रवृत्तेः। तदसाधारणेन रूपेण लक्षयति। संकल्पकमत्र मनः
। संकल्पेन रूपेण मनो लक्ष्यते। आलोचितमिंद्रियेण वस्त्विदमिति संमुग्धमिदमेवं नैवमिति सम्यक्कल्पयति नियम्यस्पर्शय
ति। विशेषणविशेष्यभावेन विवेचयतीति यावत्। यदाहुः। संमुग्धवस्तुमात्रं तु प्राग्गृह्णत्यविकल्पितं। तत्सामान्यविशेषाभ्यां क
ल्पयंति मनीषिणः। तथा हि। अस्ति ह्यालोचितज्ञानं प्रथमं निर्विकल्पकं। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं। ततः परं पुन
र्वस्तुधर्मैर्जात्यादिभिर्यया। बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमतेति। सोयं संकल्पलक्षणो व्यापारो मनसः समानास
मानजातीयाभ्यां व्यवच्छिंदन्मनो लक्षयति। स्यादेतत्। असाधारणव्यापारयोगिनो यथा महदहंकारौ नेंद्रियं एवं मनोप्य
साधारणव्यापारयोगि नेंद्रियं भवितुमर्हतीत्यत आह। इंद्रियं च। कुतः साधर्म्यात्। इंद्रियांतरैः सात्विकाहंकारोपादानत्वं
च साधर्म्यं न त्विंद्रलिंगत्वं। महत्तत्वादीनामपि आत्मलिंगत्वेनेंद्रियत्वप्रसंगात्। तस्माद्व्युत्पत्तिमात्रमिंद्रलिंगत्वं न तु प्रवृ
त्तिनिमित्तं। अथ कथं सात्विकादहंकारादेकस्मादेकादशेंद्रियाणीत्यत आह। गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च
। शब्दाद्युपभोगसंप्रवर्त्तकादृष्टसहकारिभेदात्कार्य्यभेदः। अदृष्टभेदोपि गुणपरिणाम एव वा ह्यभेदाश्चेति दृष्टांतार्थं। यथा

वाग्भेदास्तथैतदपीत्यर्थः। तदेवमेकादशेन्द्रियाणि स्वरूपत उक्त्वा दशानामसाधारणीर्वृत्तीराह। शब्दादिषु पंचानामालोचनमा
त्रमिष्यते वृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पंचानां।।२८।। बुद्धीन्द्रियाणां संमुग्धवस्तुमात्रदर्शनं चालोचनमुक्तम्।
वचनादानविहरणोत्सर्गानन्दाश्च पंचानां कर्मेन्द्रियाणां कंठताल्वादिस्थानमिन्द्रियं वाक्। तस्याः वृत्तिर्वचनं स्पष्टमन्यत्। अ
न्तःकरणत्रयस्य वृत्तिमाह।।२८।। स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या। सामान्यकरणवृत्तिः प्राणाद्या वायवः प
च।।२९।। स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि। महदहंकारमनांसि। तेषां भावः स्वालक्षण्यं तच्च स्वानि लक्ष
णान्येव। तद्यथा। महतोध्यवसायः। अहंकारस्याभिमानः। संकल्पो मनसो वृत्तिर्व्यापारः। वृत्तिद्वैविध्यमसाधारणत्वासा
धारणत्वाभ्यामाह। सैषा भवत्यसामान्या असाधारणी। सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच। सामान्या चासौ करण
वृत्तिश्चेति त्रयाणामपि करणानां पंच वायवो जीवनं वृत्तिः। तद्भावे भावात् तदभावे चाभावात्। तत्र प्राणो नासाग्रहृन्नाभिपा
दांगुष्ठवृत्तिः। अपानः कृकाटिकापृष्ठपार्श्वपायूपस्थवृत्तिः। समानो हृन्नाभिसर्वसंधिवृत्तिः। उदानो हृत्कंठतालुभ्रूम
ध्यमूर्द्धवृत्तिः। व्यानस्त्वग्वृत्तिरिति पंच वायवः। चतुर्विधकरणस्य असाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रकारावाह। यु
गपच्चतुष्टयस्य वृत्तिः क्रमशश्च तस्य निर्दिष्टा। दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः।।३०।। दृष्टे यथा। यदा भूय
रसंतमसांधकारे विद्युत्संपातमात्राद्व्याघ्रमभिमुखमतिसन्निहितं पश्यति तदा खल्वस्यालोचनसंकल्पाभिमाना
ध्यवसायाः युगपदेव प्रादुर्भवंति। यतस्तत उत्प्लुत्य तत्स्थानादेकपदे पसरति। क्रमशश्च। यदा मंदालोके प्रथमं ता १९

वद्वस्तुमात्रं संमुग्धमालोचयति। अथ प्रणिहितमनाः कर्णांताकृष्टशरः कुंचितपादः सिंजितज्यामंडलीकृतको
दंडः प्रचंडतरः पाटच्चरोयमिति निश्चिनोति। अथ च मां प्रत्येतीत्यभिमन्यते अथाध्यवस्यत्यपसराम्यतः स्था
नादिति। परोक्षे तु अंतःकरणत्रयस्य बाह्येंद्रियवर्जं वृत्तिरित्याह। अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः अंतःकरणत्र
यस्य युगपत्क्रमेण च वृत्तिर्दृष्टपूर्विकैव। अनुमानागमस्मृतयो हि परोक्षेर्थे दर्शनपूर्वाः प्रवर्त्तंते नान्यथा य
था दृष्टे तथाऽदृष्टेपीति योजना। स्यादेतत् चतुर्णां त्रयाणां वा वृत्तयो न तावन्मात्राधीनाः तेषां सदातनत्वे
नवृत्तीनां सदोत्पादप्रसंगात्। आकस्मिकत्वे तु वृत्तिसंकरप्रसंगः नियमहेतोरभावादित्यत आह। स्वां स्वां
प्रतिपद्यंते परस्पराकूतहेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं॥३१॥ करणानीति शेषः
।यथा हि बहवः पुरुषाः शाक्तीकयाष्टीकधानुष्ककार्प्पाणिकाः कृतसंकेताः परावस्कंदनाय प्रवृत्ताः। तत्रान्य
तमस्याकूतमवगम्यान्यतमः प्रवर्त्तते। प्रवर्त्तमानश्च शाक्तीकः शक्तिमेवादत्ते न यष्ट्यादिकं। एवं याष्टीकोपि
यष्टिमेव न शक्त्यादिकं। तथान्यतमस्य करणस्याकूतात् स्वकार्य्य करणाभिमुखादन्यतमकरणं प्रवर्त्तते। त
त्प्रवृत्तेश्च हेतुमत्त्वान्न वृत्तिसंकरप्रसंगः। इत्युक्तं स्वां स्वां प्रतिपद्यंत इति। स्यादेतत् याष्टीकादयश्चेतनत्वात्प
रस्याकूतमवगम्य प्रवर्त्तंत इति युक्तं करणानि त्वचेतनानि तस्मान्नैवं प्रवर्त्तितुमर्हंति। तेनैषामधिष्ठात्रा
करणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन भवितव्यमित्यत आह। पुरुषार्थ एव हेतुर्न केनचित्कार्य्यते कर

सा०त०कौ० णाम्। भोगापवर्गलक्षणः पुरुषार्थ एवानागतावस्थः प्रवृत्तिमति कारणानि कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा। एतच्च
२० वत्स विवृद्धि निमित्तमिति सत्रोपपादयिष्यते। न केनचित्कार्यते करणमिति तत्र करणं विभजते। करणं त्रयोदश
विधं तदाहरणधारणप्रकाशकरं। कार्यं च तस्य दशधाहार्यं धार्यं प्रकाश्यं च॥३२॥ करणं त्रयोदशविधमि
न्द्रियाण्येकादश बुद्धिरहंकारश्चेति त्रयोदशप्रकारं करणं। कारकविशेषः करणं न च व्यापारावेशं विना कारक
त्वमिति व्यापारमाह। तदिति। यथायथं तत्र कर्मेन्द्रियाणि वागादीन्याहरन्ति। यथास्वमुपाददते। स्वव्यापारेण
व्याप्नुवन्तीति यावत्। बुद्ध्यहंकारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति बुद्धीन्द्रियाणि प्रकाशयन्ति। आह
क रणादि क्रियाणां सकर्मकतया किं कर्मेति विधं चेत्यत आह। कार्यं च तस्य त्रयोदशविधस्य करणस्य दशधाहा
र्यं धार्यं प्रकाश्यं च। आहार्यं व्याप्यं कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दाः। यथास्वं व्याप्याः ते च यथा
दशा यथं दिव्यादिव्यतया दशेत्याहार्यं दशधा। एवं धार्यमप्यन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरं तच्च पार्थि
वादि पाञ्चभौतिकं शब्दादीनां च पञ्चानां समूहः पृथिवीति ते च पञ्च दिव्यादिव्यतया दशेति घ~~का~~ धार्यमपि द
शधा। एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धाः यथायथं व्याप्याः। ते च यथायथं दिव्यादिव्यतया दशेति प्र
काश्यमपि दशधेति। त्रयोदशविधकरणेऽवान्तरविभागं करोति। अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषया
ख्यं। साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणं॥३३॥ अन्तःकरणं त्रिविधं ~~दशधा बाह्यं~~ बुद्धिरहंकारो मन इति। श २०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रीराभ्यंतरवर्त्तित्वादंतःकरणं। दशधा बाह्यमिंद्रियं। त्रयस्यांतःकरणस्य विषयाख्यं। विषयमाख्याति विषयसंकल्पा
भिमानाध्यवसायेषु कर्त्तव्येषु द्वारी भवति। तत्र बुद्धींद्रियाण्यालोचनेन कर्मेंद्रियाणि तु यथास्वव्यापारेण। बाह्यांत
रयोः करणयोर्विशेषांतरमाह। सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं। सांप्रतकालं वर्त्तमानकालं बाह्यमिंद्रि
यं। वर्त्तमानसमीपमनागतमतीतमपि वर्त्तमानं। अतो वागपि वर्त्तमानकालविषया भवति। त्रिकालमाभ्यंतरं कर
णं। तद्यथा नदीपूरभेदादभूद्वृष्टिः। अस्ति धूमादग्निरिह नगनिकुंजे। असत्युपघातके पिपीलिकांडसंचरणाद्भ
विष्यंती वृष्टिरिति तदनुरूपाश्च संकल्पाभिमानाध्यवसाया भवंति। कालश्च वैशेषिकाभिमत एको नाऽनाग
तादिव्यवहारभेदं प्रवर्त्तयितुमर्हति। तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रतिपद्यते संतु त एवोपाधयोऽना
गतादिव्यवहारहेतवः कृतमत्रांतर्गडुकालेनेति सांख्याचार्याः। तस्मान्न कालरूपतत्वांतराभ्युपगम इति। सांप्र
तकालानां बाह्येंद्रियाणां विषयं विवेचयति। बुद्धींद्रियाणि तेषां पंच विशेषाविशेषविषयाणि। वाग्भवति शब्द
विषया शेषाणि तु पंच विषयाणि॥३४॥ बुद्धींद्रियाणि तेषां दशानामिंद्रियाणां मध्ये पंच विशेषाविशेषविषयाणि। वि
शेषाः स्थूलाः शब्दादयः शांतघोरमूढाः पृथिव्यादिरूपाः। अविशेषास्तन्मात्राणि सूक्ष्माः शब्दादयः। मात्रग्रहणेन
स्थूलभूतभावमपाकरोति। विशेषाश्चाविशेषाश्च विशेषाविशेषास्त एव विषया येषां बुद्धींद्रियाणां तानि त
थोक्तानि। तत्रोर्द्ध्वस्रोतसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दविषयं च। अस्मदादीनां तु स्थूलशब्दविषय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमेव। एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया अस्मदादीनां तु स्थूलस्पर्शविषयैव। एवं चक्षुरादयोऽपि तेषामस्मदादी-
नां च रूपादिषु स्थूलसूक्ष्मेषु द्रष्टव्याः। एवं कर्मेंद्रियेषु मध्ये वागभवति शब्दविषया स्थूलशब्दविषया तद्धेतुत्वात्। नतु
शब्दतन्मात्रस्य हेतुस्तस्याहंकारिकत्वेन वागिंद्रियेण सहैककारणत्वात्। शेषाणि तु चत्वारि पाणिपादपायूपस्थाख्या-
नि पंचविषयाणि। पाण्याद्याहार्याणां घटादीनां पंचशब्दाद्यात्मकत्वादिति। सांप्रतं त्रयोदशसु करणेषु केषांचिद्गुण-
भावं केषांचित्प्रधानभावं सहेतुकमाह। सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्। तस्मात्त्रिविधं करणं द्वारि द्वा-
राणि शेषाणि॥३५॥ द्वारि प्रधानं। शेषाणि करणानि बाह्येंद्रियाणि द्वाराणि। तैरुपनीतं सर्वं विषयं समनोहंकारा बुद्धि-
र्यस्मादवगाहतेऽध्यवस्यति। तस्माद्बाह्येंद्रियाणि द्वाराणि। द्वारवती च सांतःकरणा बुद्धिरिति। न केवलं बाह्येंद्रियाण्य-
पेक्ष्य प्रधानं बुद्धिरपि तु मेषाहंकारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह। एते प्रदीपकल्पाः परस्पर-
विलक्षणा गुणविशेषाः। कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति॥३६॥ यथा हि ग्रामाध्यक्षः कौटुंबिकेभ्यः करमा-
दाय विषयाध्यक्षाय प्रयच्छति विषयाध्यक्षश्च सर्वाध्यक्षाय स च भूपतये। तथा बाह्येंद्रियाण्यालोच्य मनसे समर्पयं-
ति। मनश्च संकल्प्याहंकाराय। अहंकारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायां तदिदमुक्तं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्र-
यच्छंतीति। बाह्येंद्रियमनोहंकाराश्च गुणविशेषाः गुणानां सत्वरजस्तमसां विकाराः। ते तु परस्परविरोधशीला अपि
पुरुषार्थेन भोगापवर्गरूपेणैकवाक्यतां नीताः यथा वर्त्तितैलवन्हयः संतमसापनयेन रूपप्रकाशाय मिलिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रदीपेएवमेतेगुणविशेषा इतियोजना। कस्मात्पुनर्बुद्धौप्रयछंतिनतुबुद्धिरहंकारायद्वारिणेमनसेवेसतआह। सर्वंप्रत्यु
पभोगंयस्मात्पुरुषस्यसाधयतिबुद्धिः॥ सैवचविशिनष्टिपुनः प्रधानपुरुषांतरं सूक्ष्मं॥३७॥ पुरुषार्थस्यप्रयोजकू
त्वात्तस्यपत्साक्षात्साधनंतत्प्रधानं। बुद्धिश्चास्यसाक्षात्साधनंतस्मात्सैवप्रधानं। यथा। सर्वाध्यक्षः साक्षाद्राजार्थ
साधनतयाप्रधानं। इतरेतुग्रामाध्यक्षादयस्तत्प्रतिगुणभूताः। बुद्धिर्हिपुरुषसान्निधानात्तच्छायापत्त्यातद्रूपेवसर्वं
विषयोपभोगंपुरुषस्यसाधयति। सुखदुःखानुभवोभोगः। सचबुद्धौ। बुद्धिश्चपुरुषरूपेवेतिपुरुषमुपभोजय
ति। यथाअर्थालोचनसंकल्पाभिमानाश्चतत्तद्रूपपरिणामेनबुद्धावुपसंक्रांताः। तथाइंद्रियादिव्यापाराअपिबुद्धेरेव
स्वव्यापारेणाध्यवसायेनसहव्यापारीभवंति। यथोस्वसैन्येनसहग्रामाध्यक्षादिसैन्यंसर्वाध्यक्षस्यभवति। सर्वंश
ब्दादिकंप्रतियउपभोगः पुरुषस्यतंसाधयति। पश्चात्प्रधानपुरुषयोरंतरंविशेषंविशिनष्टिकरोतिननुप्रधा
नपुरुषयोरंतरस्यकृतकत्वादनित्यत्वंतत्कृतकस्यमोक्षस्यस्यादित्यतआह। विशिनष्टि प्रधानंसविकारमन्यदह
मन्यइतिविद्यमानमेवांतरमविवेकेनाविवेकेनाविद्यमानमिवबुद्धिर्बोधयतिनतुकरोतियेनानित्यत्वमित्यर्थः। य
थौदनपाकंपचतीति। करणंचप्रतिपादनमनेनापवर्गः पुरुषार्थोदर्शितः। सूक्ष्ममितिदुर्लक्षंतदंतरं। तदेवकरणा
निविभज्यविशेषाविशेषान्विभजते। तन्मात्राण्यविशेषास्तेभ्योभूतानिपंचपंचभ्यः। एतेस्मृताविशेषाःशांता
घोराश्चमूढाश्च॥३८॥ शब्दादितन्मात्राणिसूक्ष्माणिअविशेषाः नचैषांशांतादिरूपैरुपभोगयोग्योविशेषइतिमा

त्रशब्दार्थः।अविशेषानुक्त्वा विशेषान्वक्तुमुपसन्ति सेषामाह। तेभ्यस्तन्मात्रेभ्यो यथासंख्यमेकद्वित्रिचतुःपंचभ्यो भूता
न्याकाशानिलानलसलिलावनिरूपाणि पंच। पंचतन्मात्रेभ्यो भवंति। अस्त्वेषां भूतानामुत्पत्तिर्विशेषेषु किमायात
मित्यत आह। एते स्मृता विशेषाः। कुतः शांता घोराश्च मूढाश्च। च एको हेतौ। द्वितीयः समुच्चये। यस्मादाकाशादिषु स्थू
लेषु सत्वप्रधानतया केचिच्छांताः। सुखाः प्रसन्नाः लघवः। केचिद्रजःप्रधानतया घोरा दुःखा अनवस्थिताः। केचि
त्तमःप्रधानतया मूढाः विषणाः गुरवः। तेऽमी परस्परव्यावृत्ताः अनुभूयमाना विशेषा इति स्थूला इति चोच्यंते तन्मा
त्राणि त्वस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्ते इति अविशेषा इति सूक्ष्मा इति चोच्यंते ~~तन्मात्राण्यपि~~ विशेषाणा
मवांतरविशेषमाह। सूक्ष्मा मातापितृजाः सहप्रभूतैस्त्रिधा विशेषाः स्युः। सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्त
न्ते।।३९॥ त्रिधा विशेषाः स्युः। तान्विशेषप्रकारानाह। सूक्ष्माः सूक्ष्मदेहाः मातापितृजाः षाट्कौशिकाः। तत्र मातृतो लो
मलोहितमांसानि। पितृतश्च स्नाय्वस्थिमज्जान इति षट्कोशाः। प्रकृष्टानि महान्ति भूतानि तैः सह सूक्ष्मशरीरमेको वि
शेषः। मातापितृजो द्वितीयः। महाभूतानि तृतीयः। महाभूतसर्गे च घटादीनां निवेश इति। सूक्ष्ममातापितृजयोर्देहयो
र्विशेषमाह। सूक्ष्मास्तेषां विशेषाणां मध्ये ये ते नियताः मातापितृजा निवर्तंते। रसांता वा भस्मांता वा विडंता वेति। सूक्ष्मं
शरीरं विभजते। पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यंतं। संसरति निरुपभोगं भावैरधिवासितं लिंगं।।४०।। पूर्वो
त्पन्नं प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितं। असक्तं अव्याहतं शिलामप्यनुविशति। नियतमाचादिसर्गादा

चमहाप्रलयात् अवतिष्ठते महदादि सूक्ष्मपर्यंतं। महदहंकारैकादशेंद्रियपंचतन्मात्रपर्यंतं एषां समुदायः सूक्ष्मश
रीरं शांतघोरमूढैरिंद्रियैरन्वितत्वाद्विशेषः। नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्यकृतं दृश्यमानेन षाट्कौशिकेन
शरीरेणेत्यत आह। संसरतीति। उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति। हायंहायं चोपादत्ते। कस्मात् निरुपभोगं। य
तः षाट्कौशिकं शरीरं भोगायतनं विना सूक्ष्मशरीरं निरुपभोगं यस्मात्तस्मात् सूक्ष्मशरीरं संसरति। ननु धर्माधर्मनिमित्तः
संसारो नच सूक्ष्मशरीरस्यास्ति तद्योगः तत्कथं संसरतीत्यत आह। भावैरधिवासितं। धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यै
श्वर्याणि भावाः तदन्विता बुद्धिस्तदन्वितं च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं। यथा सुरभिचंपककुसुमसंपर्काद्वस्त्र
तदामोदवासितं भवति। तस्माद्भावैरधिवासितत्वात् संसरति। कस्मात्पुनः प्रधानमिव महाप्रलयेपि तच्छरीरं नातिष्ठतीत्य
त आह। लिंगं। लयं गच्छतीति लिंगं हेतुमत्त्वेन चास्य लिंगत्वमिति भावः। स्यादेतत् बुद्धिरेव साहंकारेंद्रिया कस्मान्न संस
रति किं तत् सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह। चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषै
र्न तिष्ठति निराश्रयं लिंगं॥४१॥ लिंगनात् ज्ञापनात् बुद्ध्यादयो लिंगं। तदनाश्रयं न तिष्ठति। जन्मप्रायणांतराले बुद्ध्यादयः
प्रत्युत्पन्नशरीराश्रयाः। प्रत्युत्पन्नपंचतन्मात्रत्वे सति बुद्ध्यादित्वात्। दृश्यमानशरीरवृत्ति बुद्ध्यादिवत्। विना विशेषै
रिति सूक्ष्मैः शरीरैरित्यर्थः। आगमश्चात्र भवति। ततः सत्यवतः कायात्पाशबद्धं वशंगतं। अंगुष्ठमात्रं पुरुषं निश्च
कर्ष बलाद्यमः इति। अंगुष्ठमात्रत्वेन सूक्ष्मत्वमुपलक्षयति। आत्मनो निःकर्षासंभवात् सूक्ष्ममेव शरीरं पुरुषः। तदपि हि पु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिस्थूले शरीरे शेते। एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमाह। पुरुषार्थहेतुकमिदं निमित्त
नैमित्तिकसं[redacted]गेन॥ प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं॥४२॥ पुरुषार्थेन हेतुना प्रयुक्तं। निमित्तं धर्माधर्मादि
नैमित्तिकं तेषु तेषु निकायेषु षाट्कौशिकशरीरग्रहः स हि धर्म्मादिनिमित्तप्रभवः। निमित्तं च नैमित्तिकं च तत्तयोः प्र
संगः प्रसक्तिस्तया नटवद्व्यवतिष्ठते लिंगं सूक्ष्मशरीरं। यथा हि नटस्तां तां भूमिकां विधाय परशुरामो वाऽजातश
त्रुर्वा वत्सराजो वा भवत्येवं तत्तत्स्थूलशरीरग्रहणाद्देवो वा मनुष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरमित्यर्थः।
कुतस्त्यः पुनरीदृशोऽस्य महिमेत्यत आह। प्रकृतेर्विभुत्वयोगात्। तथा च पुराणं। वैश्वरूप्यात्प्रधानस्य परिणामोऽय
मद्भुत इति। निमित्तनैमित्तिकप्रसंगेनेत्युक्तं तत्र निमित्तनैमित्तिके विभजते। सांसिद्धिकाश्च भावाः प्राकृतिका वैकृ
ताश्च धर्म्माद्याः। दृष्टाः करणाश्रयिणः कार्य्याश्रयिणश्च कललाद्याः॥४३॥ वैकृतिका नैमित्तिकाः। प्राकृतिकाः स्वा
भाविका भावाः सांसिद्धिकाः। तथा हि सर्गादावादिविद्वानत्र भगवान्कपिलो महामुनिर्धर्मज्ञानवैराग्यैश्वर्य्यसंप
न्नः प्रादुर्बभूव इति स्मरंति। वैकृताश्च भावा असांसिद्धिका ये उपायानुष्ठानेनोत्पन्नाः यथा प्राचेतसप्रभृतीनां मह
र्षीणां। एवमधर्माज्ञानावैराग्यानैश्वर्य्याण्यपि। कार्य्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेश्यंडशि तु
रोवाकृघ्राद्यंगप्रत्यंगव्यूहाः गर्भस्थस्य। ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति। अवगतानि नि
मित्तनैमित्तिकानि कतमत्कस्य तु निमित्तस्य कतमन्नैमित्तिकमित्यत आह। धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भव २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सधर्म्मेण। ज्ञानेनचापवर्गो विपर्ययाद्दिष्यते बंधः॥४४॥ धर्म्मेण गमनमूर्द्धद्युप्रभृतिषु गमनमधस्ताद्भवसधर्म्मेण सुत
लादिषु॥ ज्ञानेनचापवर्गः तावदेवप्रकृतिर्भोगमारभते न यावद्विवेकख्यातिं करोति। अथ विवेकख्यातौ सत्यां कृ
तकृत्यतया विवेकख्यातिमंतं पुरुषं प्रति को दाक्षिणश्चे निवर्त्तते। यदाहुः। विवेकख्यातिपर्यंतं ज्ञेयं प्रकृतिचे
ष्टितमिति। विपर्ययादतत्त्वज्ञानाद्दिष्यते बंधः सच त्रिविधः। प्राकृतिको वैकृतिको दाक्षिणश्चेति। तत्रप्रकृतावात्मज्ञा
नात्ये प्रकृतिमुपासते तेषां प्राकृतो बंधः। यथा वायुपुराणे। प्रकृतिलयास्तु उच्यते। पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतका
इति। वैकारिको बंधस्तेषां ये विकारानेव भूतेंद्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तान्प्रति इदमुच्यते। दश मन्वंतराणी
ह तिष्ठंतींद्रियचिंतकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः। बौद्धा दशसहस्राणि तिष्ठंति विगतज्वराः। तेख
ल्वमी विदेहा येषां वैकृतिको बंध इति। इष्टापूर्त्तेन दाक्षिणः पुरुषतत्त्वानभिज्ञो हि इष्टापूर्त्तकारी कामोपहतमना
बध्यत इति॥४४॥ वैराग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयः। प्रकृतिग्रहणेन प्रकृति
महदहंकारभूतेंद्रियाणि गृह्यंते। तेष्वात्मबुद्ध्या उपास्यमानेषु लयः। संसारो भवति राजसाद्रागात्। राजसादिसने
नरजसो दुःखहेतुत्वात्संसारस्य दुःखता सूचिता। ऐश्वर्यादविघातः इच्छायाः। ईश्वरो हि यदिच्छति तत्करोति। विपर्य
यादनैश्वर्यात्तद्विपर्यासः सर्वत्रेच्छाविघात इत्यर्थः॥४५॥ बुद्धिधर्मान् धर्म्मादीनष्टौ भावान्समासव्यासाभ्यां मुमु
क्षूणां हेयोपादेयान् दर्शयितुं प्रथमं तावत्समासमाह। एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः। गुणवैषम्यवि

मर्द्दात्तस्य च भेदास्तु पंचाशत्॥४६॥ एष इति प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्य सर्गः तत्र विपर्ययोऽज्ञानमविद्या सा बु
द्धिधर्म्मः। अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म एव। तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावेव। तत्र विपर्ययाशक्ति
तुष्टिषु यथायोगं सप्तानां धर्म्मादीनां ज्ञानवर्जमंतर्भावः। सिद्धौ च ज्ञानस्येति। व्यासमाह। तस्य च भेदास्तु पंचाशत्। कस्मात् गु
णवैषम्यविमर्द्दात्। गुणानां वैषम्यं एकैकस्याधिकबलता। द्वयोर्द्वयोर्वा। एकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा। तेच न्यूनाधि
क्ये मंदमध्याधिकमात्रतया यथाकार्यमुन्नीयेते। तदिदं गुणानां वैषम्यं। तेनोपमर्दः। एकैकस्य न्यूनबलस्य द्वयोर्द्वयोर्वा
भिभवः। तस्मात्तस्य भेदाः पंचाशदिति॥४६॥ तानेव पंचाशद्भेदान् गणयति। पंच विपर्ययभेदा भवंत्यशक्तिश्च करणवैक
ल्यात्। अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः॥४७॥ अविद्यास्मितारागद्वेषाभिनिवेशाः यथासंख्यं तमो मोहमहा
मोहतामिस्राधतामिस्रसंज्ञकाः पंच विपर्ययविशेषाः। विपर्ययप्रभवाणामप्यस्मितादीनां विपर्ययस्वभावत्वात्। यद्वा य
द्विषया विपर्ययेणावधार्यंते वस्तु अस्मितादयस्तत्स्वभावाः संतस्तदभिनिविशते। अतएव पंचपर्वा अविद्येत्याह वार्ष
गण्यः॥४७॥ संप्रति पंचानां विपर्ययभेदानामवांतरभेदमाह। भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः। तामि
स्रोऽष्टादशधा तथा भवत्यंधतामिस्रः॥४८॥ भेदस्तमसोऽविद्याया ऽष्टविधः। अष्टस्वव्यक्तमहदहंकारपंचतन्मात्रेष्वना
त्मस्वात्मबुद्धिरविद्या तमः। अष्टविधविषयत्वात्तस्याष्टविधत्वं। मोहस्य च। अत्राप्यष्टविधो भेद इति चेनानुषज्यते। देवा
स्त्वष्टविधमैश्वर्यमासाद्यामृतत्वाभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकमभिमन्यंते इति सोयमस्मितामोहोऽष्ट २४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विधेश्वर्य्यविषयत्वादष्टविधः।दशविधोमहामोहः।शब्दादिषुपंचसुदिव्यादिग्नतयादशविधेषुरंजनीयेषुरागआसक्ति
र्महामोहः।सचदशविधविषयत्वाद्दशविधः।तामिस्रोद्वेषोऽष्टादशधा।शब्दादयोदशविषयारंजनीयाःस्वरूपतः।ऐश्वर्यं
त्वणिमादिकंनस्वरूपतोरंजनीयंकिंतुरंजनीयशब्दाद्युपायः।तेचशब्दादयउपस्थिताःपरस्परेणोपहन्यमानास्तदुपाय
भूताश्चाणिमादयःस्वरूपेणैवकोपनीयाभवंतीतिशब्दादिभिर्दशभिःसहाणिमाद्यष्टकमष्टादशधेतितद्विषयोद्वेष
स्तामिस्रोऽष्टादशविषयत्वादष्टादशधेति।तथाभवत्यंधतामिस्रः।अभिनिवेशस्त्रासःसोंधतामिस्रः।तथैवसनेनाष्टा
दशधेत्यनुषज्यते।देवाःखल्वणिमादिकमष्टविधमैश्वर्यमासाद्यदशशब्दादीन्भुंजानाःशब्दादयोभोग्यास्तदुपायाश्चाणि
मादयोऽस्माकमसुरादिभिर्मोपघातिषतेतिबिभ्यति।तदिदंभयमभिनिवेशोंधतामिस्रोऽष्टादशविषयत्वात्अष्टाद
धवं शाधेति।सोयंपंचविधोविकल्पोविपर्ययोऽवांतरभेदात्द्वाषष्टिरिति॥४८॥तदेवंपंचविपर्ययभेदानुक्त्वाऽष्टाविंश
तिभेदामशक्तिमाह।एकादशेंद्रियवधाःसहबुद्धिवधैरशक्तिरुद्दिष्टाः।सप्तदशवधाश्चबुद्धेर्विपर्ययात्तुष्टिसि
द्धीनां॥४९॥एकादशेंद्रियवधाः।बाधिर्यंकुष्टितांधत्वंजडताजिघ्रतातथा।मूकताकौण्यपंगुत्वक्लैब्योदावर्त्तमंदताः
।यथासंख्यंश्रोत्रादीनामिंद्रियाणांवधाः।एतावत्येवतद्धेतुकाबुद्धेरशक्तिःस्वव्यापारेभवति।तथाचैकादशहेतुक
त्वादेकादशधाबुद्धेरशक्तिरुच्यते।हेतुहेतुमतोरभेदविवक्षयाचसामानाधिकरण्यं।तदेवमिंद्रियवधद्वारेणबुद्धेरशक्ति
मुक्त्वास्वरूपतोऽशक्तीराह।सहबुद्धिवधैरिति।कतिबुद्धेःस्वरूपतोवधाइत्यतआह।सप्तदशवधाबुद्धेः।कुतःपविर्यया

तुष्टिसिद्धीनां।तुष्टयो नवधेति।तद्विपर्ययास्तन्निरूपणा नवधा भवंति।एवं सिद्धयोष्टाविति।तद्विपर्ययास्तन्निरू
पणादष्टौ भवतीति।तुष्टिर्नवधेत्युक्ताः परिगणयति आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः
वाह्या विषयोपरमात्पंच नव च तुष्टयोऽभिमतः॥५०॥तत्राध्यात्मिकाः प्रकृतिव्यतिरिक्तआत्मास्तीति प्रतिपद्य
ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय नलसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिकास्तुष्ट
यो भवंति।प्रकृतिव्यतिरिक्तं आत्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिकाः।कास्ता इत्यत आह।प्रकृत्यु
पादानकालभाग्याख्याः।प्रकृत्यादिराख्या यासां तास्तथोक्ताः।तत्र प्रकृत्याख्या तुष्टिर्यथा।कस्यचिदुपदेशो
विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदस्तं च प्रकृतिरेव करोतीति।कृतं ते ध्यानाभ्यासेन।तस्मादेवमेवास्तु व
त्सेति।सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या अंभ उच्यते।यातु प्राकृत्यपि विवेकख्यातिर्न सा प्रकृ
तिमात्राद्भवति।माभूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान्प्रत्यविशेषात्।प्रव्रज्याया स्तु सा भवति।तस्मात्प्रव्रज्यामुपाददी
थाः कृतं ते ध्यानाभ्यासेनायुष्मान्निरयुपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते।यातु प्रव्रज्यापि न सद्यो निर्वाण
देति सैव कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति।अलमुत्तप्ततया तवेत्युपदेशे या तुष्टिः सा कालाख्या ओघ उच्य
ते।यःतु न कालान्नाप्युपादानाद्विवेकख्यातिरपितु भाग्यादेव।अत एव मदालसापत्यान्यतिवालानि मातृरूपदेशमात्रा
देव विवेकख्यातिमंति विमुक्तानि बभूवुः।तद्भाग्यमेव हेतुर्नान्यदित्युपदेशे या तुष्टिः सा भाग्याख्या तुष्टिर्वृष्टिरुच्यते।

वासादर्शयति। वासास्तुष्टमो विषयोपरमा संज्ञा। याश्च खल्वनात्मनः प्रकृतिमहदहंकारादीनात्मेत्यभिमन्यमानस्य वै
राग्ये सति तुष्टयस्ता बाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्ते इति। ताश्च वैराग्ये सति संभवति तुष्टयः इति वै
राग्यहेतूनां पंचत्वाद्वैराग्याण्यपि पंच। तत्सेच तास्तुष्टयः पंचेति। उपरम्यतेऽनेनेत्युपरमो वैराग्यं। विषयादुपरमो वि
षयोपरमः। विषया भोग्याः शब्दादयः पंच उपरमा अपि पंच तथाहि अर्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतु
जन्मान उपरमाः पंच भवंति। तथाहि। सेवादयो धनार्जनोपायास्ते च सेवकादीनां दुःखाकुर्वंति। दृप्यत्दुरीश्वरदा
स्थदंडिचंडार्द्धचंद्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते। एवमन्येष्वर्जनोपायादुःखा इति विषयोपरमे यातु
ष्टिः सा एषा पारमुच्यते। तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्यो विनक्ष्यतीति तद्रक्षणे महद्दुःखमिति
भावयतो विषयोपरमे यातुष्टिः सा द्वितीया सुपारमुच्यते। तथा महता यासेनार्जितं धनं भुज्यमानं क्षीयत इति त
त्र तिक्षयं भावयतो विषयोपरमे यातुष्टिः सा तृतीया पारापारमुच्यते। एवं शब्दादिभोगाभ्यासाद्वर्द्धंते कामा
स्तेच। विषया प्राप्तौ कामिनं दुःखयतीति भोगदोषं भावयतो विषयोपरमे यातुष्टिः सा चतुर्थी अनुत्तमांभ उच्यते।
पवंनानुपहत्य भूतानि विषयोपभोगः संभवतीति हिंसादोषदर्शनाद्विषयोपरमे यातुष्टिः सा पंचमी उत्तमांभ उच्य
ते। एवमाध्यात्मिकाभिश्चतस्रभिर्बाह्याभिश्च पंचभिर्नव तुष्टयोऽभिमताः॥४९॥ गौणमुख्यभेदभिन्ना सिद्धीरा
ह। ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः॥ दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोंकुशस्त्रिविधः॥५०॥ विहन्य

सां०त०कौ० मानस्य दुःखत्रयस्य त्रित्वात्तद्विघातास्त्रय इति। इमा मुख्यास्तिस्रः सिद्धयस्तदुपायतया इतरा गौण्यः पंच सिद्धयस्ता
२६ अपि हेतुहेतुमत्तया व्यवस्थिताः तत्राध्ययनलक्षणा सिद्धिर्हेतुरेव। मुख्यास्तु सिद्धयो हेतुमत्य एव। मध्यमास्तु हेतु
हेतुमत्यः विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते। तत्कार्यं शब्दः
शब्द इति पदं शब्दजनितमर्थज्ञानमुपलक्षयति। कार्ये कारणोपचारात्। सा द्वितीया सिद्धिः सुतारमुच्यते। तदिदं द्विधा श्र
वणं। ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणं। परीक्षणं च संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्था
आग पनं। तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिस्तारतारमुच्यते। सुहृत्प्राप्तिः न्यायेन हि स्वयं परीक्षितमप्यर्थं न श्र
द्धत्ते। न यावद्गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते। अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृ
त्प्राप्तिः सा सिद्धिश्चतुर्थी रम्यकमुच्यते। दानं च शुद्धिर्विवेकज्ञानस्य दैप शोधने इत्यस्माद्धातोर्दानपदव्युत्पत्तेः। यथा
ह अत्र भगवान्पतंजलिः। विवेकख्यातेरविप्लवा दुःखत्रयस्य हानोपाय इति। अविप्लवा शुद्धिः। सा च सवासनसं
कस्रा शयविपर्यासानां परिहाण्या विवेकख्यातेः स्वच्छप्रवाहेऽवस्थानं। सा च न विनादरनैरंतर्य्यदीर्घकालसेविताभ्यास
परिपाकाद्भवतीति दानेन। विवेकख्यातिः कार्येण सोऽपि संगृहीतः। सेयं पंचमी सिद्धिः सदामुदितमुच्यते। तिस्रश्च मु
ख्याः सिद्धयः प्रमोदमुदितमोदमानाः इत्यष्टौ सिद्धयः। अन्ये तु व्याचक्षते। विनोपदेशादिना प्राग्भवीयाभ्यासवशात्तत्त्व
स्य स्वयमूहनं यत् सा सिद्धिरूहः। यस्य सांख्यशास्त्रपाठमन्यदीयमाकर्ण्य तत्त्वज्ञानमुत्पद्यते सा सिद्धिः शब्दः शब्द २६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठादनंतरभावात्। यस्य शिष्याचार्य्यसंवादेन सांख्यशास्त्रं ग्रंथतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते साध्ययनहेतुका सिद्धिः
रध्ययनं। सुहृत्प्राप्तिरिति। यस्याधिगततत्त्वसुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा। सिद्धिस्तस्य सुहृत्प्राप्तिरिति। दा
नं। दानं च। सिद्धिहेतुः धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति। अस्य च मुक्तामुक्तत्वे स्मरिभिरेवावगंतव्ये इति
कृतं परदोषोद्भावनेन नः सिद्धान्तमात्रव्याख्यानप्रवृत्तानामिति। सिद्धितुष्टिविपर्ययेणाशक्तिर्बुद्धिवधः सप्तदश
धा द्रष्टव्यः। अत्र प्रत्ययसर्गे सिद्धिरुपादेयेति प्रसिद्धमेव तन्निवारणहेतवस्तु विपर्ययाशक्तितुष्टयो हेया इत्या
ह। सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः। पूर्व इति विपर्ययाशक्तितुष्टीः परामृशति। ताः सिद्धिकरिणीनामंकुशो निवा
रकत्वात्। अतः सिद्धिपरिपंथित्वादंकुश इवेति विपर्ययाशक्तितुष्टयो हेया इत्यर्थः। स्यादेतत् पुरुषार्थप्रयु
क्ता सृष्टिः स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह। न विना भावैर्लि
गं न विना। लिंगं न विना लिंगेन भावनिर्वृत्तिः। लिंगाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः॥५१॥ लिंगमिति
तन्मात्रसर्गमुपलक्षयति। भावैरिति च प्रत्ययसर्गं। एतदुक्तं भवति। तन्मात्रसर्गस्य पुरुषार्थसाधनत्वं स्वरूपं
च पुरुषार्थसाधनत्वं च न तन्मात्रसर्गादृते इत्युभयसर्गप्रवृत्तिः। भोगः पुरुषार्थो न भोग्यान् शब्दादीन् भोगायत
नं च शरीरद्वयमंतरेण संभवतीत्युपपन्नस्तन्मात्रसर्गः। एवमस्यैव भोगो भोगसाधनानींद्रियाणि चांतःकरणा
नि चांतरेण न संभवंति न च तानि धर्मादीन् भावान् विना संभवंति। न चापवर्गहेतुर्विवेकख्यातिरुभयसर्गं विने

[illegible] उभयविधः सर्गः। अनादित्वाच्च बीजांकुरवदन्योन्याश्रयदोषमावहति। कल्पादावपि प्राचीनकल्पोत्पन्न
भावलिंगसंस्कारवशाद्भावलिंगयोरुत्पत्तिर्नानुपपन्नेति सर्वमवदातं॥५१॥ विभक्तः प्रत्ययसर्गः भूतादिसर्गं विभज
ते। अष्टविकल्पो दैवः सर्गस्तैर्यग्योनिश्च पंचधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः॥५२॥ ब्राह्मप्राजाप
त्यैंद्रपैत्र्यगांधर्वयक्षराक्षसपैशाचा इत्यष्टविधो दैवसर्गः। तैर्यग्योनिश्च पंचधा भवति। पशुमृगपक्षिसरीसृपस्थावराः
मानुष्यश्चैकविधः। ब्राह्मणत्वाद्यवांतरजातिभेदाविवक्षया। संस्थानस्य चतुर्वर्णेष्वप्यविशेषादिति। समासतः संक्षेपतः
भौतिकः सर्गः। घटादयस्त्वशरीरत्वेपि स्थावरा एवेति॥५२॥ भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्या
मूर्द्ध्वाधोमध्यभावेन त्रैविध्यमाह। ऊर्द्ध्वं सत्वविशालस्तमोविशालश्च मूलतः सर्गः॥ मध्ये रजोविशालो ब्रह्मा
दिः स्तंबपर्यंतः॥५३॥ ऊर्द्ध्वं सत्वविशालो द्युप्रभृतिसत्यांतो लोकः सत्वबहुलः। तमोविशालश्च मूलतः सर्गः। पश्वादिः
स्थावरांतः सोयं मोहमयत्वात्तमोबहुलः। भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशो मध्ये रजोविशालो धर्माधर्मानुष्ठानप
रत्वाद्दुःखबहुलत्वाच्च। तामिमां लोकस्थितिं संक्षिपति। ब्रह्मादिस्तंबपर्यंतः स्तंबग्रहणेन वृक्षादयः संगृहीताः॥५३॥
तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखतामाह। तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः
॥लिंगस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन॥५४॥ तत्र शरीरादौ मघपि विविधविचित्रानंदभोगभागिनः प्राणभृद्भे
दास्तथापि सर्वेषां जरामरणकृतं दुःखमविशिष्टं। सर्वस्य खलु कृमेरपि मरणत्रासो मा न भूवं भूयासमित्येवमात्म

कोस्ति। दुःखंच भयहेतुरिति दुःखंमरणं। स्यादेतत् दुःखादयः प्राकृताबुद्धिगुणास्तत्कथमेते चेतनसंबंधिनो भवंती स
तआह। पुरुषइति पुरि लिंगे शेते पुरुषः लिंगं च तत्संबंधी ति चेतनो पि तत्संबंधी भवती त्यर्थः। कुतः पुनर्लिंगसं ब
धि दुःखं पुरुषस्य चेतनस्येत्यत आह। लिंगस्याविनिवृत्तेः। पुरुषात् भेदात् लिंगधर्मानात्मन्येवाध्यवस्यति पुरु
षः अथवा दुःखप्राप्तावधि राउन कथ्यते। लिंगं यावन्न निवर्त्तते तावदिति॥५५॥ उक्तस्य सर्गस्य कारणं विप्रति
पत्तीर्निराकरोति। इत्येषप्रकृतिकृतो महदादि विशेषभूतपर्यंतः। प्रतिपुरुषविमोक्षार्थं स्वार्थइवपरार्थआरंभः।
॥५६॥ आरभ्यत इत्यारंभः सर्गः। प्रकृत्यैव कृतो नेश्वरेण न ब्रह्मोपादानो नाप्यकारणः अकारणत्वे स्यात्सतभावो स
ताभावो वा भवेत्। न ब्रह्मोपादानश्चिति शक्तेरपरिणामात्। नेश्वराधिष्ठितप्रकृतिकृतो निर्व्यापारस्याधिष्ठातृत्वा
संभवात्। नहि निर्व्यापारस्तक्षावास्याद्यधितिष्ठति। ननु प्रकृतिकृतश्चेत्तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमा
त्सदैव सर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आह। प्रतिपुरुषविमोक्षार्थं स्वार्थइवपरार्थआरंभः। यथोदनकाम ओ
दनाय पाके प्रवृत्त ओदनसिद्धौ निवर्त्तत एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयति तं प्रति न पु
नः प्रवर्त्तते। तदिदमाह। स्वार्थ इव स्वार्थे यथा तथा परार्थे आरंभ इत्यर्थः। स्यादेतत् स्वार्थं परार्थं वा चेतनः प्रवर्त्तते न
च प्रकृतिरचेतनैवं भवितुमर्हतीति तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः। न च क्षेत्रज्ञाश्चेतना अपि प्रकृतिमधिष्ठा
तुमर्हंति तेषां प्रकृतिस्वरूपानभिज्ञत्वात्। तस्मादस्ति सर्वार्थदर्शी प्रकृतेरधिष्ठाता स चेश्वर इत्यत आह। वत्सविवृ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा०त०कौ० वृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥५७॥ दृष्टमचेतनमपि प्रयोजनेनूप्रव
२८ र्तमानं। यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्त्तते। एवं प्रकृतिरचेतनापि पुरुषविमोक्षणाय प्रवर्त्तिष्यते। न च क्षीरप्रवृत्तेरपी
श्वराधिष्ठाननिबंधनत्वेन साध्यत्वान्न साध्येन व्यभिचार इति सांप्रतं प्रेक्षावतः प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च
जगत्सर्गाद्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त्तयतः। न ह्यवाप्तसकलेप्सितस्य भगवतो जगत्सृजतः किमप्य
भिलषितं भवति। नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक्सर्गाज्जीवानामिंद्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहा
णेच्छा कारुण्यं। सर्गोत्तरकालं दुःखिनोवलोकयतः कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयं कारुण्येन सृष्टिः सृष्ट्या च कारु
ण्यमिति। अपि च करुणया प्रेरित ईश्वरः सुखिन एव जंतून् सृजेन्न विचित्रान्। कर्मवैचित्र्याद्वैचित्र्यमिति चेत्। कृतम
स्य प्रेक्षावतः कर्माधिष्ठानेन तदनधिष्ठानमात्रादेव अचेतनस्यापि कर्मणः प्रवृत्त्यनुपपत्तेस्तत्कारुण्यं प्रयोजकमिति नो
क्तदोषप्रसंगावतारः परार्थमात्रं तु प्रयोजनमुपपद्यते। तस्मात् सूक्तं वत्सविवृद्धिनिमित्तमिति। स्वार्थ इवेति दृष्टांति
तं तद्विभजते। औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः। पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥५८॥ औत्सु
क्यमिच्छा सा खल्विष्यमाणप्राप्तौ निवर्त्तते। इष्यमाणश्च स्वार्थः। इष्टलक्षणत्वात्फलस्य दार्ष्टांतिके योजयति पुरु
षस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं॥५८॥ ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्त्तको निवृत्तिस्तु कुतस्त्या प्रकृतेरित्यत आ
ह। रंगस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात्। पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥५९॥ रंगस्येति स्या २८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनस्थानिनःपारिषदानुपलक्षयति।आत्मानंशब्दाद्यात्मनापुरुषाद्भेदेनचप्रकाश्येत्यर्थः।स्यादेतत्प्रवर्त्ततांप्रकृतिःपु
रुषार्थंपुरुषात्तुपकृतात्प्रकृतिर्लभ्यतेकंचिदुपकारं।आज्ञासंपादनाराधितादिवाऽराधयितुर्भुजिष्य।तथाचनपरार्थो
स्याआरंभइत्यतआह॥नानाविधैरुपायैरुपकारिण्यनुपकारिणःपुंसः।गुणवत्यगुणस्यसतस्तस्यार्थमपार्थकंचरति
॥६०॥यथागुणवानप्युपकार्यपिभृत्योनिर्गुणेऽतएवानुपकारिणिस्वामिनिनिःफलाराधनःएवमियंप्रकृतिस्तपस्वि
नीगुणवत्युपकारिण्यप्यनुपकारिणिनिर्गुणेऽपिपुरुषेव्यर्थपरिश्रमेतिपुरुषार्थमेवयततेननस्वार्थमितिसिद्धं।स्यादेत
त्नर्त्तकीनृत्यंपरिषद्भ्योदर्शयित्वानिवृत्तापिपुनस्तद्दृष्टकौतुहलात्प्रवर्त्ततेयथा।तथाप्रकृतिरपिपुरुषायात्मानंदर्श
यित्वानिवृत्तापिपुनःप्रवर्त्स्यतीत्यतआह।प्रकृतेःसुकुमारतरंनकिंचिदस्तीतिमेमतिर्भवति।यादृष्टास्मीतिपुनर्न
दर्शनमुपैतिपुरुषस्य॥६१॥सुकुमारतरंताऽतिपेशलतापरपुरुषदर्शनासहेतियावत्।असूर्यंपश्याहिकुलवधू
रतिमन्दाक्षमन्थराप्रमादाद्विगलितसिचयांचलाचेदालोक्यतेपरपुरुषेणतदासौतथाप्रवर्त्ततेऽप्रमत्तायथैनां
पुरुषान्तराणिनपुनःपश्यंतीतिएवंप्रकृतिरपिकुलवधूतोप्यधिकादृष्टाविवेकेननपुनर्दृक्ष्यतइत्यर्थः।स्यादेतत्पु
रुषश्चेदगुणोऽपरिणामीकथमस्यमोक्षःमुचेर्बंधनविश्लेषार्थत्वात्।सवासनक्लेशकर्मविपाकाशयानांचबंध
नसंज्ञितानांपुरुषेऽपरिणामिन्यसंभवात्।अतएवास्यपुरुषस्यनसंसारः।प्रेत्यभावाऽपरनाम्नोस्तिनिष्क्रियत्वात्।
तस्मात्पुरुषविमोक्षार्थमितिरिक्तंवचइतीमामाशंकामुपसंहारव्याजेनाभ्युपगच्छन्नुपसंहरति।तस्मान्नबध्यतेऽद्धा

सा०त०कौ०
२९

न मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥६२॥ कस्तर्हीत्यत आह। संसरति अज्ञानक
श्चित्पुरुषो बध्यते न कश्चित्संसरति न कश्चिन्मुच्यत इति। प्रकृतिरेव तु नानापुरुषाश्रया सती बध्यते च संसरति च मुच्य
ते चेति बंधमोक्षसंसाराः पुरुषे उपचर्य्यंते यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते। तदाश्रयेण भृत्यानां तद्भा
गित्वात्। तत्फलस्य च शोकलाभादेः स्वामिसंबंधात्। भोगापवर्गयोश्च प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषसंबंध उपपादि
त इति सर्वं पुष्कलं। नन्ववगतं प्रकृतिगता बंधसंसारापवर्गाः पुरुषे उपचर्यंत इति। किंसाधनाः पुनरेते प्रकृतेरित्यत आह।
रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥६३॥ तत्त्वज्ञानवर्ज्जं बध्नाति
धर्मादिभिः सप्तभी रूपैर्भावैरिति। पुरुषार्थं प्रति भोगापवर्गं प्रति आत्मनात्मानमेकरूपेण तत्त्वज्ञानेन विवेकख्यात्या
विमोचयति। पुनर्भोगापवर्गौ न करोतीत्यर्थः। अवगतमीदृशं तत्त्वं ततः किमित्यत आह। एवं तत्त्वाभ्यासान्नास्मि न मे नाहमि
त्यपरिशेषं। अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्॥६४॥ तत्त्वेन विषयेण विषयि ज्ञानमुपलक्षयति। उक्तरूपप्र
कारतत्त्वविषयज्ञानाभ्यासादादरनैरंतर्य्यदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते। मद्विषयश्चा
भ्यासस्तद्विषयमेव साक्षात्कारमुपजनयतीति तत्त्वविषयाभ्यास इति तत्त्वसाक्षात्कारं जनयति। अत उक्तं विशुद्धमिति।
कुतो विशुद्धमित्यत आह अविपर्ययादिति। संशयविपर्ययौ हि ज्ञानस्याविशुद्धी तद्रहितं विशुद्धं। तदिदमुक्तमविपर्य
यादिति। नियतमनियततया गृह्णन्संशयोपि विपर्ययः तेनाविपर्ययादिति संशयविपर्ययाभावो दर्शितः। तत्त्वविषयत्वा २९

ञ्च संशयविपर्याभावः। स्यादेतदुत्पद्यतामीदृशादभ्यासात्तत्त्वज्ञानं तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्य
तथा च तन्निबंधनस्य संसारस्यानुच्छेदप्रसंग इत्यत उक्तं केवलं विपर्ययेणासंभिन्नं यद्यप्यनादिर्विपर्यासवासना तथापि तत्
त्वज्ञानवासनातथापि तत्त्वज्ञानवासनयापि तत्त्वविषयसाक्षात्कारमादधत्यादिमत्यापि शक्या समुच्छेत्तुं तत्त्वपक्षपातो हि
धियां स्वभावः। यथाहुर्बाह्या अपि निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः। न बाधोऽयत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः इति। ज्ञा
नस्य रूपमुक्तं नास्मि न मे नाहमिति। नास्मीत्यात्मनि क्रियामात्रं निषेधति। यथाहुः कृभ्वस्तयः क्रियासामान्यवचना इति। त
था चाध्यवसायाभिमानसंकल्पालोचनानि चांतराणि बाह्याश्च सर्वे व्यापारा आत्मनि प्रतिषिद्धा निबोद्धव्यानि। यतश्चा
त्मनि व्यापारावेशो नास्त्यतो नाहम् अहमिति कर्तृपदं अहं जानाम्यहं जुहोम्यहं ददे अहं भुंजे इति सर्वत्र कर्तुः परामर्शात्। निःक्रि
यत्वं च कर्तृत्वाभाव अतः सुष्टूक्तं नाहमिति। अत एव न मे कर्ता हि स्वामितां लभते तदभावात्तु कुतो भाविकी स्वामितेत्य
र्थः। अथवा नास्मीति पुरुषोऽस्मि न प्रसवधर्मा। अप्रसवधर्मित्वाच्चाकर्तृत्वमाह नाहमिति। अकर्तृत्वाच्च न स्वामित्वमिते
त्याह न मे इति। नन्वेतावत्युत्पन्नेऽपि कस्मिंश्चित्कदाचिदज्ञातोऽपि विषयोऽस्ति तदज्ञानं जंतून्बंधयिष्यतीत्यर्थः। किंपुन
रीदृशेन तत्त्वसाक्षात्कारेण सेत्स्यतीत्यत आह। तेन तआहा। अपरिशेषमिति। नास्ति किंचिदन्यत्परिशिष्टं ज्ञातव्यं यदज्ञा
नं बंधयिष्यतीत्यर्थः। किंपुनरीदृशेन तत्त्वसाक्षात्कारेण सेत्स्यतीत्यत आह। तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां
।प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः सुस्थः॥६५॥ भोगविवेकसाक्षात्कारौ हि प्रकृतेः प्रसोतव्यौ तौ च प्रसूताविति नास्याः

सा॰त॰कौ॰
३०

प्रसोतव्यमवशिष्यते यत्स्रक्ष्यते इति निवृत्तप्रसवा प्रकृतिः विवेकज्ञानरूपो योर्थस्तस्यवशः सामर्थ्यं तस्मात् अतत्वज्ञानपूर्वका
णि खलु धर्माधर्मवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्याणि। वैराग्यमपि केवलं तौष्टिकानामतत्वज्ञानपूर्वकमेव। तत्र तत्वज्ञानविरोधित्वे
नातत्वज्ञानमुच्छिनत्ति। कारणनिवृत्त्या च षट्रूपाणि निवर्त्तत इति सप्तरूपविनिवृत्ता प्रकृतिः अवस्थित इति निष्क्रियः सुस्थ
इति रजस्तमोवृत्तिकलुषया बुद्ध्याऽसंभिन्नः सात्विकानुवृत्त्या तदाप्यस्य मनाक्संभेदोस्त्येव अन्यथैवंभूतप्रकृतिदर्शनानुपपत्ते
रिति। स्यादेतत् निवृत्तप्रसवापि तेन सृष्ट्यामहे। संयोगकृतो हि सर्ग इति उक्तं। योग्यता च संयोगः। भोक्तृत्वयोग्यता च पुरुषस्य
चैतन्यं भोग्यत्वयोग्यता च प्रकृतेर्जडत्वं विषयत्वं च। न चैतयोरस्ति निवृत्तिः न च कारणीयाभावान्निवृत्तिः। तज्जातीयान्यस्य कर
णीयत्वात् पुनः पुनः शब्दाद्युपभोगवदित्यत आह। दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या। सति संयोगेपि तयोः प्रयो
जनं नास्ति सर्गस्य॥६६॥ करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिरनया विवेकख्यातिर्न कृतेति। कृतविवेकख्यातिस्तु
शब्दाद्युपभोगं न जनयति। अविवेकख्यातिनिबन्धनो हि तदुपभोगो निबन्धनाभावे न भवितुमर्हति अङ्कुर इव बीजाभावे। प्रा
कृतान् हि सुखदुःखमोहात्मनः शब्दादींस्तदविवेकान्ममैत इत्यभिमन्यमान आत्मोपभुंजीत। एवं विवेकख्यातिमपि प्राकृतीम
विवेकादेवात्मा मदर्थेयमिति मन्यते। उत्पन्नविवेकख्यातिस्तु तदसंसर्गाच्छब्दादीन्नोपभोक्तुमर्हति। नापि विवेकख्यातिं प्रा
कृतीं कर्त्तुं। ततो विविक्त आत्मा न स्वार्थमभिमन्तुमर्हति। पुरुषार्थौ च भोगविवेकौ प्रकृत्यारंभप्रयोजकावि सपुरुषार्थौ सं
तौ न प्रकृतिं प्रयोजयतः। तदिदमुक्तं प्रयोजनं नास्ति सर्गस्येति। अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनं। तदपुरुषार्थत्वे ३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नास्तीत्यर्थः। स्यादेतत् उत्पन्नतत्त्वसाक्षात्कारश्चेदनंतरमेव मुक्तस्तस्य शरीरपातः स्यात् इति कथमदेहः प्रकृतिं पश्येत्।
अथ तत्त्वज्ञानेऽप्यर्थशून्यं नापवर्ग इति रिक्तं वचः। भोगेन चापरिसंख्येयः कर्माशयप्रचयोऽनियतविपाकसमयः क्षेत
व्यः ततश्चापवर्गप्राप्तिरित्यपि मनोरथमात्रमित्यत आह। सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ। तिष्ठति संस्कारव पप्रच
शाच्चक्रभ्रमिवद्धृतशरीरः॥६७॥ तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्माशयो दग्धबीजभा
वतया न जात्यायुर्भोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यंकुरान् प्रसुव
ते। तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्मबीजानामंकुरप्रसवः। तदिदमुक्तं धर्मादीनाम
कारणप्राप्ताविति। अकारणत्वप्राप्ताविति स्यायमर्थः। उत्पन्नतत्त्वज्ञानोऽपि च संस्कारवशात्तिष्ठति। यथोपरतेऽपि कुलाल
मापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत् तिष्ठति कालपरिपाकात्तु उपरते संस्कारे निःक्रियं भवति शरीरस्थितौ च प्रारब्ध
परिपाकौ धर्माधर्मौ संस्कारः। तथा च श्रूयते। भोगेन त्वितरे क्षपयित्वाथ संपद्यते इति तस्य तावदेव चिरं यावन्न विमोक्ष्ये
ऽथ संपत्स्य इति च। प्रक्षीयमाणाविद्यासंस्कारावशेषश्च संस्कारः तद्वशात् सामर्थ्याद्धृतशरीरस्तिष्ठति। स्यादेतत्। यदि
संस्कारशेषाद्धृतशरीरस्तिष्ठति। तथापि कदास्य मोक्षो भविष्यतीत्यत आह। प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृ
त्तौ। ऐकांतिकमात्यंतिकमुभयं कैवल्यमाप्नोति॥६८॥ पुरुषः। अनारब्धविपाकानां तावत्कर्माशयानां तत्त्वज्ञानाग्निनाबी
जभावो दग्धः प्रारब्धविपाकानां तु उपभोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात् कृतप्रयोजनत्वात्प्रधानस्य तं पु

सां०त०कौ०
३१

रूपं प्रति निवृत्तावैकान्तिकमवश्यंभावि आत्यन्तिकमविनाशी सुभगं। कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः। प्रमाणोपपा
दितेप्यस्मिन्नर्थे श्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह। पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं। स्थित्युत्पत्तिप्रलया
श्चिंत्यंते यत्र भूतानां॥६९॥ गुह्यं गुहानिवासि। स्थूलधियां दुरवबोधमिति यावत्। परमर्षिणा कपिलेन। तामेव श्रद्धा
मागमिकत्वेन द्रढयति। स्थित्युत्पत्तिप्रलयाश्चिंत्यंते यत्र भूतानां। यत्र ज्ञाने यदर्थं यथा चर्मणि द्वीपिनं हंतीति। भूता
नां प्राणिनां स्थित्युत्पत्तिप्रलया आगमैश्चिंत्यंते॥६९॥ स्यादेतत् परमर्षिणा साक्षात्कथितं तच्छ्रद्दधीमहि यत्तु न
रीश्वरकृष्णेन कथितं तत्र कुतः श्रद्धेत्यत आह। एतत्पवित्रमग्र्यं मुनिरासुरयेनुकंपया प्रददौ। आसुरिरपि पंचशिखाय
तेन च बहुधा कृतं तंत्रं॥७०॥ एतत्पवित्रं पावनं दुःखत्रयहेतोः पाप्मनः पुनातीति। अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यं। मु
निः कपिल आसुरयेनुकंपया प्रददौ। आसुरिरपि पंचशिखायेति॥७०॥ शिष्यपरंपरयाऽऽगतमीश्वरकृष्णेन चैतदार्या
भिः संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धांतं॥७१॥ आराज्जाता तत्वेभ्य इत्याऽर्या मतिर्यस्य सोयमार्यमतिरि
ति। एतच्च शास्त्रं सकलशास्त्रार्थसूचकत्वात्। न तु प्रकरणमित्याह॥७१॥ सप्तत्यां किल येर्थास्तेर्थाः कृत्स्नस्य षष्टि
तंत्रस्य। आख्यायिकाविरहिताः परवादविवर्जिताश्चापि॥७२॥ तथा च राजवार्त्तिकं। प्रधानास्तित्वमेकत्वमर्थव
त्वमथान्यता। पारार्थ्यं च तथानैक्यं वियोगो योग एव च। शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश। विपर्ययः पंच वि
धस्तथोक्ता नव तुष्टयः। करणानामसामर्थ्यमष्टाविंशतिधा मतं। इति षष्टिपदार्थानामष्टाभिः सह सिद्धिभिः। सेय ३१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्टिपदार्था कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणमपि तु शास्त्रमेवेदमिति सिद्धं। एकत्वमर्थवत्त्वं पारार्थ्यं प्रधानम
धिकृत्योक्तं। अन्यत्वमकर्तृत्वं बहुत्वं चेति पुरुषमधिकृत्य। अस्तित्वं योगो वियोगश्चेत्युभयमधिकृत्य। शेषवृत्तिः स्थिति
रिति स्थूलसूक्ष्मशरीरमधिकृत्य। मनांसि कुमुदानीव बोधयन्ती सतां सदा॥ श्रीवाचस्पतिमिश्राणां कृतिः स्तात्तत्त्वकौ
मुदी॥१॥ ॥इति श्रीवाचस्पतिमिश्रविरचिता सांख्यतत्त्वकौमुदी समाप्ता॥ श्रीशुभं भवतु॥

सांख्यतत्त्वकौमुदी टीका
नं० ४३७१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३६८

(४) रसमञ्जरी सटीका

ले० भानुः

श्री ५ को सरकार
संरक्षण महाविभाग

श्री ५ को सरकार
संरक्षण महाविभाग

र. म. टी. १

श्रीगणेशाय नमः॥ ॥सानंदानंदवक्त्रे स्फुरभिदुरसमा मध्वगोसि रोषाः केसेसभ्रातरि स्वप्रियसखवसरसीजन्मभास्वत्स्वरू
पाः· रज्यंतः स्त्रीसमेमात्स्वदतुलमहिमश्रीभरारंगभ्रमौ कल्याणं कल्पयंतां हरिहलधरयोर्नैकलक्ष्म्याः कटाक्षाः १ श्रीमद्गोपा
लभट्टेन द्रविडाक्ष्माभृपर्वणा· क्रियते रसमंजर्या व्याकारसिकरंजनी २ प्रारीप्सितरसमंजरीग्रंथनिर्विघ्नपरिसमाप्तये स्वेष्टदेव
तेभवोवस्तुनिर्देशत्वेन दर्शयन् भानुकरनामा कविर्मंगलमाचरति· आत्मीयमिति· हरः शिवो जयतीत्यध्याहार्यः· यत्तच्छ्रा
वप्यध्याहार्यौ· यः प्रियतमां अंगे दधानः सन्निम्नोन्नतायां भुविनीवोच्चप्रदेशेपुरतोऽग्रतः· आत्मीयं स्वीयं चरणं दधाति धर

श्रीगणेशाय नमः॥ ॥आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि स्वीयेनैव करेण कर्षति तरोः पुष्पं
समाशंकया· तल्पे किंच मृगत्वचा विरचिते निद्राति भागैर्निजैरंतः प्रेमरसालसां प्रियतमामंगे दधानो हरः १

ति· प्रियाया मृदुचरणकमलयोर्व्यथा न स्यादिति भावः· पुनः तस्याः श्रमाशंकया तरोः पुष्पं स्वीयेनैव करेण कर्षति आकृष्यावचि
नोति· तस्या भूषणविरचनायेति भावः· पुष्पमिति जातावेकवचनं· शंकात्रासे वितर्के चेति विश्वः· किंच अन्यदपि· मृगत्वचा वि
रचिते तल्पे शय्यायां निजैर्भागैरेकदेशैः निद्राति स्वपिति· नि पूर्वो द्रा धातुः शयनार्थे उपसर्गेण धात्वर्थो बलादन्यत्र नीयत
इति वचनात्· कठोरमृगचर्मस्पर्शेण तिमृदुप्रियांगलतिकायाः पीडा न भवेदिति भीत्येति भावः· कथंभूतां प्रियतमां मंतः

शिवः १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेमभरालसां अंतर्हृदये यत्प्रेमतस्य रसआस्वादनं तेन अलसां निर्भरां पातां. अतः स्वयमेव ध्यतः सन्निस्पर्धः. अंतःप्रेमर
सालस इतिपाठे. एवंभूतस्यापि हरस्य ताहग्व्यापारकरणस्य प्रियतमाम्पितिविशेषणानुकूलत्वमुचितमिस्पर्धः. नीमं
गभीरं. स्मात्मुरःपुरतोयतइत्सभरः. शार्दूलविक्रीडितंवृत्तम्. तल्लक्षणं. अर्काश्वैर्यसः सज्जौसततगाः शार्दूलविक्रीडि

विद्वज्जनमनोभृंगरसव्यासंगहेतवे. एषाप्रकाश्यतेश्रीमद्भानुनारसमंजरी. २

तम्. १ संप्रतिग्रंथकरणेप्रयोजनं निरूपयति. विद्वदिति. श्रीमद्भानुनाकविनाएषारसमंजरीरसः शृंगारादिस्तद्युक्ता
मंजरीव मंजरी. प्रकाश्यते प्रकटीक्रियते. अस्यापि मंजरी भानुना सूर्येण प्रकाश्यत इति श्लेषः. विद्वज्जनस्य पंडितसमू
हस्य. यत्मनस्तदेव भृंगस्तस्य योरसव्यासंगः. रसः शृंगारादिस्तस्य व्यासंग आस्वादसंबंधेनव्याप्तिः स एव हेतुस्तद
र्थं. अनुष्टुप्छन्दः. २ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषोत्तमत्वाय त्वात्वस्तदेव त्वाह· तद्वत्तं मन्येनेत्यस्य च पुरुषोत्तमाप्यप्यालंबनविभावत्वेनेत्यर्थः· एतेन नायकं व्यादिनत्वान्नायिकायाः अ
प्रथमतो निरूपणे बीजं चिन्त्यमित्यपास्तं· पूर्वं रक्ता भवेन्नारी पुमान्पश्चात्तदिङ्गितैरिति क्रमानुसारेण तस्याः प्रथमतो निरूपणमित्यप्याहुः·

र. म. टी. २ तत्रेति· तत्र तस्यां रसमंजर्यां रसेषु हास्यादिषु शृंगाररसाभ्यर्हितत्वेन प्राधान्येन तदालंबनविभावत्वेन तस्य च शृंगारस्य आलंबनविभावत्वेन नायिका तावत्प्रथमतो निरूप्यते· यमालंब्य रस उत्पद्यते स आलंबनविभावः· विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतसूत्रं· तत्र विभावो द्विविधः· आलंबन उद्दीपनश्चेति· आलंबनो नायकादिः· उद्दीपनो घनरववकपंक्त्युपवनादिः· नायिकानां बहुत्वाज्जातावेकवचनमत्र समाधानम्· सा च नायिका त्रिधा· त्रिभिः प्रकारैर्भिध

तत्र रसेषु शृंगाररसाभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिका तावन्निरूप्यते· सा च त्रिविधा· स्वकीया परकीया सामान्या चेति· तत्र स्वामिन्येवानुरक्ता स्वकीया॥ ॥

त इत्यर्थः· त्रिः प्रकारमेवाह· स्वस्येदं स्वकीया· स्वपादात्स्वार्थे कः इति प्रत्यये तदंताद्धादित्वाच्छः· आयने इति छस्य ईयः·
परस्य इदं परकीया· जनपदाख्यां कुककेति [illegible] समाने वसामान्या सर्व साधारणेत्यर्थः· तत्रेति· तत्र तासु स्वामिन्येव पत्यावेवानुरक्ता अनुरागिणी स्वकीया· अनुरक्ता स्वकीया इत्युक्ते कचिदनुरक्तायाः स्वीयात्वं स्यात्· अतः शिवः २
स्वामिन्नीत्युक्तं· कदाचित्परगामिन्यां न वा व्याप्तिः· अव्याप्तिलक्षणदूषणं न घटत इत्यर्थः· यथाहि· लक्ष्यैकदेशे लक्षणस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र स्वामिसंबंधिनी लक्षितातस्या एकदेशे एवकाररूपावधारणेनाव्यावर्त्तितपरान्तरकत्वरूपे लक्षणतात्स्याप्रवर्त्तनरूपा
मव्याप्तिं प्रतिपादि कश्चिदनुसंदधातीति· नवेति· यतः परगामित्वात्तत्रालक्ष्यत्वात्· एतदेव स्पष्टयति· अत्रेति· अत्रा
स्मिन् लक्षणे पतिव्रताया एव लक्ष्यत्वात्· नान्यस्याः इत्ययोगव्यवच्छेदार्थ एवकारः· तस्याश्च परिणीतत्वेन स्वामिसंबं

नवपरिणीतायां परगामिन्यामव्याप्तिः· अत्र पतिव्रताया एव लक्ष्यत्वात्· तस्याश्च परगामितया
परकीयात्वमपि समायाति· अस्याश्चेष्टा· भर्त्तुः शुश्रूषा शीलसंरक्षणमार्जवं क्षमा॥ ॥

धिनीत्वं परगामितया परकीयात्वमपि समायाति· अतः पतिव्रतेत्युक्तं· साकांक्षायां चेष्टतआह· अस्याः· स्वीयायाश्चेष्टा
व्यापारः· तामेवाह· भर्त्तुरित्यादि० भर्त्तुः पत्युः शुश्रूषा परिचर्या शीलस्य सच्चरित्रस्य संरक्षणं मार्जवं· ऋजो भावः सर
लत्वं· क्षमा शांतिः· शुचौ तु चरिते शीलमित्यमरः· शीलं स्वभावे सच्चरित्र इति विश्वः॥ ॥श्रीकृष्णायनमो नमः॥

यथेति· तामेव चेष्टामुदाहरति · गतागतमिति · कुलनतभ्रुवां· यः सदाचारवान्वंशः कुलइत्यभिधीयते· कुलसंबंधिनीत्वात् नतेन नम्रे भ्रुवौ यासां· कुलनतभ्रूशब्देनात्र प्रतिव्रता गम्यते· तासां नयनयोः गतागतकुतूहलं· गतं प्रेरणं· आगतं आकुंचनं तद्विषयं कुतूहलं कौतुकं अपांगावधि· अपांगो नेत्रयोरंतो तदवधितस्मात्छिन्नं· अपांगो नेत्रयोरंत इत्यमरः· पुनः ईषद्धास्यं अधर एव विश्राम्यतितमुद्धं घ्यनपातीत्यर्थः· ईषद्विकासितैर्ओष्ठैः कटाक्षैः सौष्ठवान्वितैः अलक्षितद्विजाहार

गतागतकुतूहलं नयनयोरपांगावधिस्मितं कुलनतभ्रुवामधर एव विश्राम्यति· वचः प्रियतम
श्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति· ३ ॥श्रीमंगलमस्तु॥

मुक्तमानांस्मितं स्मृतम्· पुनः· वाचो वचनं प्रियतमस्य श्रुतेरेव श्रवणस्य कर्णस्यैव न द्वयोरितिथिर्गोचरः नान्यस्येत्यर्थः· पुनः· चेत् यदि कदाचित्कालविशेषेण कोपक्रमः क्रोधारंभः तदा केवलं मनसि मज्जति लीनो भवति न वहिर्यातीत्यर्थः· स्वभावोक्तिरलंकारः· स्वभावोक्तिस्तु डिंभादेः स्वक्रियारूपवर्णनमिति· पृथ्वीछन्दः· तल्लक्षणं मजसौजसजना वसुग्रहयतिश्च पृथ्वीगुरुः· ३ ॥ ॥श्रीमन्मङ्गलमूर्त्तये गणाधिपतये नमो नमः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेवक्रमशइतिलक्षितांनवोढामुदाहरन्नाह· नवोढायथा· हस्तेधृतापीति· हस्तेधृतानकेवलंवार्गांघवरूढाशयनेशय्यायां
विनिवेशितापि· नकेवलंकराघवलंविता· क्रोडेभुजांतरेकृतापिआलिंगनादिव्यापारंप्रापितापिनकेवलंस्थापिता· तथा
पिनववधूर्नवोढावहिरेवगंतुंयातुंयततेयत्नंकरोति· लज्जाभयपराधीनत्वादितिभावः· अथेत्यर्थांतरेज्जानीमहेव

नवोढायथा· हस्तेधृतापिशयनेविनिवेशितापिक्रोडीकृतापियततेवहिरेवगंतुंम्· जानीम
हेनववधूरधतस्यवश्यपाथःपारदंस्थिरयितुंक्षमतेकरेण·॥ ॥श्रीमद्भागवच्छायनमोनमः

यं· यःपुरुषःकरेणपारदंस्थिरयितुंस्थिरीकर्तुंक्षमतेसमर्थः· तस्यैववश्याआक्रमणीयान्पारदाक्रमणमपिरसज्ञेनम
वतिइत्यत्रापितथैवेत्यर्थः· स्थिरयितुमित्यत्रापिदेशिकत्वानित्यत्वात्स्थिरस्यादेशाभावः· स्थगयितुमितिवासमीचीनपाठः·
अत्रस्वभावोत्पन्नागतोदृष्टांतालंकारः· वसंततिलकंवृत्तम्· तदलक्षणम्· ज्ञेयंवसंततिलकंतभजाजगौगः॥ ॥ ॥

र·स·टी·
६

विश्रब्धनवोढामुदाहरति·दरेति·नवोढाविश्रब्धेतिशेषः·कस्यरसिकस्यसमीपमुपेत्यमिलित्वास्वपिति·कथमित्याह·दरई
षन्मुकुलितेमुकुलीकृतेनेत्रपाल्यौपक्ष्मांक्तिपायांतयथास्यात्तथा·ईषदर्थेदराव्ययमित्यमरः·अत्रलज्जितादृष्टिर्नात्रमु
कुलितातस्याआनंदेविधानात्·तथासतिमध्याप्रगल्भास्वभावेनमुग्धायामसंभवात्·नाप्यर्द्धमुकुलालस्वविशेषेणए

विश्रब्धनवोढायथा·दरमुकुलितनेत्रपालिनीवीनियमितबाहुकृतोरुयुग्मबंधम्·
करकलितकुचस्थलंनवोढास्वपितिसमीपमुपेत्यकस्यचन॥ ॥ ॥ ॥

तस्याःसंभवात्·नापिभीताभीतायांदृष्टेर्मुकुलितत्वपिस्यसंप्रदायइत्यलंविस्तरेण·पुनःनीवीनियमिताबाहु·नीव्यांनियमि
तःस्थापितोबाहुर्यत्र·तथाकृतःऊरुयुग्मस्यबंधःपरस्परलग्नतायत्रतथाकरेणकलितंधृतंकुचस्थलंयत्र·स्वभावोक्तिर
लंकारः·नारीकट्यंशुकग्रंथौनीवीस्यादितिवैजयंती·पुष्पिताग्रावृत्तं·तल्लक्षणं·अयुजिनयुगरेफतोयकारोयुजितुनजौजरगा

पुष्पिताग्रा·

शिवः
६

अथमध्यामाह॰समानेत्यादि॰समानौतुल्यबलौतयालज्जामदनौयस्याः सा मध्यानायिकेत्यर्थः॰एषैववातिप्रश्रपादतिविश्रब्धन
वोढेत्यपपाठः॰अनुदाहृतत्वात्॰असंभवाच्चयाहिअतिधार्ष्ट्यभाववतीतस्यांकथंधार्ष्ट्यप्रयुक्तवक्ष्यमाणमध्यव्यवहारसंभवइति॰अस्या
मध्यायाश्चेष्टाक्रियाव्यापारः॰सागसिसापराधेप्रेयसिकांतेसति॰धैर्येधीरतायांवक्रोक्तिः॰अर्थांतरज्ञापकंवचनमित्यर्थः॰अधै
र्येअधीरतायांपरुषानिष्ठुरावाक्यस्याः सा॰ मध्यायथा॰ स्वापइति॰ स्वापेनिद्रायांप्रियस्याननविलोकनहानिः॰विलोकनरू

समानलज्जामदनामध्या॰ अस्याश्चेष्टा॰ सागसिप्रेयसिधैर्येवक्रोक्तिरधैर्येपरुषवाक्॰ मध्यायथा स्वापे
प्रियाननविलोकनहानिरेवस्वापच्युतौप्रियकरग्रहणप्रसंगः॰ इत्थंसरोरुहमुखीपरिचिंतयंतीस्वापंविधा
तुमुपहातुमपिप्रपेदे॰

पेष्टभंगोभावीत्यर्थः॰तथास्वापच्युतौनिद्रात्यागे॰प्रियकरस्यग्रहणप्रसंगः॰रत्यर्थविघ्नयेतिभावः॰इत्थममुनाप्रकारेणसरो
रुहमुखीपरिचिंतयंतीस्वापंनिद्रांविधातुंकर्तुंलज्जात्यागस्यदुष्करत्वादितिभावः॰हातुंत्यक्तुमपिकांतमुखावलोकनहानेरनुपे
क्षत्वादितिभावः॰प्रपेदेप्राप्ता॰उभयकोटिअवलंबनानिष्ठकार्यद्वयसमानपतनेव्याकुलाबभूवेत्यर्थः॰अत्रचविधानहानि
भ्यांतुल्यबलतयालज्जामदनयोस्तुल्यवर्णनेनप्रकटमेवलक्षणोदाहरणस्वरूपं॰ अत्रहानिविधानयोरन्यतरनिश्चयाभावेनसंदेहालंकारः॰ वसंततिलकंछंदः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथप्रगल्भां निरूपयति. पतिमात्रेति. पतिमात्रविषयेयः केलिकलापः क्रीडासमूहस्तत्रकोविदाप्रवीणाप्रगल्भा. वेश्यायांचपुनः
कुलटायांस्वैरिण्यांपतिमात्रविषयत्वस्याभावात्. नतत्रतयोर्वेश्याकुलटयोरतिव्याप्तिः. अस्याः प्रगल्भायारतिप्रीतिः अन्योन्यापेक्ष
यासंभोगप्रीतिः आनन्दात्संमोहोविचित्ततात्राज्ञताइत्यर्थः. प्रथमंरतिप्रीत्युदाहरणंदर्शयति. संस्पृश्येति. वामाक्षिवामंवक्रंअ
क्षियस्याः स्मृतिगतविकसत्कमलदिदृक्षयेतिभावः. सावसनांचलेर्यकुत्वोत्तयाप्रयत्नेनापिनाच्छादितंभवतीतिध्वन्यते. श्रवणेयो

पतिमात्रविषयकेलिकलापकोविदाप्रगल्भा. वेश्यायांकुलटायांचपतिमात्रविषयत्वाभावान्नतत्रातिव्या
प्तिः. अस्यास्तुरतिप्रीतिरानंदात्संमोहः. प्रथमंरतिप्रीतिर्यथा. संस्पृश्यस्तनमाकलय्यवदनंसंश्लिष्यकंठ
स्थलंनिष्पीयाधरबिंबमंबरमपाकृष्याशुदत्पालकं. देवस्यांबुजिनीपतेःसमुदयंजिज्ञासमानेप्रियेवामाक्षी
वसनांचलेःश्रवणयोर्नीलोत्पलंनिह्नुते.

नीलोत्पलंनीलकमलंसूर्योदयविकाशित्वात्तस्यनिह्नुतेआच्छादयति. कमलविकासेनचिह्नेनसूर्योदयंप्रियोमाज्ञानादिति
धियेतिभावः. क्कसति. अंबुजिनीपतेः कमलिनीपतेर्देवस्यसूर्यस्यसमुदयंजिज्ञासमानेज्ञातुमिच्छतिसति. अंबुजिनीपतेः
रितितत्सनाथत्वात्तस्याइतिभावः. सूर्योदयंजिज्ञासमानइतिरतेरंतरायभूतोदिवासंभोगइतिभावः. नदिवामैथु
नंकुर्यादितिवाक्यात्. किंकृत्वाजिज्ञासमानेप्रियइत्याह. स्तनंसंस्पृश्यमर्दनंविधायवदनंआकलय्यस्वमुखेननुंबनार्थं

शिव:
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संपोज्झेत्यर्थः· कंठस्थलं संश्लिष्य आलिंग्य एतदालिंगनं दुग्धजलाभिधानं जघनोपश्लेषाख्यं वाव गंतव्यम· उक्तं च· अंके स्थि
तावशयने मृगशावकाक्षी गात्रे प्रियस्य विशतीव नितांततरा गात्· गाढोपगूहनवशेनान्निरंतरं यत्संश्लेष्य माकुरिह दुग्धजला
भिधानम· १ उरुकलिततदीयश्रोणिरस्योपरिष्ठाद्भुजतियदिह नारी स्रस्तकेशोत्तरीया· करजदशनकृत्यं चुंबनं वा विधि
त्सुः कथयति जघनोपश्लेषमेतन्मुनीन्द्र इति· तथा अधरबिंबं निष्पीय· पीडूपान इत्यस्य स्वल्पमपि रूपम· अंबरमपाकृष्य·
दूरीकृत्य· अलकं मुदस्य उत्क्षिप्य· एवं वाग्भरतेन आलिंगनादिना नायिका उत्कंठपिलेत्यर्थः· उक्तं च· मोहनं नारयेन्ना
वंघावन्मोत्कंठिता प्रिया· अस्य पानसुखोत्पत्तिरशीतेर्ककराइवेति· शार्दूलविक्रीडितं वृत्तम॥ ॥श्रीकृष्णायनमः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनंदात्संमोह इति द्वितीयमुदाहरणं दर्शयति. नखक्षतमिति. काचिन्नायिकापूर्वकृतशिक्षां सखीं कथयति. हे आलि सखि. उरस्थले व
क्षसि नखक्षतं. अधरतले अधराधःप्रदेशे रदस्य दंतस्य व्रणं. तलं स्वरूपाधरयोरिति विश्वः. वकुलमालिका वकुलस्य वृक्षस्य
पुष्पं वकुलं तस्य मालैव मालिका च्युता इतस्ततः पतिता. वपुनः मुक्तावली विगलिता. मुक्ताहार त्रुटित इत्यर्थः. प्रागल्भ्यप्रयुक्त
सुरते वैचित्र्य भयत्रापि हेतुरिति भावः. एतन्नखक्षतादिकं सकलं रतांते समये सुरतांतकाले आनंदभरते प्रिय या आलोकि

द्वितीयं यथा. नखक्षतमुरस्थले ऽधरतले रदस्य व्रणं च्युता वकुलमालिका विगलिता च मुक्तावलिः. रतां
तसमये मया सकलमेतदालोकितं स्मृतिः क्व स्वरतिः क्व वक्व यतवालिशिक्षाविधिः.॥ ॥ ॥

तमीषद्दृष्टं. तत्र च स्मृतिः क्व वा पयहमिति विपोषसरणं क्वेत्यर्थः. रतिः क्व. विशेषसंभोगः क्व न स्मरामीत्यर्थः. तत्र च भव
च्छिक्षाविधिर्नायिके एवं प्रवर्तितव्यमेव नेति विशेषविषयकः. क्व च किमपि न ज्ञानामीत्यर्थः. इत्थं नियतं कालं संभोगमा
त्रस्यैतो सुरते वैचित्र्यमनंतरं च तदभावेति संमोह इति प्रगल्भायां रतिवैचित्र्यसंमोहावगंतव्यो. अन्यथा प्रियसंस्पर्श एवा
तिसंमोहे कदा सुरते वैचित्र्यं स्यात्तदभावे च रसहानिप्रसंगः. अतस्तदुभयमपि युज्यत इति भावः. पथ्वी छंदः॥ ॥ ॥ शिव:
८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थंनिरूपितेषुस्वीयामुग्धादिभेदेषुमध्याप्रगल्भेभेदांतरैरनेकविधेइत्याह· मध्याप्रगल्भेइति· मानावस्थायांमानप्रधानत्वेप्रत्ये
कंत्रिविधे: मध्याप्रगल्भेत्रिप्रकारेइत्यर्थ: ·तान्प्रकारान्दर्शयति· धीराधैर्यवती· अधीराअधैर्यवती· धीराऽधीराधैर्याधैर्यवती·
तत्रधीरांदर्शयति· व्यंग्येति· व्यंग्योनुमेय: केनचिच्चिह्नेनकोपस्यप्रकाशोयस्या: साधीरा· नव्यंग्य: कोपप्रकाशोयस्या: साअधी

मध्याप्रगल्भेमानावस्थायांप्रत्येकंत्रिविधे· धीरा· अधीरा· धीराधीराचेति· व्यंग्यकोपप्रकाशाधीरा· अ
व्यंग्यकोपप्रकाशाअधीरा· व्यंग्याव्यंग्यकोपप्रकाशाधीराऽधीराच· इयांस्तुविशेष: ·मध्याधीराया: कोपस्य
गीर्व्यंजिका· मध्याऽधीराया: परुषवाक्· मध्याधीराधीरायाश्चवचनरुदितेकोपस्यप्रकाशके॥ ॥

राव्यंग्याव्यंग्य: कोपप्रकाशोयस्या: साधीराधीरा· इयांस्तुविशेष: · इदमेवचिह्नंमध्याधीराया: कोपस्यव्यंजिकागीर्वाक्कोपस्य
व्यंजिकेतिशेष: ·मध्यायाधीराधीरायाधैर्याधैर्यवत्या: वचनंधीरत्वयोगि· रुदितमश्रुविमोचनं· अधीरत्वयोगितेउभेए
ककालीनेइतिशेष: · कोपस्यप्रकाशके॥

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

प्रगल्भामपि तथैवेत्याह· प्रौढाया: प्रगल्भायास्तु धीराया रतौदास्यं सुरतौदासीनत्वं· कोपप्रकाशकमिति योज्यं· बालास्याश्चोड
शाब्दात्तदुपरि तत्रुणी त्रिंशति यावदूर्ध्वं प्रौढास्यात्संवपंचाशद्वर्षपरतो वृद्धता मेति नारी तिरतिरहस्ये· प्रगल्भाया अधीरा
यास्तु तर्जनं वाग्नेत्रशिर:कंपादिभि: ताडनादि ताडनं पुष्पमालादिना· आदिनात्र द्वंधनमपि· प्रगल्भाया धीराधीराया
रतौदास्यं सुरतौदासीनत्वं तर्जनताडनादि के कोपस्य प्रकाशके पूर्ववत्· एवं धीरादिभेदास्तु स्त्रीप्रासंगिकत्वात्स्वपतमल

प्रौढाया धीरायास्तु रतौदास्यं· प्रौढाया अधीरायास्तु तर्जनताडनादि· प्रौढाया धीराधीराया रतौदास्यंत
र्जनताडनादि के कोपस्य प्रकाशके· धीरादिभेद: स्वीयाया एव न परकीयाया इति प्राचीनलेखनमात्रं· धीर
त्वमधीरत्वं तदुभयं वा मान निपतम·परकीयाया मानश्चेत्तेषामप्यावश्यकत्वात्· मानश्च न परकीयाया इतिव
क्तुमशक्यत्वात्·

घनिराकरोति· धीरादिभेद: स्वीयाया एव न परकीयाया इति प्राचीनानां लेखनं तैर्लिखितमाज्ञामात्रं न विचारणीयम्· यत:
धीरत्वमधीरत्वं तदुभयं धीराधीरत्वं मान नियतं मानाधीनं· प्रस्तुते किमागतं तत्राह· परकीयाया मानश्चेत्तदा तेषामप्या
वश्यकत्वान्निश्चितं वर्तीत्यर्थ: ·मानश्च न परकीयाया इति वक्तुमशक्यत्वात्·॥ ॥श्रीगणाधिपतये नमो नम:॥ ॥ शिव:
६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रमध्याधीरामुदाहरति·लोलेति·काचित्सापराधंप्रियंप्रत्याह·भोप्रियभवतोदेहेश्रमवारिधाराः·श्रमजलकणाः·सारावुद्गताव
भ्रुर्जाता इत्यर्थः·कथंभूतस्यभवतः·लोलालिपुंजे·लोलानांचंचलानांसतृष्णानांवा·अलीनांभ्रमराणांपुंजः समूहोयस्मिं
न्·भवदंगस्तोगंधमाघ्रायेत्यर्थः·तस्मिन्निकुंजेव्रजतोगच्छतः·अतःनलिन्याः कमलिन्याः दलेनतस्यातिशीतलत्वात्समीरं

मध्याधीरायथा·लोलालिपुंजेव्रजतोनिकुंजेस्फारावभूवुःश्रमवा
रिधाराः·देहेसमीहेभवतोविधातुंधीरंसमीरंनलिनीदलेन॥ ॥

वायुंधीरंमन्दंश्रमपरिहरणक्षमंमित्यर्थः·विधातुंकर्तुंसमीहेइच्छामि·लोलश्चलसतृष्णयोरितिविश्वः·मांविहायनिकुंजेव्रज
तइतिवक्रोक्त्यासापराधत्वं·अत्रवक्रोक्तिरलंकारः·वक्रोक्तिःश्लेषकाकुभ्यांवाच्यार्थांतरकल्पनमिति·इन्द्रवज्रावृत्तम्·स्या
दिन्द्रवज्रायदितौजगौगः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यामधीरामुदाहरति· जातस्तइति· काचिन्मानिनीसापराधं कांतंप्रति· रे धूर्त्त अतिविचित्रमेतदाकर्णयेत्याशयेनाह· तेतव निशिरात्रौ
जागरोजागरणं जातः मदन्यनापि कारणविशेषादिति भावः· ममपुनर्नेत्रांबुजे शोणिमा शोणत्वभावः रक्तत्वं· तदसहनत्वाद मर्षेण
हस्तेनेतिभावः· यस्य जागरस्तस्यैव रक्ततं युक्तं अत्रतु विपर्यय इति चित्रं· पुनः भवता त्वया प्रवितत अतिशायितं मधु मद्यं निःपीतं निःशे
षं पीतं मदस्य पारसहेत्वर्थः· मे मनो आघूर्णितं भ्रांतं चित्रमेतत्· पुनः भ्राम्यतो येभ्रंगा स्तैर्घने निबीडे निकुंजभवने लतावेष्टितस्थले त्वयाश्री
फलं श्रीफलस्य बिल्वस्य फलं· अवयवरूपं फलं लब्धं प्राप्तं· मदस्याः कुचलक्षणफलमिति ध्वनितं· अविवक्षितवाच्योपस्तत्र वा

मध्याऽधीरायथा· जातस्ते निशिजागरो ममपुनर्नेत्रांबुजे शोणिमा निष्पीतं भवता मधु प्रविततं मत्वाघूर्णितं
मे मनः· भ्राम्यद्भृंगघने निकुंजभवने लब्धं त्वया श्रीफलं मय्यंगेषु पुनरेष मांकुरु तव एकैः शरैः कृंतति। ।

यं भवेद्ध्वनौ· प्राणेभ्योप्यधिके क्षेम्यः इत्यत्र फले भुंगिति लुक· यद्वा· श्रियस्तस्याः यौवनसंपत्तेः फलमिव फलं कुचरूपं तत्संयोगा
दिव· पुनरिदं चित्रं· एषः पंचेषुः पंच इषवो बाणा यस्य सः कामः मांकुतवहो ऽग्निस्तद्वत् क्रूरैर्दाहकैः शरैः कृंततिच्छिनत्ति फलं त्वया
प्राप्तं संछेदनं ममेति वैपरीत्यमित्यर्थः· हर्षणश्च प्रहसनो मोहनो मूर्छनस्तथा· विरूपणश्च कामस्य शराः पंचप्रकीर्त्तिताः· यद्वा· अ
रविंदमशोकं च चूतं च पककोरकं· नीलोत्पलं च पंचैते पंचबाणस्य सायकाइति· एतेन त्वयं फलं प्राप्याहं पुष्पेः प्रतारिता इति भावः· अत्र

विरोधालंकारः॥ विरोधः सोविरोधोऽपि विरुद्धत्वे
न यद्भवेत् इति· शार्दूलविक्रीडितं वृत्तम्। ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भोकांतअनुरागोनुरंजनंतत्रचतुरोसि· यद्वा· कांतायामन्यस्याअनु
धीराधीरमध्यामुदाहरति· कांतानुरागेति· काचिद्वदति· भोकांतअनुरागोनुरंजनंतत्रचतुरोसि· यद्वा· कांतायामन्यस्याअनु
रंजनं· नकेवलमनुरंजनेचतुरः· किंतुमनोहरोसितस्याः ममतुमनोऽहरसिनहरसिइतिवक्रोक्तिः· तस्यामासक्तेनकेवलमि
दमेव· नाथोसिप्रभुरसि· उपतापकोऽसीतिवक्रोक्तिः· नाथ्वनाथ्वयाच्ञोपतापेश्वर्याशीःषु· किंच· नवयौवनेनभूषितोसि· इदमे

मध्याधीराधीरायथा· कांतानुरागचतुरोसिमनोहरोसिनाथोसिकिंचनवयौवनभूषितोसि·
इत्थंनिगद्यसुदृशावदनेप्रियस्यनिश्वस्यबाष्पलुलितानिहितादृगंता:॥ ॥श्रीरामायनमः ॥

वभूषणंनविनयादीनिइतिवक्रोक्तिः· सुदृशानायिकयाइत्थमेवंनिगद्यउक्त्वा· प्रियस्यवदनेविषयेसप्तमी· निःश्वस्यबाष्पैर्म ३४
ज्जांबुभिर्लुलिताविमर्दितादृगंताहक्कोणाः निहिताःप्रेरिताः· अत्रवक्रोक्त्यश्रुपाताभ्यांधीराधीरत्वंस्पष्टमेव· वसंततिलकंछं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र.स.टी.
११

प्रोढां धीरां यथा तथा तामुदाहरति · नो तल्पमिति · काचित्सखी वदति · हे केतकगर्भगौरि · केतक्याः पुष्पं केतकं तस्य गर्भस्तद्व-
द्गौरि · तल्पं शय्यां नो भजसे · यथा · तथा सुधाधारानुकाराः सुधाधारां अनुकुर्वंतीति ताः अमृतद्रवतुल्या इत्यर्थः · गिरो वाचो
न जल्पसि · उभयमपि क्रोधोदयादिति भावः · तया क्रोधप्रकाशस्य छलाद्व्याजात्परिजने दृक्पातं न कुरुषे · इत्थं एवं दयिते

प्रोढाधीरायथा · नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो दृक्पातं कुरुषे न वा परिजने क्रोधप्र
काशच्छलात् · इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं तस्मादेव न वेत्पुनः सहचरी कुर्वीत सा स्मितं ·

प्रिये तत्कोपस्य संगोपनं आच्छादनं स्यादेवं वेद्यदि पुनः सहचरी सहचरतीति सखी · सा विवक्रमुखं कृत्वेत्यर्थः · स्मितं न कुर्वी
त · एवमुदासिताप्रां त्वयि वाङ्वचनादि कुर्वतो वल्लभस्य सखी सा स्मितमेव त्वत्कोपज्ञापकं भवेदित्यर्थः · सा चित
त्त्वेन गुप्सितइत्यमरः · शार्दूलविक्रीडितं वृत्तम् · शिवः
११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रौढामधीरामुदाहरति। प्रतिफलमिति। अचलकन्या पार्वती गिरिशं गिरिशं पतितं नकरोति स्वतेजसा एवंभूतमीश्वरं करेण
तर्जयामास। चित्रमेतत्। किंभूता पार्वती। हरस्य शिरसि या इंदोः कला तस्यां स्वीयं प्रतिफलं प्रतिबिंबमवलोक्य परस्याऽ
न्यस्यावासंस्थितिं आशंकमाना वितर्कयंती। किंभूतेन करेण कंपेन प्रचलानि प्रकर्षेण चलानि वलानि चलानि यानि वलया

प्रौढाऽधीरा यथा। प्रतिफलमवलोक्य स्वीयमिंदोः कलायां हरशिरसि परस्यावासमाशंकमा
ना॥ गिरिशमचलकन्या तर्जयामास कंपप्रचलवलयवलात्कांतिभाजा करेण॥ ॥

निकंकणानि तेषां वल्गंती भाषमाणा या कांतिः शोभा तां भजतीति भाजा सेवमानेन। अस्योपि यथाहं ध्वनिपूर्वेण तर्ज
यतित्येत्यर्थः। अत्र संशयालंकारः। मालिनी वृत्तम्। तल्लक्षणम्। ननमययुतेयं मालिनी भोगिलोकैः॥ ॥ ॥

र·स·टी·
१२

धीराधीरां प्रौढामुदाहरति· तल्पोपांतमिति· प्रियतमेतल्पोपांतं तल्पस्य शय्याया उपांतं समीपमुपेयुषि प्राप्तवति· वक्री
कृतग्रीवया सापराधस्यास्य सन्मुखं स्थितिर्नोचितेति भावः· पुनः· काकुव्याकुलवाचि· काक्वामत्सरापराधं ज्ञात्वाकुपितेति भीति
युतध्वनिविकारेण व्याकुलाऽनन्यथाकथनेन वाक् यस्य तस्मिन्सति· सावितिर्यकम्नत्वा पञ्चलितं कपममपराधगोपनं काका

प्रौढाधीराधीरायया· तल्पोपांतमुपेयुषि प्रियतमेवक्रीकृतग्रीवया काकुव्याकुलवाचि सा विहसितस्फु
र्जत्कपोलश्रिया· हस्तन्यस्तकरेऽप्यमर्षगद्गदशालाक्षारसक्षालितप्रोष्ठीपच्छमयूखमांसलरुचो विस्फारिता
दृष्टयः॥ ॥

करोतीतिहासः· तेनस्फूर्जंती विकसंतीकपोलयोः श्रीर्यस्याः सा तया· पुनः हस्तेन्यस्तः करो येन तस्मिन्सति यदियं हसंती लक्ष्य
ते अतः प्रसन्नेति· ज्ञात्वा· अमर्षगद्गदशा दृष्टयो दृष्टिभेदास्तदपराधस्तवकरूपाः विस्फारिताः सञ्जो धप्रकाशप्रेरिताः कथंभूता
दृष्टयः लाक्षारसेन यावकेन क्षालितं यत्प्रोष्ठ्याः सफर्याः पच्छं तस्य ये मयूखाः कान्तिच्छटास्तद्वन्मांसला पुष्टा रुचयो दी

प्रयोपासांताः· काकुः स्त्रियां विकारो यः शो·
कभीत्यादिभिर्ध्वनेः· प्रोष्ठी तु शफरी द्वयोः इत्य
मरः· शार्दूलं वृत्तं

शिवः
१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंधीरादिषड्भेदानुक्त्वा तानपि प्रकारांतरेणाह । एते चेति । षड्भेदमध्याप्रौढाविषयाः द्विधाप्रकारांतरेणाभिधंत इत्याह । ज्येष्ठाकनिष्ठा चेति । परिणीतत्वे सति भर्तुः स्नेहकृतं ज्येष्ठाकनिष्ठात्वं नतु वयःकृतमिति अस्नेहता रतम्येन अधिकस्नेहा गुरु इत्यादि पुनाति व्याप्तिः तासामप रिणीतत्वादित्यर्थः । धीराज्येष्ठाकनिष्ठा च यथा तयोदाहरति । एकस्मिन्निति । कोपि दक्षिणो नायक इति योज्यं । सरोरुहदृशो नीपिके योः एकस्मिन् शयने एकस्यां शय्यायां निद्रां विज्ञापयतयोर्मध्ये एकां नायिकां पिहितवितो वित्ताऽरितः अवगुंठनपटोपस्यात्स्तांत्यार्कुत्वे

एते च धीरादिषड्भेदा द्विधा ज्येष्ठा च कनिष्ठा च । परिणीतत्वे सति भर्तुरधिकस्नेहा ज्येष्ठा परिणीतत्वे सति भर्तुर्न्यूनस्नेहा कनिष्ठा । अधिकस्नेहात्वन्यूनस्नेहात्वपरकीयासामान्यवनितासु नातिव्याप्तिः परिणीतपदेन व्यावर्तनात् । धीराज्येष्ठाकनिष्ठा यथा । एकस्मिन्शयने सरोरुहदृशोर्विज्ञाय नेत्रांतयोरेकां पिहितवानवगुंठनपटान्मुत्कंधरो दृष्टवान् । अन्यस्याः सविधं समेत्य निभृतमालोलहस्तांगुलिव्यापारैर्वसनांचलं च पलपस्वापप्रभृतिं निद्रवार ॥ ॥श्रीरामाय नमः ॥

तिशेषः व्याप्ति पंद्रक्ष्यतिभिधाउत्कंधरः उत्कंधरश्रीवा यस्य एवंभूतः सन्दृष्टवान् । तत अन्यस्या ज्येष्ठायाः सविधं समीपं समेत्य आगत्य निभृतं मन्दं आलोला चंचला याहस्तांगुलयस्तासां व्यापारैः प्रेरणरूपैर्वसनस्य अंचलं प्रति च पलपस्वापप्रभृतिं निद्राभंगं कृतवान् । तयास्तहरिरंसया तयाकृतवानित्यर्थः । निभृतेतितस्याः अवगुंठकयेति भावः । अत्र परयोर्द्वयोरुक्तं व्याभावान्न्यूनस्नेहत्वं न कनिष्ठात्वं । उत्तरार्द्धे रसोत्कं व्यातस्नेहाधिक्यं स्पष्टमेवेति । शार्दूलविक्रीडितं वृत्तं ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र.स.टी.
१३

अधीराज्येष्ठाकनिष्ठावतयोदाहरति. अंतरिति. कोपिदक्षिणनायक इतिशेषः घनेकाननेरतिकेलियोग्येनिविडवनेप्रियतमेद्वेप
श्यन्. किंभूतेअंतःकोपकषायिते. अंतर्मनसि यः कोपस्तेनकषायितेकलुषीकृतेतत्रतयोर्मध्येएकांपुष्पस्यअवचयापत्रोटना
पनप्रवदनांसमायोजयत्पुष्पावचयभाजेननप्रसन्नीकुर्वन्नित्यर्थः. अन्यांज्येष्ठांनववधूंनवयौवनांनायिकांसमालिंगति. किं

अधीराज्येष्ठाकनिष्ठायथा. अंतःकोपकषायितेप्रियतमेपश्यन्घनेकाननेपुष्पस्यावचयापनप्रवदनामेकां
समायोजयत्. अर्द्धोन्मीलितलोचनांचलचमत्काराभिरामाननांस्मेराद्र्धधरपदृत्रवांनववधूमन्यांसमालिंग
ति.॥ ॥

भूतामन्यां. अर्द्धमुन्मीलितेयेलोचनेतयोर्यदंचलेकोणेतयोर्यच्चमत्कारस्तेनाभिरामम्माननंयस्याःसातां. अत्रार्द्धमुकुलादृष्टिः.
यथा. अर्धव्याकोशितेकिंचिद्भ्रूमध्योतारकेपुटे. यत्रार्द्धमीलितौसार्द्धमुकुलार्धेस्वप्नदृ इति. पुनः स्मेरंअर्द्धयस्मिन्एवंभूतोऽ
धरपदृत्रवोयस्याःसातां. अत्रापिपूर्ववत्सर्वांद्धेन्निरार्द्धयोःकनिष्ठाज्येष्ठाविभागः. शार्दूलविक्रीडितंवृत्तम्.॥ ॥ ॥ शिवः
१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धीराअधीराज्येष्ठाकनिष्ठापथातयोर्हाहरति·धैर्याधैर्येति·प्रियःकांतः एलीदृशोर्मुग्धिहृयेअनंतकांसाहृ चिरंरत्न द्वंद्वं न्यस्तवान्·किमर्थं प्रीतये·तयोरेवेत्यर्थः·किंभूतयोः·धैर्यंचअधैर्यंचधैर्याधैर्येतयोःपरिग्रहेण ग्रहिलयोः धैर्याधैर्ययुक्तयोरित्यर्थः·ग्रहेरेणादिकइलच् प्रत्ययस्तेन ग्रहिलमितिसाधनीयं·प्रथमत एकस्याःकनिष्ठायाःकरे रत्नंकलयन्परस्याः अन्यस्या ज्येष्ठायाहस्ताहस्तीत्यव्ययं·हस्तेनहस्ते नहस्तेहस्तेवागृहीत्वेदंयुद्धंप्रवृत्तमित्यस्मिन्नर्थेतन्निषाद्व्याजात्कुचतटीस्पर्शआनंदमाविंदतिअनुभवति·अत्रस्फुटएवज्येष्ठाकनिष्ठोदा हरणत्रये·छलमलंकारः·छलमन्यानुरोधेनमुदायस्यप्रकाशनमिति·शार्दूलवृत्तम्॥ ॥इत्यभुक्तरीमास्वकीयांनिरूप्यसंप्रतिपर

धीराधीराज्येष्ठाकनिष्ठावयथा·धैर्याधैर्यपरिग्रहग्रहिलयोरेणीदृशोःप्रीतयेरत्नद्वंद्वमनंतकांतिरचिरंमुग्धिहृये छं
न्यस्तवान्·एकस्याःकलयन्करेप्रथमतोरत्नंपरस्याप्रियोहस्ताहस्तिमिषात्स्पृशन्कुचतटीमानंदमाविन्दति॥ ॥१७
अप्रकटपरपुरुषानुरागापरकीया·साचद्विधा·परोढाकन्यकाच·कन्यकायाःपित्राद्यधीनतयापरकीयता·अस्याउ ॠ

कीयांनिरूपयति·अप्रकटेति·अप्रकटःकोपिनजानात्विति भीत्यापरस्मिन्पुरुषेअनुरागोयस्याः·सापरकीया·अप्रकटपुरुषानुरागोस्तुक्तेमु ग्धायामतिव्याप्तिः·अतउक्तंपरपुरुषेति·प्रकटपरपुरुषानुरागोस्तुक्तेवेश्यायां·अतोऽप्रकटेति·साचद्विविधाद्विप्रकारा·परोढापरेणान्य नद्रुढापरणीता·कन्यकाच·ननुपरोढायाभर्त्राद्यधीनत्वेनपरकीयात्वमुक्तं·कन्यकायास्तुकथमित्याह·कन्यकायाइति·अस्वाधीन त्वमेवपरकीयात्वेप्रयोजकमितिभावः·साविंस्वनानास्यादित्याह·अस्याःसकलचेष्टागुप्तैव·अन्यानवलोकितेत्यर्थः·॥ ॥ ॥

र.स.टी.
१४

परोढाययातथोदाहरति॰अयमिति॰कापिप्रच्छन्नकामिनीसखीमंग्यंतरेणाह॰हेसखि॰कुसुमशरः कामः तस्यसेवायैआराधनायप्र
मुदितोयोग्यः अयंविद्यमानः रेवाकुंजः रेवानदीतत्संबंधीकुंजः लताद्यावृतदेशः अर्थयोग्यकुंजद्वाराअयमग्रधातव्यं॰उक्तंच॰ये
नाप्नोतिपरांमुदंपदगुंफोभिधेयता॰तदर्थंसमादेयंपद्यव्याख्याविवक्षणैरिति॰किंच॰वेलायांयपाकालं॰यद्वा॰कुंजमर्यादायां
तत्रांतइतियावत्॰वेलाकालमर्यादयोरपीत्यमरः॰दरईषद्विदलंस्मोविकसंत्वः॰एलाः तासांपुष्पाणिफलानिवातेषांपरिमलस्तत्संबं
धलब्धोगंधविशेषोयस्मिन्॰नवेतिपाठे॰नवोभिनवोविदलदेलापरिमलोयत्रेत्यर्थः॰एवंभूतोयं॰अनुभूयमानइत्यर्थः॰समीरोवायु

परोढायथा॰अयंरेवाकुंजः कुसुमशरसेवासमुदितः समीरोयंवेलादरविदलदेलापरिमलः इयंप्रावृड्धन्या
नवजलदविन्याससचतुरापराधीनंचेतः सखिकिमपिकर्तुमुद्गायते॥ ॥श्रीगणाधिपतयेनमोनमः

॥

वर्तनेइतिशेषः॰अतएवसमीरयतिकाममितिसमीरइतिव्युत्पत्त्यर्थता॰विमर्दोत्थेपरिमलइत्यमरः॰किंच॰नवजलदविन्यासेनवीन
मेघरचनायांचतुरा॰अतएवधन्या॰मर्त्रैरिहानयनरूपमदुपकारकत्वेनगुणवतीइयंप्रत्यक्षविलसंतीप्रावृड्वर्षाकालः॰मांआनंद
यतीतिशेषः॰इयमितिस्त्रीत्वेनसखीत्वंध्वन्यते॰हेसखि॰चेतश्चित्तंपराधीनंपरस्मिन्नुरुषेअधीनंतद्गुणविशेषवशीकृतंतदप्राप्तावि ९ शिव:
मामवस्थांप्राप्तं॰किमपितत्संगमोपायरूपंकृत्संकर्तुमुद्गायतेविचारयति॰शिखरिणीवृत्तम्॰रसैरुद्रैश्छिन्नायमनसमलागःशि १४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परोढायागुप्तादिभेदैर्वैरुलेकपद्यैर्द्विधेस्साशंकमानंप्रस्तुतत्रयेत्राह॰ गुप्तेत्यादि॰ तत्रापिगुप्तात्रिविधात्रिप्रकारा॰ त्रैविध्यमेवदर्शयति॰ वृत्त
सुरतगोपनेत्यादि॰ त्रितयमविषयातयोदाहरति॰ एकेनेवपद्येन॰ श्वश्रूरिति॰ कापिपरपुरुषप्रसंभोगविज्ञानिनिंहुवानासखींवदति॰
श्वश्रूरिति॰ हेसखिश्वश्रूः कुप्यतु॰ सुहृदोविद्विषंतुवा॰ अथवायातरः भर्तृभ्रातृभार्यानिंदंतु॰ तद्भवनाकर्णमेवक्रोधादिहेतुरिति
भावः॰ भार्याः सुभ्रातृवर्गस्ययातरःस्युः परस्परमितिअमरः॰ किंतुतस्मिन्मंदिरेताभिरादृष्टेगहेइत्यर्थः॰ पुनः अस्मयारमयास्वाप्ये

गुप्ताविदग्धालक्षिताकुलटानुशयानांमुदिताप्रभृतीनांपरकीयायामेवांतर्भावः॰ गुप्तात्रिविधा॰ वृत्तसुरतगोपना॰ व
र्तिष्यमाणसुरतगोपना॰ वर्तमानसुरतगोपना॰ त्रितयमविषया॰ श्वश्रूः कुप्यतुविद्विषंतुसुहृदोनिंदंतुवायातरस्त
स्मिन्किंतुनमंदिरेक्षणविपुनःस्वापोविधेयोमया॰ आखोराक्रमणापकोणकुहरादुत्कालमातन्वतीमार्जारीनखरैःखरैःक्ष
तवतीकांकांनमेदुर्दशाम्॥ ॥

निद्रानेवविधेयः कर्तव्यः॰ स्वापविधानेहेतुमाह॰ आखोः मूषकस्यआक्रमणाय ग्रहणाय कोणकुहरात्गृहप्रांतदेशात॰ उत्कालमातन्वतीकु
र्वती॰ मार्जारीविडाली॰ खरैस्तीक्ष्णैर्नखरैर्नखैः मेममकांकांदुर्दशांविडंबनांनक्षतवती॰ अपितुयादुर्दशाकृतासातवज्ञातेवास्तीतिभावः॰
एतेनवृत्तवर्तिष्यमाणपरपुरुषसुरतगोपनंछद्मनाकृतमिति॰ अत्रव्याजोक्तिरलंकारः॰ व्याजोक्तिः शंकमानस्यछद्मनावस्तुगोपन
मिति॰ उंदुरुर्मूषकोप्याखुः॰ नखोस्त्रीनखरोस्त्रियामित्यमरः॰ शार्दूलविक्रीडितंवृत्तम्॥ ॥श्रीगणाधिपतयेनमोनमः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदग्धाद्विधाद्विप्रकारा. वाग्विदग्धाक्रियाविदग्धाभेदेन. यथेति. तत्रवाग्विदग्धामुदाहरन्ति. निविडतमेति. कापिसंकेतमुपदिशंतीप्र
त्याह. हे पथिक. अघतीव्रे सवितरि सूर्ये सति मध्याह्ने इत्यर्थः. तत्र तस्मिन्सर्वीजुभ्मृत इत्यर्थः. सरित्तटे नदीतीरे तवनिवासो वसतिः समु
चितो योग्यः. किंभूते सरित्तटे निविडतमेति अतिशयेन निविडा निविडतमा ये तमालादृक्षास्तान्. मल्लंते अवलंवंत इति मल्लिन्यः

विदग्धाद्विविधा. वाग्विदग्धाक्रियाविदग्धाच. यथा. निविडतमतमालमल्लिवल्ली विचकि
लराजिविराजितोपकंठे. पथिकसमुचितस्तवाघतीव्रे सवितरितत्रसरित्तटे निवासः॥ ।

मल्ल इ. धृतावितिधातुः तान्यतावल्लयश्चलताः विचकिलाश्चमल्लीभेदास्तेषां राजयः पंक्तयस्ताभिर्विराजितउपकंठः समीपप्रदेशो
यस्य तस्मिन्. अघव. हे विराजित. उपकंठे कंठसमीपे अर्थात्ममवक्षस्थले तवनिवासो योग्य इति वाग्वैदग्धं सूचितम्. अस्मिन्प
क्षे राजंते पदं. राजत इति राट्. तस्मिन्स्फुटतो विचकिलो मल्लीप्रभेदे मदने पि चेति विश्वः. पुष्पिताग्रा छंदः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्रियाविदग्धामुदाहरन्ति· दासायेति· भवननाथे गृहस्वामिनि दासायसेवकाय बदरीं वृक्षविशेषं अपनेतुं छेत्तुं आदिसति आज्ञापितवति सतीत्यर्थः· हरिणाक्षी चपलनेत्रा संकेतवियोगभीत्येति भावः· हेमंते अतीतत्रपानी यस्मात् तिपीतलादिति भावः· पयसि जले कुठारं विनिक्षिपति गोपायतीत्यर्थः· एतेन क्रियावैदग्ध्यं· अत्र कुठारगोपनेन बत्कृता स्वचौर्यरतसंकेतनिकेतगोपनरूपवस्तुध्वनिः· कर्कंधुर्बदरी कोलिः इत्यो: कुठारः स्वधीतिरित्यमरः· आर्याभेदउपगीतिछंदः· तल्लक्षणं

क्रियाविदग्धायथा· दासायभवननाथेबदरीमपनेतुमादिशति· हेमंतेहरिणाक्षीपयसिकुठारं विनिक्षिपति॥ ॥लक्षितायथा· यद्भूतंतद्भूतंयद्भूयात्तदपिवाभूयात्· पद्भवतितद्भवतुविफलस्तवकोपिगोपनायासः॥ ॥

आर्यापराईतुल्ये दलद्वये प्राकृ रूपगीतिं॥ ॥लक्षितामुदाहरति· यद्भूतमिति· कापिसखीवदति· यद्भूतमनुष्ठितंतद्भूतंज्ञातमेवेत्यर्थः· ज्ञातस्यवाक्सहस्रेणाप्यनिवर्त्तनादिति भावः· यदरिष्टं भूयात्· विरुद्धावरणस्यावश्यंभावित्वादिति भावः· तदपि अरिष्टं भूयात्· सम्यक्‌तयास्वीक्रियत इत्यर्थः· वाअथवा· यद्भवति तद्भवतु विलंबतामित्यर्थः· कोपि गोपनायासो गोपविषयकप्रयत्नः· विफलो निष्फल इत्यर्थः· लक्षितत्वादिति भावः॥ ॥

र.स.टी. कुलटामुदाहरन्नाह·एतइति·काचित्कुलटावदति·एतेअंभोधराःमेघाःवारिकणान्जलविन्दून्किरंतिविक्षिपंति·तदप्युक्तमित्या
१६ ह·यतःपुरुषान्जारान्नवर्षंतिअतोऽनुपयोगिनइतिभावः·किंचशैलाःपर्वताःशाद्वलंहरिततृणंउद्गमंतिप्रकटयंति·शिलोच्चय
त्वादकारणिकाइतिभावः·यतःएतेपुनर्नायिकान्जारान्नसृजंति·अपिचतरवःवृक्षाःपरोपकारिणोपित्रैलोक्येत्रिष्वपिलोकेषु

कुलटायथा·एतेवारिकणान्किरंतिपुरुषान्वर्षंतिनांभोधराःशैलाःशाद्वलमुद्गमंतिनसृजंत्येतेपुनर्नायकान्·
त्रैलोक्येतरवःफलानिसुवतेनैवारभंतेजनान्धातःकातरमालपामिकुलटाहेतोस्त्वयाकिंकृतम्॥ ॥ ॥

त्यर्थः·फलानिसुवतेउत्पादयंति·अस्मदुक्तार्थविपर्ययेणकल्पवृक्षादयोप्यकारणिकाजाताइतिभावः·यतःजनान्जारान्नैव
आरभंतेनोत्पादयंतीत्यर्थः·अतःहेधातर्ब्रह्मन्त्वयाविश्वसृजाकुलटाहेतोःस्वैरिण्यर्थेकिंकृतंनकिंचिदपिकृतमित्यर्थः· शिवः
जाराणांविरलप्रचारत्वादितिभावः·अतःकातरंयथास्यात्तथाआलपामिदीनोपालंभंवदामीत्यर्थः·शार्दूलवृत्तम्॥ ॥ १६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुशयानामुदाहरति· साधिवेष्ठाविशेषेणत्रिप्रकारेत्याह· वर्त्तमानस्थानेत्यादिना· प्रत्येकमेकामेकांप्रतिप्रत्येकमुदाहरणा
नि· अनुक्रमेणतिसृणामपीत्यत्र वर्त्तमानस्थानविघट्टनेनानुशयानामुदाहरन्नाह· समुपागतवतीति· शिवाशिवेतिखेदे· सुद
शः शोभननयनायाः· कपोलपाली गंडस्थली· तालीदलस्यतालीवृक्षपत्रस्यद्युतिंपांडुरांकांतिंलेभेप्राप्तवती· संकेतस्थानविघ

वर्त्तमानस्थानविघट्टनेनभाविस्थानाभावशंकया· स्वानधिष्ठितसंकेतस्थले भर्त्तुर्गमनानुमानेनचअ
नुशयानात्रिविधाभवति· प्रत्येकमुदाहरणानि· समुपागतवतिचैत्रेनिपतितपत्रेलवंगलतिकायाः·
सुदृशः कपोलपालीशिवशिवतालीदलद्युतिंलेभे·॥ ॥

ट्टनविषादेनेतिभावः· क्वसति· लवंगलतिकायाः संकेतरूपायाः· लतेवलतिकेत्यानुकंपायांकन्· पत्रपातेनदीनेवदृश्यतइति
युक्तं· तस्यामनुकंपार्हत्वंतस्याः निपतितानिपत्राणि यस्मिन्तस्मिन्चैत्रेमासिस्वसंकेतनाशके समुपागतवतिप्राप्तवतिसति·
आर्याभेदागीतिश्छन्दः· आर्याप्रथमार्द्धसमंयस्यामपरार्द्धमाहृतांगीतिम्॥ ॥श्रीमन्मकुलमर्त्त्येनमोनमः॥ ॥

र. स. टी. माविस्यानामावशंकया अनुशयानां उदाहरति। निद्रालुके कीति। काचित्स्वसखीं चौर्यरतसंकेतप्राप्तिमपश्यंती माश्वासयंती
९७ वदति। हे तन्वि कृशांगि न खिद्यस्व खेदं न प्राप्नुहि। तत्रापि प्रियपवसतौ किं पंति वनानि न संति किंतु बहूनि भवंतीत्यर्थः। अतः प्रिय
तमस्य गृहं याहि प्राप्नुहि। किंभूतानि वनानि। निद्रालवो निद्राशीलाः ये केकिनः प्रसंसापाश्रितिः प्रशस्ता केकावाणी येषां ते

निद्रालुकेकिमिथुनानि कपोतपोतव्याधूततन्नतनमहीरुहपल्लवानि। त
त्रापि तन्वि न वनानि किं पंति संति खिद्यस्व न प्रियपतमस्य गृहं प्रयाहि॥ ॥

वर्हिणस्तेषां मिथुनानि स्त्रीपुंसरूपाणि येषु तानि। एतेन जनसंचरणराहित्यं केकीत्यनेन घनवनस्य मेघोदयध्वननं
पुनः कपोतानां पक्षिविशेषाणां पोता बालकास्तैर्व्याधूताः कंपिता नतनमहीरुहाणां पल्लवा येषु तानि। एतैर्विशेषणैर्जरद्विला शिवः
सिनस्थपलसंभोगान्नायिकायाः कंठकूजनाधरपल्लवादिध्वननं ध्वनते। व्याजोक्तिरलंकारः। वसंततिलकं छन्दः॥ ॥ ९७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वेनात्मनाअनधिष्ठितं यत्संकेतस्थलं तस्मिन्. तस्य गमनानुमानेन वाऽतिरिक्ता मनुशयानां ग्राह. कर्णकल्पितेति. राधया मधुरिपुः श्री
कृष्णो निरीक्ष्यते दृश्यते. किंभूतया. निष्पतंती गलंती नयनाभ्यां वारिधारा यस्यास्तया. कृतसंकेते तेनेनागतं मयानागतमिति विषादेनै
ति भावः. किंतो मधुरिपुः. कर्णकल्पिता यारचिता या रसालमंजरी अहमागतस्त्वं नागतेति. राधाविश्वासार्थं सांकेतकाम्रमंजरी. तथापिं
जरीकृतं हरितालीकृतं कपोलमंडलं गंडस्थलं यस्य सः. पिंजरं पीतनंतालमालं व हरितालकमित्यमरः. रथोद्धता छंदः. तल्लक्षणं. रान्सरैनैन

कर्णकल्पितरसालमंजरीपिंजरीकृतकपोलमंडलः. निष्पतन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥ ॥
मुदिता यथा. गोष्ठे प्रतिष्ठति पतिर्वधिरा ननंदा नेत्रद्वयस्य नवपाटवमस्ति यातुः. इत्थं निशम्य तरुणी कुचकुंभसीम्नि
रोमांचकंचुकमुदंचितमाततान. ॥ ॥

गलैरथोद्धता ॥ ॥मुदिता यथा तामुदाहरति. गोष्ठेति. काचित्स्वगृहे वासयितुमिच्छंती पथिकं वदति. पतिर्भर्त्ता गोष्ठे प्रगोनिवासस्था
ने प्रतिष्ठति. अहर्निशमिति भावः. ननांदा भर्तृभगिनी वधिरा. वपुनः यातुः भर्तृभ्रातृभार्याया: नेत्रद्वयस्य पाटवं पटोर्भावआरोग्यमि
ति यावत् नास्ति अंधेत्यर्थः. इत्यमनुनाप्रकारेण पथिकं प्रति संकेतोपगर्भसखीवचनं निशम्य श्रुत्वा नायिका कुचकुंभयोः सीम्नि प्रदे
शे रोमांच एव कंचुकं ऽदंचितं ऊर्ध्वगतं माततान. मयायं पापड्यमोग्य इत्यानंदाद्धित्तार यति स्मेत्यर्थः. वसंततिलकं छंदः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परकीयांप्रदर्शयकन्यकामुद्दाहरन्नाह·कन्यकायथेति किंचिदिति· नृपकन्यका राजकन्या मुहुःकृतिनं पुरुषं वं तं सव्याजं यथास्यात्तथा किमपि व्या
जमाश्रित्येत्यर्थः· धार्ष्ट्यभावादिति भावः· आलोकते कामाधीनतया विलोकयतीत्यर्थः· किंभूता राजकन्या· स्फुरंती अंगुली यकानां मुद्रि
कानां रुक् कांतिर्यस्याः तया अंगुल्या· गंडस्य कपोलस्य कंडूयनं कुर्वाणा कर्षं विलोकत इत्याह· किंचित्कुंचिता नितिर्यक्करणादिति भा
वः· हारयष्टिः हारलता यस्यां क्रियायां तद्यथा स्यात्· पुनः तरले कुटिले साभिलाषावलोकने नेति भावः· भ्रूवल्ल्यौ भ्रूलते यत्र क्रि

कन्यकायथा· किंचित्कुंचितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं प्रांतभ्रांतविलोचनद्युतिभुजापर्यस्तकर्णोत्पलम्·
अंगुल्या स्फुरदंगुलीयकरुचा गंडस्य कंडूयनं कुर्वाणा नृपकन्यका मुहुःकृतिनं सव्याजमालोकते·॥ ॥

यायां तथा किंच साचि तिर्यक् स्मितं यथा स्यात्· अन्यापदेशो नेति भावः· प्रांते भ्रांत विलोचनयोर्नेत्रयोर्द्युतिः कांतिर्यत्र क्रियायां तथा· अ
न्ये त्रपया न गच्छत्वपमिति भीत्येत्यर्थः· पुनः भुजायां पर्यस्तं पतितं कर्णोत्पलं यत्र क्रियायां तद्यथा स्यात्· कामवशात्तथा कंडू
यनादिति भावः· भुजा च गुर्वी मिति माघे· अतः स्त्रीलिंगेपि भुजाशब्दः· शार्दूलविक्रीडितं वृत्तम्॥ ॥श्रीरामायनमः॥ ॥ शिवः
१८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंपरोढां निरूप्य सामान्यवनितां दर्शयति· वित्तमात्रेति· वित्तमात्रोपाधिकः सकलपुरुषाभिलाषो यस्याः सा वित्तमात्रोपा
धिके त्वुक्ते परकीयायामतिव्याप्तिः· तस्याः कदाचिद्वित्तोपाधिप्रवृत्तित्वात्· अतो मात्र इति· यद्येवमिहाव्याप्तिरित्याशंकमा
न आह· नन्विति· अग्निमित्रे क्षितिपतौ राज्ञि अनुरक्तायामैरावत्यां वेश्यायां अव्याप्तिलक्षणस्याप्रवर्त्तनमित्यर्थः· तत्र

वित्तमात्रोपाधिकसकलपुरुषाभिलाषा सामान्यवनिता· नन्वग्निमित्रे क्षितिपतावनुरक्तायामैरा
वत्यामव्याप्तिस्तत्र वित्तमात्रोपाधेरभावादिति चेन्मैवम्· सापि काश्मीरहीरादिदातरि महाराज्ञेऽनु
रक्ता न तु महर्षौ ति नागम्यते· तत्रापि वित्तमात्रोपाधिरिति·॥ ॥श्रीगणाधिपाय नमः॥ ॥

तस्यां वित्तमात्रोपाधेरभावादिति चेत्· उचित इति शेषः· एवं मा वक्तव्यम्· सापि ऐरावती काश्मीरहीरादीनां दातरि महा
राज्ञेऽनुरक्ता न तु महर्षौ ति नावगम्यते ज्ञायते· तत्रापि तस्यामपि वित्तमात्रोपाधिरिति·॥ ॥श्रीभैरवाय नमो नमः॥ ॥

सामान्यवनितायथातयामुदाहरति. दृष्ट्वेति. कुरंगीदृशो मृगनेत्रायाः. वक्षोजौ स्तनौ. परस्परमाश्लेषमिव तन्वतः कुरुतइ
र.स.टी. त्यर्थः. किं कृत्वा. प्रांगणस्य समीपे चत्वरसन्निधौ बहुधनं प्रयच्छंतं दातारमभ्यागतं दृष्ट्वा विलोक्य. किंच. कुंतलः कुंतलाक
९६ वाः संति अस्मिन्‌ संपततीति कुंतलो धम्मिलः. अर्शआदिभ्योच्‌ प्रत्ययः. मालामिषाद्व्याजादानंदो हर्षः धनप्राप्त्येतिभा

सामान्यवनितायथा. दृष्ट्वा प्रांगणसन्निधौ बहुधनं दातारमभ्यागतं वक्षोजौ तनुतः परस्परमिवाश्लेषं
कुरंगीदृशः. आनंदाश्रुपयांसि मुंचति मुहुर्मल्लीमालाभिषात्कुंतलो दृष्टिः किं वधनागमं कथयितुं कर्णांति
कं गच्छति॥ ॥एता अन्यसंभोगदुःखिता वक्रोक्तिगर्विता मानवत्यश्चेति तिस्रो भवंति॥ ॥ ॥

वः. तेन अश्रुपयांसि अश्रुबिंदुमिव विसृजंति. आनंदाश्रूणां स्वच्छत्वात्. पुष्पसाम्यं किंवा दृष्टिधनागमं धनप्राप्तिं कथयितुं क शिवः
र्णांतिकं कर्णसमीपं गच्छति. धनागमानंतरादिति भावः. शार्दूलविक्रीडितं वृत्तम्॥ ॥एवं स्वीयापरकीयासामान्यवनितास्तद्भे ९६
दान्निरूप्यान्यदपि निरूपयति. एताः पूर्वोक्ताः अन्यसंभोगेन दुःखिताः वक्रोक्तिभिर्गर्विताः मानवत्यो मानयुक्ताश्चेति तिस्रः।

अन्यसंभोगेन दुःखिता यथा। त्वं दूतीति। हे दूति मत्तवेदखिन्ने दु दु उपतापे इति धातोः। हृदय इति सुलसात्वं कुंजं निरगाः मत्प्रिय
विरहदुःखतुल्यत यादुःखितमात्मानं सुखयितुं कुंजप्रदेशं गतवतीत्यर्थः। नु पुनः पापीयसो विप्रियकारिणो गृहं तत्स्थानपनेनं तु म
सुखार्यसिद्यान्यथासक्त इति किंतद्गृहगमनेनेति भावः। किमिदं वदसी चेत्तत्राह। अन्यथानेवं चेत। देहे अंगे किंशुकाभरणं कथं

अन्यसंभोगदुःखिता यथा। त्वं दूतिनिरगाः कुंजं न तु पापीयसो गृहम्। किंशुकाभ
रणं देहे दृश्यते कथमन्यथा॥ ॥वक्रोक्तिगर्विताद्विविधा। प्रेमगर्विता सौन्दर्यगर्विताच।

श्यते सर्वमप्रियं त्वयासंपादितमिति सोपहासं प्रियप्रयुक्त दूतीनखक्षतादिदर्शनेन नायिकायादुःखागमनप्रतीतिर्व्यज्यते।
किंशुकचिह्नेन कुंजगमनानुमानमित्यनुमानालंकारः। अनुमानं तु कार्यादेकारणस्यावधारणमिति। सव वक्रो यथा आजन्म
त्यागेन नखक्षतेषु। किंशुकापह्नवेनाथाज्ञप्तेति मुखे निंदाप्रतीतिर्वा रूढिरस्येति॥ ॥वक्रोक्तिगर्विता द्विविधं दर्शयति। प्रेमग
र्विता सौंदर्यगर्विताच॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र.कु.टी. २०

प्रेमगर्वितोदाहरणमाह·वपुषीति·काचिदात्मानमधिकंमन्या सखीं वदति·हेसखि·अत्रतवेतिपदमुभयत्रयोज्यं काकाक्षिन्मा
येन·तवप्रभुः स्वामीतववपुषिरत्नभूषांतनोतीति·इतिहेतोः धन्यतमाऽसि स्वाधीनभर्तृकात्वादतिशयेनधन्यासीत्यर्थः·किंब्रवी
मिन किंचित्तद्धीनं वक्तुं शक्यते इत्यर्थः·तथाहमित्याह·मेकांतः विभूषणानि न कलयति न धारयति·किंभूतः तनुनयनांतरालभी
रुः·तनुर्ममनयनंतदीयंतयोरंतरालंव्यवधायकंतेनभीरुः भूषायांमदंगांतरालंजानन्नित्यर्थः·धन्यतमेतिस्वाधियकपनाय

यथा· वपुषि तव तनोति रत्नभूषां प्रभुरिति धन्यतमाऽसि किं ब्रवीमि· सखि तनुनयनांतरालभीरुः कलयति मे न विभूष
णानि कांतः॥ ॥सौन्दर्यगर्विता यथा· कमलपतिकमलोपमानमक्ष्णोः प्रथयति या विधुधारणस्य साम्यम्· सखि कथय
किमाचरामि कांते समजनि तत्र सहिष्णुतैव दोषः॥ ॥

व्यतिरेकालंकारः·उक्तंच·उपमानाद्यदन्यस्य व्यतिरेकः स एव सः इति·पुष्पिताग्रा छंदः·सौन्दर्यगर्वितायथेतितामुदाहरति·कलपतीति·
काचित्सखीं वदति·हेसखि कांते प्रेयसि किमाचरामि किं करोमि तत्कथय उपदिशेत्यर्थः·तत्र तस्मिन्कांते सहिष्णुतैव तादृक् वाक्य शिवः
सहनशीलत्वमेव दोषः·समजनि संजातः·किंभूते कांते·मेऽक्ष्णोः कमलोपमानं कमलतुल्यं कलयति कथयति सतीत्यर्थः· २०
पुनः मे वा विधुधारणस्य अमृतद्रवं स्य साम्यं समतां प्रथयति प्रख्यापयति सतीत्यर्थः·पुष्पिताग्रा छंदः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानवती यथेतितामुदाहरति॰ प्रियापराधंस्वचयतीति॰ स्व विकारवंम्तावेष्टामानैः॰ सवलघुर्मध्यमोगुरूश्चेत्पा घुदाहरण
पर्यतं स्पष्टम्॰ उक्तंवरुद्रभट्टे॰ सप्रपासोभवेत्रेधा कामिनीनांप्रियंप्रति॰ अवेक्ष्य दोषमेतस्य गरीयान्मध्यमोलघुरिति॰ अपरस्त्रीद
र्शनादिजन्याथ येतितंमानमुदाहति॰ स्वेदांबुभिरिति॰ काचित्सखीवदति॰ हेशातोदरि॰ शातंकृशमुदरंयस्याः सातत्संबोधनं॰ प्रि

मानवतीयथा॰ प्रियापराधस्वविकावेष्टामानः॰ सवलघुर्मध्यमोगुरूश्च॰ अस्यायनेयोलघुः कष्टतरायनेयो
मध्यमः॰ कष्टतमापनेयोगुरुः॰ असाधक्तरसाभासः॰ अपरस्त्रीदर्शनादिजन्मालघुः॰ गोत्रस्खलनादिजन्मामध्य
मः॰ अपरस्त्रीसंगमादिजन्मागुरुः॰ अन्यथासिद्धकुतूहलाघपनेयोलघुः॰ अन्यथावादशपथाघपनेयोमध्यमः॰
चरणपातभूषणदानाद्यपनेयोगुरुः॰ अपरस्त्रीदर्शनादिजन्यायथा॰ स्वेदांबुभिः कृवनपिच्छिलमंगमेतच्छा
तोदरिकृवनकंटकितंचकास्ति॰ अस्मांविलोकयतिभाषयतिप्रियेपिमानःकदास्यतिपदंतवतन्नविघ्नः॥ ।

येकांते॰ अस्मामपरांनायिकांविलोकयतिसतिनविलोकनमात्रंकिंतुभाषयत्यपिसति॰ तवमानः क कस्मिन्प्रदेशेपदंचरणंदास्यति
तस्यदंस्थानंनविघ्नःनजानीमः॰ यतः एतदंगंकृवनप्रदेशेस्वेदांबुभिःपिच्छिलंआप्तं॰ कृवनप्रदेशेकंटितंसंजातकंटकं॰ उभयत्रा
पीर्ष्योदयेनस्वेदरोमांचपुनत्वमितिभावः॰ चकास्तिशोभते॰ किमिवहिमधुराणांमंडनंनाकृतीनांमितिभावः॰ स्वेदांबुभिः कृवनं

पिच्छिलमंगमभ्रवितपपाठोऽसमंजसत्वात्
वसंततिलकंछंदः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रस्खलनादिजन्यापयातयोदाहरति· यज्ञोत्रेति· हेतन्वि· यज्ञोत्रस्खलनं सपत्नीनामोच्चारणमित्यर्थः· तत्रोच्चारणे यदि भ्रमोनुमन्य
र.स.टी. गोत्रस्खलनादिजन्यापयातयोदाहरति· यज्ञोत्रेति· हेतन्वि· यज्ञोत्रस्खलनं सपत्नीनामोच्चारणमित्यर्थः· तत्रोच्चारणे सपत्नीनाम कारयत द्योषपरिहाराय शपथं कुर्वतं प्रेर
२१ तेत्वयेति भावः· तर्हि रोमालिः रोमश्रेणिः सैव व्यालः सर्पस्तस्य संस्पर्शं तत्प्रकारकं सपथं कारयत द्योषपरिहाराय शपथं कुर्वतं प्रेर
येत्यर्थः· अनुष्टुप्छंदः॥ ॥अपरस्त्रीसंगमादिजन्यापयातयोदाहरन्नाह· दयितेति· मुग्धशोनापिकापानयनस्येत्येकस्यैव प्रेक्ष्यत

गोत्रस्खलनादिजन्यापया· यज्ञोत्रस्खलनं तत्र भ्रमोपदिनमन्यते· रोमालिव्यालसंस्पर्शं शपथं तन्विकार
य॥ ॥अपरस्त्रीसंगमादिजन्या· दयितस्य निरीक्ष्य भालदेशं चरणालक्तकपिंजरं सपत्न्या· मुग्धशोनय
नस्य कोणभासाकृतिभुक्ताः शिखरोपभाव भूवुः॥ ॥श्रीमन्मङ्गलमूर्तये गणाधिपायनमः॥ ॥

वंधादेकत्वं· कोणभासा प्रांतकांत्याकृतिभुक्ताः कर्णावतंसीकृतमुक्ताफलानि शिखरोपमादाडिमबीजतुल्यावभूवुर्जाताः
तिर्यगवलोकोस्यैत्यर्थः· ओपछंदसिकं छंदः॥ ॥तल्लक्षणं· यद्विषमेषोसमेकलाप्राप्तवसमेष्टनोनिरंतराः समानपदे
सापराधे प्रेयसि कोपेनेति भावः·· किं कृत्वा सपत्न्याः चरणालक्तकेन पिंजरं पीतरक्तवर्णं दयितस्य प्रियस्य भालदेशं निरीक्ष्य
श्रिताकलावैतालीयेतेरलौगुरुः· तत्रैवांतोधिकेस्यादोपछंदसिकं कवीन्द्र हृद्यं· तत्रैव वैतालीये प्रतिपादमंते धिके गुरौ
शिवः
२१

प्रासंगिकत्तयातासां भेदांतरान्निरूपयति॰ एता इति॰ षोडशेति॰ यथा मध्याप्रगल्भयोः प्रत्येकं धीरादिभेदाः षट्॰ पुनस्तयोर्ज्ये
ष्ठाकनिष्ठत्वेन षट्॰ एवं द्वादश॰ मुग्धात्वेकैवेति मिलित्वात्र योदश॰ परकीया द्विविधा॰ एकावेश्येति षोडश॰ प्रत्येकं एकं ए
कं प्रति अष्टविधाः ता अवस्था आह॰ प्रोषितेति॰ प्रोषितो देशांतरं गतो भर्त्ता यस्याः सा खंडिता॰ अन्यासक्तत्वेन यस्या विप्रक्तेत्य

एताः षोडशाप्यष्टाभिरवस्थाभिः प्रत्येकमष्टविधाः प्रोषितभर्तृका १ खंडिता २ कलहांतरिता ३ विप्रल
ब्धा ४ उत्का ५ वासकसज्जा ६ स्वाधीनपतिका ७ अभिसारिका वेति गणनाद् अष्टाविंशत्यधिकं शतभे
दा भवेति॰ तासामपि उत्तममध्यमाधमगणनेन यावत्चतुरशीतियुतं शतत्रयं भेदा भवंति॰॥ ॥ ॥

र्थः॰ २ कलहेन अंतरिता हतेत्यर्थः॰ ३ विप्रलब्धा विप्रलंभेन विसंवादेन युता विमनस्केत्यर्थः॰ ४ उत्का उत्कंठितेत्यर्थः॰ ५ वासक
व वासकस्तत्र सज्ज पति तल्पादिकं सा॰ ६ स्वाधीनः पतिर्यस्याः सा॰ ७ स्वयमभिसरति अभिसारयति वा सा ८ इति एवं गणनात॰
स्पष्टं तासां नायिकानां मध्युत्तमादिगणनेन या शतत्रयं चतुरशीत्यधिकयुत भेदा भवंति॰ तथा च रुद्रः॰ त्रयोदशविधा स्वीया द्वि

विधा च परांगना॰ एकावेश्याऽनूढाष्टाअव
स्थाभेदतो मताः॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनश्चताः स्त्रियः सर्वाउत्तमाधमनिराकरणायतमनुवदति· यत्विति· एतासामनंतरंगणितानांदिव्यादिव्योभयेत्याधर्ज्जनाद
यदसंतंस्पष्टम्· यद्यपीति· मुग्धायाअधिकायाधीरादिभेदस्याभावः· तथाविधधीरादिप्रकाराणांप्रज्ञासामग्र्यीतस्याअभा

यत्तुएतासांदिव्यादिव्योभयभेदगणनेनयाह्दिपंचाशदधिकशतयुतंसहस्रंभवति· दिव्याइन्द्राण्याद
यः· अदिव्यामालत्यादयः· दिव्यादिव्याःसीतादयइति· तत्र· अवस्थाभेदेनैवनायिकानांभेदात्· ज्ञातिभे
देनभेदस्वीकारेनायकानामप्येवमानंत्यंस्यात्· इन्द्रादयोदिव्याः· अदिव्यामाधवादयः· दिव्यादिव्या
अर्जुनादयइति· यद्यपिमुग्धायायधाधीरादिभेदाभावस्तथाविधप्रज्ञासामग्र्यभावात्तथाप्यविध
त्वाभावोपिभवितुमर्हति· तथापिप्राचीनलेखनानुरोधेननवोढामध्यालंब्यैतेभेदाअवगंतव्याः॥ ॥

वात्· तथाष्टाविधत्वाभावोपिभवितुमर्हतीत्याशयोभवति· तथापीति· प्राचीनानांलेखपरंपरानुरोधेनाग्रहेणनवोढांलज्जाभय
पराधीनरूपांमुग्धामवलंब्याश्रित्यएतेभेदाः प्रोषितभर्तृकादयः अवगंतव्याः ज्ञातव्याः॥ ॥श्रीरामायनमः। ।

Sanskrit University, Balmeeki Campus, Kathmandu

तत्रप्रोषितभर्त्तृकांदर्शयति· देशांतरगत इति· देशांतरेति पदेनोत्कादिष्वतिव्याप्तिंनिराकरोति· उत्केत्यादिलक्ष्यं· अस्याः प्रोषितभर्त्तृकाया
श्चेष्टाक्रिया· दशावस्था· अभिलाषचिंतादयोवक्ष्यमाणाः मुग्धांप्रोषितभर्त्तृकामुदाहरति· दुःखमिति· अंबुजमुखीमुग्धा· प
त्तदित्यध्यं· यतोहेतोः संतापंसहते· तत्तंहेतुंवेत्तोभवः कामोवेदजानाति· दृष्टुपत्यादितिभावः नान्य इत्यर्थः· सेतापमेवा

देशांतरगतेप्रेयसिसंतापव्याकुलाप्रोषितभर्त्तृका· उत्काकलहांतरिताविप्रलब्धानांपतिर्देशांतरगतो
नभवतीतिनतत्रातिव्याप्तिः· अस्याश्चेष्टादशावस्था· मुग्धाप्रोषितभर्त्तृकायथा· दुःखंदीर्घतरंवहत्य
पिसखीवर्गायनोभाषतेशैवालैःशयनंसृजत्यपिपुनः शेतेनवालज्ञया· कंठेगद्गदवाचभंवतिदृशो
र्धत्तेनवाष्पोदकंसंतापंसहतेयदंबुजमुखीतद्वेदचेतोभवः॥ ॥श्रीगणाधिपायनमः॥ ॥

ह· दीर्घतमतिशयेनदीर्घंयत्तरमित्यर्थः· दुःखंवहत्यपिधारयत्यपिसखीवर्गायसखीसमूहायलज्जयेतिसर्वत्रसंबंधः· नोभा
षतेनकथयतीत्यर्थः· पुनः शैवालैर्जलनीलिभिस्तृणविशेषैः शयनंशय्यांसृजत्यपिरचयत्यपिनवाशेतेनिद्राति· पुनः कंठे
गद्गदवाचंस्खलितांगिरंअंचतिगच्छति· प्राप्नोतीत्यर्थः· दृशोर्नेत्रयोर्वाष्पोदकंनधत्तेनदधाति· विशेषोक्तिरलंकारः· शार्दूलवृत्तं

र. स. टी. मध्यां प्रोषितभर्तृकामुदाहरति. वास इति. काचित्सखी वदति. हे सखि वपुषो वासो वसनं तदेवातिसूक्ष्ममिति भावः. हस्तस्य वल
२३ यं कंकणं तदेव हस्तपोषमित्यर्थः. वपुनः जघनस्य वराश्रेष्ठापटिमितत्वादिति भावः. कांची सैव वाचाला बहुभाषिणी भंगात्तैः
सुभगे सुरभौ वसंते सति अधसमस्तं वास इत्यादि तेन वाधिकं भवति. विरहवेदनया कृशत्वादिति भावः. किं निदानं किं कारणमि

मध्याप्रोषितभर्तृका यथा. वासस्तदेव वपुषो वलयं तदेव हस्तस्य सैव जघनस्य वराव कांची. वाचा
लभंग सुभगे सुरभौ समस्तमधाधिकं भवति ते सखि किं निदानम्.॥ ॥श्रीगणेशाय नमः॥ १

ति. आलजाटवो बहुभाषिणीति स्त्रैणकुत्सितार्थे आलच्. अत्र विरिविषपक्षे नासच्छलेन वा कुत्सितत्वं. अत्र नर्मस्फोटाल
कारः. नर्मस्फोटस्तु भावनां सूचितात्परसे लवैरिति. पर्याप्तिं तव: स्त्रीकथाः क्लीवे तु जघनं पुरः. वसंते पुष्पसमयः सुर शिवः
भिरित्यमरः. वसंततिलकं छंदः.॥ ॥श्रीमन्मकुलमर्त्तीये महागणाधिपतये नमो नमः॥ ॥श्रीमच्चन्द्रामरदाय. २३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रोढाप्रोषितभर्तृकापयेतितामुदाहरति॰ मालेति॰ काचित्सखी प्रौढांप्रियरहितांसखींवीक्ष्यवदति॰ मुक्त्वोनायिकायाः
वालांबुजदलमयीवालानिकोमलानिअंबुजदलानिप्राचुर्येणयस्यांसामाला॰ तथामौक्तिकीमुक्तानिर्मिताहारयष्टिहार
लता॰ तथाकांचीक्षुद्रघंटिकाविविधदुःखहारिणीहस्तेकृतेप्रभवति॰ प्रकर्षेणगुणादिसंपत्त्याप्रभवतीतिप्रभवनत

प्रोढाप्रोषितभर्तृकायथा॰ मालावालांबुजदलमयीमौक्तिकीहारयष्टिःकांचीपातेप्रभवतिहरौसत्व
वःप्रस्थितेव॰ अन्यद्भूमःकिमपिधमनीवर्ततेयानवेतिज्ञातुंवाहोरहहवलयंपाणिमूलंप्रयाति। ।

स्मिन्पातेगच्छतिप्रस्थानंकृतवतीत्यर्थः॰ प्रस्थितेवहृतगमनेवकमलदलमालायाःमुक्ताहारस्यचसंतापात॰ कांच्याःकृश
त्वात॰ प्रस्थानमिति॰ अन्यत्किमपिआश्चर्यंब्रूमः॰ अहहेतिखेदे॰ धमनीनाडीवर्ततेनवाइतिज्ञातुंवाहोर्वलयंपाणिमूलंहस्त
मूलंप्रयातिगच्छति॰ अत्रप्रकर्षेणैवप्रागल्भ्यं॰ नाडीतुधमनीत्यमरः॰ मंदाक्रांताछंदः॰ मंदाक्रांताम्बुधिरसनगैर्मोभ

॥ टीटी पद्यसम्म ॥ ॥

र॰ स॰ टी॰ २४

परकीयां प्रोषितभर्तृकामुदाहरति॰ श्वश्रूरिति॰ श्वश्रूः पतिमाता पत्रदलं ददाति॰ कौतूहलेनेति भावः॰ तदपि दलं नयाम्रसंज्ञया भ्रूसंगास्त्रवनेन गृह्यते स्वीक्रियते॰ च पुनः सद्यस्तत्क्षणे या मर्मरशंका शुष्कपर्णध्वनिशंका तया स्पर्शी मात्रेणैव शुष्कीभवेदिति मम विरहतापं माज्ञासीदिति शंकयेत्यर्थः॰ पाणिना न संस्पृश्यते॰ किंच॰ कुरंगीदृशा कुरंगी स्वगीते

परकीया प्रोषितभर्तृका यथा॰ श्वश्रूः पत्रदलं ददाति तदपि भ्रूसंज्ञया गृह्यते सद्योमर्मरशंकया नवलतासंस्पृश्यते पाणिना॰ मातुर्वा विरहज्वरस्य वचसा प्रत्युत्तरं दीयते श्वासैः किंतु न मुच्यते हृतमहः क्रूरः कुरंगीदृशा॥ ॥

ह द्रुक यस्यास्तया भी त्याच कितद्रोति भावः॰ मातुर्भर्तृ मातृजाया मातः वा विविधविरहज्वरस्य स्वस्वीगतस्येव वचसा प्रत्युत्तरं प्रतिवचनं दीयते॰ किंतु उत्तरहेतुभिः नतु क्रूरः श्वासो न मुच्यते॰ पूर्ववत् शंकयेति भावः॰ अत्र प्रच्छन्नकामित्वं प्रकटमेव॰ शिवः २४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यवनिताप्रोषितभर्तृकायथोमुदाहरति॰ विरहेति॰ द्वारदेशेउपविष्टापुरःपोषितवेश्या॰ इतिहेतोः अक्ष्णोर्नेत्रयोर्मणि
वानांनिवयंसमूहंस्वस्यनिक्षिप्यवाष्पोदविन्दून॰ अम्बुजलकणाः विसृजतिप्रकटयति॰ इतिकिं कांतः कामी॰ अंतर्मनसि
स्वस्येत्यर्थः॰ विरहेणविदितंज्ञातंमेममप्रेमस्नेहंविज्ञापयस्वविषयकं मत्प्रेमज्ञात्वेत्यर्थः॰ तस्माद्देशादेत्यआगत्यपुनर

सामान्यवनिताप्रोषितभर्तृकायथा॰ विरहविदितमंतःप्रेमविज्ञायकांतः पुनरपिवसुतस्मादेत्यमेदा
स्यतीति॰ मणिवनिवयमक्ष्णोर्न्यस्यवाष्पोदविंदून्विसृजतिपुरःपोषिद्वारदेशोपविष्टा॥ ॥अ
न्योपभोगविन्हितः प्रातरागच्छतिपतिर्यस्याःसाखंडिता॰ प्रातरित्युपलक्षणं॰ अस्याश्चेष्टा॰ अस्फुप
लापचिंतासंतापनिःश्वासतूष्णीभावाश्रुपातादयः॰

पिद्रव्यंवद्रतुद्रव्यंदास्यति॰ अत्रापन्हुतिरलंकारः॰ मालिनीछंदः॥ ॥अथखंडितांदर्शयति॰ अन्योपभोगेतिस्पष्टम॰ प्रात
रित्यकालस्याप्युपलक्षणं॰ ननुनिपामकमितिसर्थः॰ अस्याः खंडितायाः चेष्टाव्यापारः॰ अस्फुटालापेतिस्पष्टम॥ ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

र.म.टी. मुग्धाखंडितायथेतितामुदाहरति· वक्षइति· प्राणेशः पतिः नवोढसुदृशः नवोढायासौसुदृक्‌चतस्यानायिकायाः नयनंनेत्रंपा
२५ णिनाअपिदधेआच्छादयत्· किंभूतायाः सुदृशः वक्षउरस्थलंकलशांकितंयविह्नितं· किमुवितर्के· इति इत्थंकिमपिविह्न
दिकंप्रष्टुंइच्छन्त्यावास्तवेनान्यनायिकास्तनभोगविह्नं मुग्धत्वान्वच्छन्त्याइत्यर्थः· आर्यायेदंउपगीतिः॥ ॥मध्याखंडि
तायथेमुदाहरति· वक्षोजविह्नितमिति· बालानायिका· नात्रबालाशब्दोमुग्धात्वपरः· किंतु· बलसंभक्तावितिधातुस्तेन

मुग्धाखंडितायथा· वक्षः किमुकलशांकितमितिकिमपिप्रष्टुमिच्छन्त्याः नयनंनवोढसुदृशः प्राणे
शः पाणिनापिधत्ते॥ ॥मध्याखंडितायथा· वक्षोजविह्नितमुरोदयितस्यवीक्ष्यदीर्घंनिःश्वसितिज
ल्पतिनैवकिंचित्· प्रातर्जलेनवदनंपरिमार्जयंतीबालाविलोचनजलानितिरोदधाति॥ ॥

बलतेसंभजते· धीराधीरत्वतत्परः दयितस्यप्रियस्यवक्षोजविह्नितंअन्यनायिकास्तनविह्नितंउरोवीक्ष्यदृष्ट्वादीर्घमधि
कंनिःश्वसितिनिर्घृणंप्रतिकिंचित्कृतिदर्शनेनेतिभावः· किंचिदपिवचनंनजल्पति· पूर्ववद्भावः· किंतुजलेनप्रातःप्रभा
तेवदनंपरिमार्जयंतीप्रक्षालयंतीविलोचनजलानिअश्रूणितिरोदधातिस्थगयति· मद्विकृतिदर्शनेनायंविप्रिय शिवः
कृद्दुःखितोनभवेदितिचातुर्यमेतेतिभावः· अपह्नुतिरलंकारः· वसंततिलकंछंदः॥ ॥श्रीकृष्णायनमः॥ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रौढाखंडितायपेत्युदाहरति· मामुद्वीक्ष्येति· कोपिनायकः सखायंप्रतिवदति· अंगनानायिकाप्रातः प्रभाते करतलात् त्स्फ्रो
पेपंचमी· करतले स्थापयित्वास्वस्येत्यर्थः· मंगलंमंगलसूचकं आस्यरणादिति भावः· आदर्शमादर्शयत्· किंवक्तुमं·त
मेव विहृात्रिअवलोक्यस्वापराधं विगणयेति दर्शयतिस्मेत्यर्थः· किंभूता अंगना· विपक्षपक्ष्मलदृशः· विपक्षासपत्नी
वासौपक्ष्मलदृक् तस्याः प्रशस्तानि पक्ष्माणियस्याः सापक्ष्मलादृक् यस्याः· सिध्मादिभ्यश्चेति लच्· तस्याः पादांबुजाल

प्रौढाखंडिताय्था· मामुद्वीक्ष्यविपक्षपक्ष्मलदृशः पादांबुजालक्तकैरालिप्तानन मानतीकृतमुखीवि
न्नार्पितेवाभवत्· रूक्षंनोक्तवती नवाकृतवती निश्वासकोष्णदृशोप्रात मंगलमंगनाकरतलादादर्श
मादर्शयत्॥ ॥

क्तकैः आलिप्तमाननंमुखंयस्यतं मांउत्तानकरणादिति भावः· उद्वीक्ष्य उच्चैर्दृष्ट्वा· नपूर्वमाननमानतीकृतं नम्रीकृतंययासा·
विक्षिप्तकारिणोदर्शनाददर्शनमेववरमितिधियेति भावः· चित्रार्पितेवअभवत् जातेत्यर्थः· विषादविस्मृतयेति भावः· किं
च· रूक्षंनीरसंनउक्तवती· वाअथवादृशोनिश्वासेन कोष्णेवाष्पैः किंचिदपिउष्णेन कृतवती· अत्रापिरूक्षवक्त्याधभावेप
र्वश्लोकोक्त एव भावः· शार्दूलवृत्तम्·

र.स.टी. २६

परकीयाखंडितायपेतितामुदाहरति· कांतमिति· मुग्धदृशा नायिकया वलयांकितकंठदेशं कांतं कामिनं निरीक्ष्य परमया स्वच्छन्नकामित्वादिति भावः· परुषाः कठोरा यावोनोक्ताः· किंतु· तया दूतीमुखे स्खलदंबुपूराः स्खलदंबुपूरोऽश्रुप्रवाहो ये भुतेन यनांतपाताः दूरान्निदधिरेनिक्षिप्ताः· स्वदूतस्य फलवैविभ्रमवलोकयेति भावः· वसंततिलकं छंदः॥ ॥साम

परकीयाखंडितायथा· कांतं निरीक्ष्य वलयांकितकंठदेशमुग्धाक्षया परिपया परुषा न वाचः· दूतीमुखे मुग्धदृशा स्खलदंबुपूरा दूरात्परं विदधिरे नयनांतपाताः॥ ॥सामान्यवनिताखंडिता यथा· उन्नरत्नवपयोधरां कितमिदं कुतो मे क्षमा ततो मयि निधीयतां वसुपुरा यदंगीकृतम्· इतिप्रबलचेतसः प्रियतमस्य वारस्त्रिया कलनकंकणं करतलात्समाकृष्यते·

न्यवनिताखंडितायपेतितामुदाहरति· उरत्नवेति· वारस्त्रिया वेश्यया इत्युक्त्वा प्रबलचेतसश्चलनमनसः प्रियतमस्य करतलाक्कणकृदायमानं कनककंकणं समाकृष्यते वलात्गृह्यत इत्यर्थः· वारस्त्री गणिका वेश्येत्यमरः· इतीति किं· तव इदमुरः पयोधरांकितं· अन्यनायिकास्तनचिह्नितं अतः मे कुतः क्षमा· ततो हेतोः यत्पुरा पूर्वमंगीकृतं वसुद्रव्यं तन्मयि विषये निधीयतां·

शिवः २६

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कलहांतरितामुदाहरति· पतिमवमत्येति स्पष्टं· अस्याः कलांतरितायाः चेष्टा· भ्रांतीत्यादि· भ्रांतिर्मिथ्यामतिर्भ्रम इत्यमरः· मो
हइन्द्रियवैकल्यं स्पष्टमन्यत्· मुग्धाकलहांतरितायथेमुदाहरति· अत्रनयतीति· नवोढामुग्धा लज्जमानापतिं लज्जमा

पतिमवमत्य पश्चात्परितप्ताकलहांतरिता यथा· अस्याश्चेष्टा· भ्रांतिसंतापसंमोहनिःश्वासज्वर
प्रलापादयः· मुग्धाकलहांतरिता यथा· अत्रन पतिपतिं न लज्जमाना कथपतिनापिसखीजन
नायकिंचित्· प्रसरतिमलयानिलेन वोढा वहति परंतु विरापश्चस्मंतः॥ ॥श्रीमगालम्·

नमितियोऽसंकलहेनाव मानितमित्यर्थः· नात्रनपतिस्सखीजनापायिकिंचित्कर्त्त्र्यादिनकथयति· परंतु मलयानिलेप्रसर ॥
तिसतिचिरायचिरकालं· शल्यं ज्ञानरहितं अंतः करणं वहति विरहदाहकत्वाद्दक्षिणवायोर्विषयत्वेनेति भावः· पुष्पिताग्रा १७

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

र.स.टी. मध्याकलहांतरितायथा॰ विरमतीति॰ इतिइत्थंवितर्कयेतिभावः॰ अधोमुखीअधोनीचैर्मुखंयस्याःसानायिकाकलहं॰ यस्यास
२१ हेतिशेषः॰ सखीभ्यः लपितुंअनालपितुंसमाचकांक्ष॰ धार्ष्ट्याधार्ष्ट्याभ्यांकथयितुंमकथयितुंवैछदिसर्थः॰ इतीतिकिं॰ वै

मध्याकलहांतरितायथा॰ विरमतिकथनंविनानखेदःसतिकथनेसत्रपैति
कापिलज्जा॰ इतिकलहमधोमुखीसखीभ्योलपितुमनालपितुंसमाचकांक्षः

तःकथनंविनानरमतिनशाम्यतीत्यर्थः॰ निवेधकुःस्वंमुखिनोभवंतीति पुनःकथनेसति कापिलज्जासत्रपेति॰ अधार्ष्ट्य शिवः
दकुंनशक्यतइत्यर्थः॰ संशयालंकारः॰ पुष्पिताग्रा छंदः॥ ॥श्रीमङ्गलमूर्त्तयेगणाधिपतयेनमः॥ ॥ २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रौढाकलहांतरिता यथा ·अकरोरिति· कापि सखी नायिकां प्रति वदति· हे अरसज्ञे क्रीडारसानभिज्ञे· यद्वा· क्रुधा रसज्ञ इ
त्येकपदं· कोपरसज्ञ इत्यर्थः· यद्वा· रसज्ञे नायके क्रुधा कोपेनेति सर्वत्र योज्यं· नेत्र शोणिमानं नेत्रयोः रक्तत्वं किमु अ
करोः कृपा कृतवतीत्यर्थः· वा पुनः करपद्मे न तर्जनं भर्त्सनं बहिर्निष्कासनरूपं किमकार्षीः किं कृतवती· अतिकोम

प्रौढकलहांतरिता यथा· अकरोः किमु नेत्रशोणिमानं किमकार्षीः करपद्मतर्ज्जनं
वा· कलहं किमधाः क्रुधा रसज्ञे हितमर्थं न विदंति दैवदष्टाः॥ ॥ ॥ ॥

लेन कठिना घटितमिति कोपवैचित्र्यमुक्तम्· किंच· कलहं किं अधाः कृतवती· यद्वा· नायिका नेत्रकरपद्मरसज्ञेंद्रिया
णामंत्र्य वदति· रसज्ञा जिह्वा· शेषं पूर्ववत्· युक्तमेतत्· हितमिति· दैवेन दष्टा हताः हितं अर्थं न विदंति न जानंति· औ
पच्छंदसिकं छन्दः॥ ॥

In Public Domain. Digitization by eGangotri. Funding: MIDF

र.स.टी. २८

परकीयाकलहांतरितातांदर्शयति॰भर्त्तुरिति॰सखीवदति॰हतधियामयाक्रोधात्सअवधीरितोनिष्कृतः॰भोमातः॰विधिर्दैवं
वलीयान्॰तस्येवेदंदुर्विलसितंनमेऽपराधइत्यर्थः॰सःकः॰यस्यभर्त्तुःशृंगारादिरसपोषकस्यकृतेरसपं॰पत्निभितभित्यर्थः॰
गुरुः॰श्वशुरादिः॰लघुरभूत्तमयागणनीयोजातइत्यर्थः॰गोष्ठीजनसमूहः॰कनिष्ठीकृता॰अदृश्याभूदित्यर्थः॰पुनः॰धैर्य
धीरत्वंविवेकित्वमित्यर्थः॰तदेवकोशधनंभांडारगतद्रव्यंगतंकिमपिनावशिष्टमित्यर्थः॰पुनःसहचरीसमीपवर्त्तिनीसखी

परकीयाकलहांतरितायथा॰भर्त्तुर्यस्यकृतेगुरुर्लघुरभूद्गोष्ठीकनिष्ठीकृताधैर्यकोशधनंगतंसहचरीनीतिः
कृतादूरतः॰निर्भुक्तात्वरणवक्त्रयापरिचिताज्ञोतस्वतीविंदुवत्सक्रोधादवधीरितोहतधियाभातर्वलीया
न्विधिः॥ ॥

स्रोतस्वतीस्रोतःप्रवाहोअस्याअ
तस्यानीतिदूरतःकृता॰पुनःत्वपालज्ञातत्वतत्वरणेनतुल्यंनिर्भुक्ताअतिशयेनत्यक्तेत्यर्थः॰पुनः॰
स्तीतिगंभीरेनीतानदीत्यर्थः॰विंदुवत्परिचिता॰संकेतवर्त्मागच्छंत्यामयाविंदुनातुल्यंमध्यस्तेत्यर्थः॰अत्रनप्रस्कोत्पलंका शिव: २८
रः॰समज्यापरिषद्गोष्ठी॰स्रोतस्वतीद्वीपवतीस्रवंतीनिम्नगापगाइत्यमरः॰शार्दूलविक्रीडितंवृत्तम्॥ ॥ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यकलहांतरितायथेत्युदाहरति· यत्पंकेरुहेति·हेसखियोनायकः तत्सर्वंपथार्थसमर्पमकरोत· तस्मिन्नवादशेषकोपः·
अतिशयितकोपः कृतः· मांधिक अहंनित्येत्यर्थः· ममजीवनं प्राणधारणंधिक्निंद्यं· अतनुकामंधिक्· येनैवंअतनुंततस्यु
क्तमितिभावः· वेष्टितंकटाक्षादिधिक्· वयोयोवनंधिक्· तदितिकिं· यतममेतिसर्वत्रसंबंधः· पाणिकमलंपंकेरुहलक्ष्म

सामान्यवनिताकलहांतरितायथा· यत्पंकेरुहलक्ष्मपाणिकमलंभाग्यालयेयकुरुन्यस्तंवाममयद्दत्तला
टफलकेभाग्याक्षरंवेधसा· तत्सर्वंसखियोयपार्थमकरोत्तस्मिन्कोपः कृतोधिक्मांधिगममजीवितं
धिगतनुंधिक्चेष्टितंधिग्वयः॥ ॥

पंकेरुहस्यकमलस्यचिह्नंयस्मिन्नतः यद्भाग्यलयेजन्मकुंडलिकायांगुर्वृहस्पतिः·वापुनः वेधसाब्रह्मणाललाटफलकेयद्भाग्या
क्षरंन्यस्तंलिखितं· सर्वेषांभाग्यंस्त्रचिततादुर्भाग्यमत्वंध्वनितं· शार्दूलविक्रीडितंवृत्तम्·॥ ॥श्रीगणाधिपायनमः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रलब्धां दर्शयति· संकेतनिकेतन इत्यादि स्पष्टम्· अस्या विप्रलब्धायाश्चेष्टानिर्वेदादय इति· तत्र निर्वेदः स्वावमाननं सखीज
नेऽउपालंभः· चिंता तदपराधस्मृतिः· मूर्च्छा इन्द्रियवैकल्यं शेषं स्पष्टं॥ ॥मुग्धाविप्रलब्धायथोदाहरति· आलीभिरिति· आ
लीभिः सखीभिः· अनेककपटैः अनेकैः कपटव्याजायैर्युतैः शपथैः कुंजोदरं संकेतीकृतं कुंजमध्यं नीतया प्रापितया विप्रल
ब्धया नायिकया· तत्र कुंजोदरे शून्यं प्रियरहितं निरीक्ष्य विक्षुभितया न प्रस्थितं न चलितं· न स्थितं प्रियागमनागमनाभ्यां भ्या

संकेतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा· अस्याश्चेष्टा निर्वेदनिःश्वाससखिजनोपालंभ
चिंताश्रुपातमूर्छादयः· मुग्धाविप्रलब्धा यथा· आलीभिः शपथैरनेककपटैः कुंजोदरं नीतया शून्यं तद्व
न्निरीक्ष्य विक्षुभितया न प्रस्थितं न स्थितं· न्यस्ताः किंतु नवोढनीरजदृशा कुंजोपकंठे तया ताम्रङ्गकदंबकं च·
सचमत्कारस्पृशो दृष्टयः॥ ॥

कुलितमित्यर्थः· किंतु नवोढनीरजदृशा नवोढा या सा नीरजदृक् च तया कुंजोपकंठे कुंजसमीपे दृष्टयो न्यस्ताः पतितः क्षिप्ता
इत्यर्थः· किंभूताः तया केन विज्ञनेर पथेन तास्यंतो व्याकुलाये भृंगास्तेषां कदंबं समूहस्तस्याडंबरात् भ्रमणरूपाऽरभसी
तस्य चमत्कारो भिन्नविलासास्तान् स्पृशंतीति तत्स्पृशस्या इत्यर्थः· निदर्शनालंकारः· शार्दूलविक्रीडितं वृत्तम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परकीयाविप्रलब्धामुदाहरति · दत्त्वेति · तन्व्या तन्व्यंग्या प्रियो न दृष्टः संकेतित इति भावः · किं कृत्वा धैर्यमेव भुजंगमस्तस्य मूर्द्धि शिरसि चरणौ दत्त्वा · पद्धा · धैर्यं च भुजंगमश्चेतोपयोमूर्द्धि · पुनः · लज्जारूपां नदीमुत्तीर्य · पुनः · घनांधकारस्य पटलं घनं निबिडं यदंधकारं तस्य पटलं समूहं अंगीकृत्य गतयेति शेषः · च पुनः · संतापेनाकुलया पायोधरे जलधरे गर्जति सति · क्रोधेनाक्रांतो व्याप्तो यः कृतांतस्य महिषस्तस्य भ्रांत्या कालमहिषोऽयमिति भ्रमेण · परितः सर्वतो दृशौ योजिते प्रेरिते · मेघस्य विरहिवैरित्वाद्वलो

परकीयाविप्रलब्धा यथा · दत्त्वा धैर्यभुजंगमूर्द्धि चरणावुत्तीर्य लज्जानदीमंगीकृत्य घनांधकारपटलं तन्व्या न दृष्टः प्रियः · संतापाकुलया तया च परितः पाथोधरे गर्जति क्रोधाक्रांतकृतांतमत्तमहिषभ्रांत्या दृशौ योजिते॥ ॥सामान्यवनिता विप्रलब्धा यथा · कपटवचनवक्राकेन विचारयोग्या सकलरसिकगोष्ठीवंचितावंचितासौ · इति विहसति रिंगद्भृंगविक्षिप्तवक्त्रविकचकुसुमकांतिच्छद्मना केलिकुंजः॥ ॥

कनेनैवं युज्यत इति भावः · अत्र भ्रांतिमानलंकारः · शार्दूलविक्रीडितं वृत्तम्॥ ॥सामान्याविप्रलब्धामुदाहरति · कपटेति · सकलरसिकगोष्ठीनां वंचिका असौ वारयोषा वेश्या केनचित्कपटवचनवक्रा · कपटवचनानि वक्राणि तेन वंचिता · कृत्रिमालंकारदानेनेति भावः · इति हेतोः रिंगंतो ये भृंगास्तैर्विक्षिप्तैर्वक्त्र[?]पी येन स केलिकुंजः · विकचानि फुल्लानि यानि कुसुमानि तेषां कांतिच्छ[?]द्मना विहसतीवेति शेषः · उत्प्रेक्षालंकारः · मालिनी छन्दः॥ ॥श्रीमन्मकुलमूर्त्तये गणाधिपतये नमः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोत्कां दर्शयति॰ संकेतस्थलमिति॰ उत्का उत्कंठिता॰ स्पष्टमन्यत्॰ अवधीति॰ अवधिदिवसेऽनागतेऽपि पत्यौ सतीत्यर्थः॰ प्रोषितप
तिकाया मतिव्याप्तिं॰ निषेधहेतुमाह॰ तस्या इति॰ प्रोषितपतिकायाः भर्त्तुः अवधिदिवसे अमुष्मिन्दिने अहमायास्यामि त्वयैकस्मि
न्दिने भवनागमनं नियम इति संकेतपदेन तद्व्यावर्त्तनादुद्भवने गमननियमस्य व्यावर्त्तनात्॰ अस्या उत्कायाः॰ अरति विषयद्वेषः
अंगाकृष्टिः अंगमोटनं कपटं लज्जादिना क्रियाविषयकव्याजः स्पष्टमन्यत्॥ ॥मुग्धोत्काया यथेमुदाहरति॰ यन्नायापीति॰ प्रि

संकेतस्थलं प्रति भर्त्तुरनागमकारणं या चिंतयति सोत्का॰ अवधिदिवसानागतेऽपि पत्यौ प्रोषितपतिकायां नातिव्याप्तिः॰
तस्या भर्त्तुरवधिदिवसे भवनागमने नियम इति संकेतपदेन तद्व्यावर्त्तनात्॰ अस्याश्चेष्टा॰ अरतिसंतापजृंभांगाकृ
ष्टिकंपरुदितस्वावस्थाकथनादयः॰ मुग्धा उत्का यथा॰ यन्नायापि समागतः पतिरिति प्राप्य प्रपेदे परामित्थं चेतसि
चिंतयत्यपि सखीं न व्रीडया पृच्छति॰ दीर्घं निश्वसितं दधाति चकितं न प्रेक्षते केवलं किं चित्यक्तपलांडुरश्मिं धत्ते कपोलस्थ
लीम्॥ ।

यः अद्यापि न समागत इति यावत्॰ अतः प्राप्य एतद्व्याकुल्येन परामाम्भं त्विषं प्रपेदे प्राप्तवान्॰ इत्थं चेतसि चिंतयत्यपि व्रीडया लज्जया सखीं
न पृच्छति॰ किंच॰ दीर्घं श्वसितं न दधाति॰ चकितं ससंकंपं न प्रेक्षते॰ उभयत्र सखीभीत्येत्यर्थः॰ केवलं किंचिन्मनाक् पक्वोऽपि पलांडुः कंदवि
शेषस्तद्वत्पांडुरा रश्मिः कांतिर्यस्याः तां कपोलस्थलीं धत्ते॰ विरहसंतापेन बिभर्तीत्यर्थः॰ शार्दूलविक्रीडितं वृत्तम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मध्योत्कायथेत्युदाहरति · आनेतुमिति · कापिनवोढनीरजमुखी · नवमूढं यन्नीरजं कमलं तद्वन्मुखं यस्याः सा · यथाश्रुतव्याख्याने मध्या
यो नवोढात्वनुपपत्तिः · इत्यं चिंतयंतीति शेषः · अक्ष्णोर्द्विषये कर्णे पल्लवर्णीकेतकं तस्य रजसः परागस्य पातेन यः उपघातः पीडा तस्य छलात् ·
वाष्पोदकं स्त्रवति · इत्यं कथं प्रियसखीमध्ये चिंतेत्यर्थः · आनेतुं न गता किमु · अथवा भुजंगाद्भीतः किमु · मार्गवर्त्तिनः सर्पाद्भीतः · किं नागत
इत्यर्थः · असौ प्रियः प्रतिषेधवाक् विप्रतिषेधवाक् यस्याः तस्यां निषेधमुक्तवत्यां मयीत्यर्थः · क्रुद्धो वा वर्त्तते · अन्यथा आगमिष्यदित्य

मध्योत्का यथा · आनेतुं न गता किमु प्रियसखी भीतो भुजंगात्किमु क्रुद्धो वा प्रतिषेधवाचि किमसौ प्राणेश्वरो वर्त्तते · इ
त्यं कर्णसुवर्णकेतकरजःपातोपघातच्छलादक्ष्णोः कापि नवोढनीरजमुखी वाष्पोदकं मुंचति · ८९ प्रौढोत्का यथा ·
भ्रातर्निकुंज सखि मधिर सालबंधो भातस्तमस्विनि पितस्तिमिर प्रसीद[illegible] पृच्छामि किं विदितनीरधराभिरामो दाऽ
मोदरः कथय किन्न समाजगाम ८०

र्थः · शार्दूलविक्रीडितं वृत्तम् ८९ प्रौढोत्कायथेत्युदाहरति · भ्रातर्निकुंजेति · भो निकुंजभ्रातः हे षट्पि सखि · हे रसाल आम्रबंधो · भो त
मस्विनि रात्रिमातः · हे तिमिरपितः प्रसीदेति प्रत्येकं संबंधः · अस्मिन्वने भवंत एव मम भ्रातराद्य इत्यर्थः · इति हेतोः · किं वित्वछाऽ
मि कथय · नीरधराभिरामः सजलदकांतिः · दामोदरः कृष्णः · किं न समाजगाम नागतवान् · कथयं त्विति वाक्यशेषः · दामोदर
इति पदं भक्ताधीनत्वं सूचितम् · तेन कदाचिद्भक्तस्य भक्त्या वशीकृतस्तिष्ठतीति भावः · वसंततिलकं छन्दः · ८० ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परकीयोत्काथयेतितामुदाहरति· स्नातमिति· काचित्सखीं वदति· हे सखि· किंतपोनतप्तं तथापि अद्यापि इयता कालेन स नायको नेत्राति
थिः नेत्रगोचर इत्यर्थः· कथंनतत्कथयेतिशेषः· तपोदर्शयति· वारिदवारिभिर्मेघजलैः स्नातं· पुनः घनेकानने वासो निवासो विरचितः·
पुनः मनसिजः कामदेवः शीतैश्चन्दनविन्दुभिराराधितः· एतेनज्योत्स्नायां रजन्यां कोपि मां मा प्रेक्षिष्टा इति चन्दनलेपो ध्वन्यते· पु
नः रजनीजागरव्रतेन नीता प्राप्ता· पुनः व्रीडालज्जा· दक्षिणादानं कृतात्यक्तेत्यर्थः· तस्यागमनफलप्रतीक्षयेतिभावः· शार्दूलवि

परकीयोत्का यथा· स्नातं वारिदवारिभिर्विरचितो वासो घने कानने शीतैश्चन्दनविन्दुभिर्मनसिजो देवः समाराधितः·
नीता जागरणव्रतेन रजनी व्रीडा कृता दक्षिणा तप्तं किं न तपस्तथापि स कथं नाद्यापि नेत्रातिथिः· ८१ सामान्यवनि
तोत्का यथा· कथं न कान्तः समुपैति कुंजे मित्यचिरं चेतसि चिंतयंती· अक्षालयन्निष्पतदश्रुवारा वारांगना कापि ध
·नाभिलाषात्· ८२

क्रीडितंवृत्तम्· ८१ सामान्यवनितोत्कायथेत्युदाहरति· कथमिति· कापि वारांगना वेश्या धनाभिलाषान्निष्पतदश्रुजलेन अक्षालय
त· अंगानीत्यर्थः· किंभूता वेश्या· कांतः कथं कुंजं संकेतस्थानं न समुपैति· इत्थं प्रकारेण चिरं चिरकालं चेतसि चिंतयंती· अत्रोपजा
तिवृत्तम्· इन्द्रवज्रोपेन्द्रवज्रालक्षणं मिश्रितपादत्वात्· ८२ ॥ ॥श्रीमन्मङ्गलमूर्त्तये गणाधिपतये नमोनमः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथवासकसञ्ज्ञां दर्शयति. अथमेप्रियवासकइत्यादिस्पष्टम्. वारः सूर्यादिदिवसइतिविश्वः. अस्याश्चेष्टाकिंक्रियावतीत्यर्थः. मनोरथेत्यादि. मनोरथश्चेतसिवहुधाविकल्पना. स्पष्टमन्यत्. ८३ मुग्धावासकसञ्ज्ञायथेतितामुदाहरति. हारमिति. नवोढसुमुखीनववधूर्मुग्धेत्यर्थः. सभ्रमुदासहवर्त्तमानाद्दूराद्वीक्ष्यतेपश्यति. कांतागमनमितिभावः. किंभूता. वासकस्यनिश्चितप्रियागमनरूपवारस्यरजनौरात्रौ. आलीनामासमंतादवलीनांनिगूढांसञ्ज्ञयेतिभावः. इतिवक्ष्यमाणप्रकारेणकामानुरू

अथमेप्रियवासकइतियासुरतसामग्रींसज्जीकरोतिसावासकसञ्ज्ञा. वासकोवारः. अस्याश्चेष्टामनोरथसखीपरिहासदूतीप्रश्नसामग्रीसंपादनमार्गविलोकनादयः. ८३ मुग्धावासकसञ्ज्ञा. हारंगुंफतितारकांतिरुचिरंचग्रथ्नातिकांचीलतांदीपंस्पृशतिकिंतुतत्रवहलस्नेहंनधत्तेपुनः. आलीनामितिवासकस्यरजनौकामानुरूपांक्रियां साचिस्मेरमुखीनवोढसुमुखीदूरात्समुद्वीक्षते. ८४

पांक्रियांकुर्वतीसतीसतीतिशेषः. साचिस्मेरमुखीसाचितिर्यक्स्मेरहास्यतइत्यर्थः. सखीमांनपश्येदितिधियेतिभावः. स्मेरंसहासंमुखंयस्याःसा. इतीतिकिं. तारकांतिरुचिरं. ताराणांशुद्धमौक्तिकानांकांतिःशोभातया. रुचिरंरमणीयं. हारंमुक्तावलींगुंफतिरचयति. गुंफसंदर्भे. पुनःकांचीलतांग्रथ्नाति. पुनःदीपंस्पृशतिसज्जयति. किंतुतत्रप्रदीपेपुनर्वहलंस्नेहंनधत्तेनक्षिपति. तदालोकरवप्रियोरतिकेलींविधास्यतीतिलज्जयेतिभावः. तारोमुक्तादिशुद्धौमौक्तिकइति. हारोमुक्तावलीइतिचविश्वः. शार्दू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र.स.टी.
३३

मध्यावासकसज्जा यथेत्युदाहरति· शिल्पमिति· स्मरः कामः स्मेराननोऽभूत्· किं कृत्वा· पद्मदृशः कमलनयनायाः इत्थंप्रकारेण चरित्रं प्रतीत्य
ज्ञात्वा· इत्थं कथं शिल्पं कलाकौशलं दर्शयितुं कुतुकात्कह्लारहारस्रजं कह्लाराणां सौगंधिककमलानां हारस्रजं हारविशेषाकारेण मालां
करोतीति रचयतीत्यर्थः· चित्रप्रेक्षणके तवेन चित्रावलोकनमिषेण किमपि तिर्यक् भूत्वेत्यर्थः· द्वारं समुद्वीक्षते· कांतागमनजिज्ञासये

मध्यावासकसज्जा· शिल्पं दर्शयितुं करोति कुतुकात्कह्लारहारस्रजं चित्रप्रेक्षणके
तवेन किमपि द्वारं समुद्वीक्षते· गृह्णात्याभरणं नवं सहचरीभ्यः पाजिगीषामिषादि
त्थं पद्मदृशः प्रतीत्य चरितं स्मेराननोऽभूत्स्मरः ८५ ॥ ॥श्री गणेशाय नमो नमः॥

तिभावः· पुनः सहचरीभ्यः सखीभ्यः पाणां जिगीषामिषात्· भवदलंकारपेक्षया ममालंकरणं निरुपमाणीति ज्ञानात्· नवं नू
तनमाभरणं गृह्णाति· एवंविधव्यापारं चेतोभवत्वात्स्मर एव ज्ञातवान्स्वस्य इति चित्रम्· तया लज्जाकपराभ्यां सह सकाशायास्त
स्या लज्जामदनसाम्यं· शिल्पं कर्म कलादिकं· सौगंधिकं तु कह्लारमित्यमरः· शार्दूलविक्रीडितं वृत्तम्· ८५ ॥ ॥ ॥ ॥

शिवः
३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रगल्भा वासकसज्जायथेत्युदाहरति· कृतमिति· वपुषि देहे· भूषणं पत्रावल्यादि कृतं· पुनः· चिकुराणां धोरणी रचनाविशेषः· धूपिताभ
गुरुचंदनादिभिरधिवासिता· पुनः· शयनसन्निधौ शय्यासमीपे क्रमुकानि गुवाकानि· वीटिका भ्वनागवल्लीपत्ररचनास्तासां· भृ
तिः संधारणं कृताः· किंच· हरिणीदृशा कांतागमनप्रतीक्षा· व्याकुलत्वेनेति भावः· देहस्य त्विषा कांत्या· एव संगत्य· स्फुरं[redacted]
नीदेहकांतिः· संबंधेन शोभातिशयं प्राप्तानि यानि कनककेतकीकुसुमानि· तेषां कांतिभिः· भवनं गृहं· दुर्दिनमकारि· मेघच्छि

न२

प्रगल्भा वासकसज्जायथा· कृतं वपुषि भूषणं चिकुरधोरणी धूपिता कृता शयनसन्निधौ क्रमुकवीटिका
संभृतिः· अकारि हरिणीदृशा भवनमेत्य देहत्विषा स्फुरत्कनककेतकीकुसुमकांतिभिर्दुर्दिनम्· ८६ मनोरथ
स्वास्थ्यपथा· आवयोरंगयोर्द्वैते भूयो विरहविप्लवः· अद्वैते च स्मितं स्फीतं न स्याद्वामीन्वीक्षणम्· ८७ ।

च्छिदुर्दिनम्· तेनात्र सच्छायत्वं लक्ष्यते· पथ्वीछंदः· ८६ मनोरथस्वास्थ्यथेति दर्शयति· आवयोरिति· आवयोः मम कांतस्य चां
गयोः· द्वैतो द्वयोर्भावो द्वैतः· स्वार्थे ऽण्· तस्मिन्द्वैविध्ये इत्यर्थः· पुनरपि विरहेण कांतवियोगेन· विप्लवो दुःखं भविष्यतीति शेषः·
पुनः· अद्वैते आवयोरंगैकत्वे· स्फीतं समृद्धं· स्मितमन्योन्यवीक्षणं च न स्यात्· संदेहालंकारः· ८७ ॥ ॥ ॥ ॥

परकीयावासकसज्जा प्रथयति तामुदाहरति. स्वप्नमिति. काचिन्नायिका छलेन केनचिद्व्याजेन स्वप्नं. मनोरथस्वास्वापयथा. स्वापयति
निद्रापयति. च पुनः प्रदीपांकुरान् प्रकृष्टदीपशिखाः तिरोधत्ते स्वाचरादिना छादयतीत्यर्थः. पुनः सौधकपोतनिनदैः. सौधकपो
तानां ये पोता बालकाः तेषां शब्दैः निनदैः सांकेतिकं चेष्टितं संकेतसंबंधि व्यापारम्. धत्ते करोति. पुनः शश्वत. वारंवारं. पार्श्वयोः

परकीयावासकसज्जा यथा. स्वप्नं स्वापयति छलेन वतिरोधत्ते प्रदीपां
कुरान्धत्ते सौधकपोतपोतनिनदैः सांकेतिकं चेष्टितम्. शश्वत्पार्श्वविव
र्त्तितांगलतिकं लोलत्कपोलद्युतिः कापि क्वापि करांबुजं प्रियधियातल्पांतिके
न्यस्यति. ६८

शय्योभयप्रांते. विवर्त्तिता अंगलतिका यस्यां क्रियायां तद्यथास्यात्तथा. लोलंति प्रियागमनमुदा स्फुरंतीकपोलद्युतिर्यस्याः क्रिया
यां तद्यथास्यात्तथा. तल्पांतिके क्वापि प्रदेशे. अन्यप्रियधियाजारागमनसंभावनया. करं न्यस्यति. अत्रापह्नुतिरलंकारः. शार्दूल
विक्रीडितं वृत्तम्. ६८॥ ॥श्रीमन्मकुलमूर्त्तये गणाधिपतये नमो नमः॥ ॥श्रीरामचंद्राय नमो नमः॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्यवनितावासकसज्जेतितांदर्शयति· चोलमिति· वारांगनावेश्या· वारेषु रतिदिनेषु· यदिलप्यपमं· यद्यं मनोरथं· नवितनु
ते तत्किं· न किमपीत्यर्थः· किंभूता· इत्थं वक्ष्यमाणप्रकारेण वंदने न वर्त्तिते र्थ्यात्मे र्मृगमदे: कस्तूरिभिः अंगानि करवरण स्तना
दीनि· संस्कुर्वती अधिवासयंती· इत्थं नीलचोलस्य उपरितं परछ्छं दपदस्य कर्षण विधौ· चोलं कर्पासकं यावित्थे: प्रार्थपिष्या
मि· पुनः· तुंवने· चूडामणिं केशपाशरत्नं याविष्ये· पुनः· कुचयोः करार्पणविधौ· कांचनीसौवर्णी· कांचीक्षुद्रघंटिका· या

सामान्यवनितावासकसज्जा यथा· चोलंनीलनिचोलकर्षणविधौ चूडामणिंतुंवनेयाचिष्येकुचयोः
करार्पणविधौकांचीपुनः कांचनी· इत्थंवंदनचर्चितैर्मृगमदेरंगानिसंस्कुर्वतीतत्किंयन्नमनोरथं
वितनुतेवारेषुवारांगना· ६८ सदाकृताज्ञाकरप्रियतमास्वाधीनपतिका· अस्याश्चेष्टा· वनविहारादि
मदनमहोत्सवमदाहंकारमनोरथायप्रभृतयः·

६६ अथस्वाधीनपतिकांदर्शयन्नाह·
विष्येरति· निचोलः प्रछ्छदपदः· चोलः कर्पासकोस्त्रियामित्यमरः· शार्दूलविक्रीडितंवृत्तम्· ६६ अथस्वाधीनपतिकांदर्शयन्नाह·
सदाकृताज्ञाकरेति· सदासर्वदा· आकृतेन अभिप्रायेण आज्ञां करोतीति एवंभूतः प्रियतमो यस्याः सा स्वाधीनपतिका· अ
स्याश्चेष्टा· वनविहारेसादयः· महोत्कर्षः· अहंकारः· स्वास्मिन्नन्याधिकत्वबुधिः· शेषंस्पष्टम्· ॥ ॥ ॥ ॥ ॥

मुग्धास्वाधीनपतिकायथेमुदाहरति॰ मध्याइति॰ काचित्सखीवदति॰ हेसखिमध्येकटिप्रदेशे॰ कृशिमाकृशत्वंन॰ स्तनेगरिमागुरुत्वंन॰ वापु
नः॰ देहेकांतिमालावण्यंन॰ श्रोण्योन्नितंबे॰ प्रथिमापृथुत्वंन॰ गतौगमनेजडत्वंमंदगतित्वंनेत्यर्थः॰ नचनेत्रेवक्रिमा॰ नत्पत्वंगतेवाघात्म
केदृष्टिमादृढत्वंन॰ वाविवाग्विषये॰ पटिमापटुत्वंन॰ वा॰ हास्येहासरसे॰ स्फीतिमाप्रागल्भ्यंन॰ सर्वत्रमुग्धत्वंहेतुरितिभावः॰ यद्यप्ये
वंतथापिप्राणेशस्यमनःमय्येवमज्जतिलीनंभवति॰ तत्रकिंकारणंतन्नजानेइतिशेषः॰ कांतिमावक्रिमास्फीतिमेत्यत्रमविस्मृतय

मुग्धास्वाधीनपतिकायथा॰ मध्येनकृशिमास्तनेनगरिमादेहेनवाकांतिमाश्रोण्योनप्रथिमागतौनजडिमा
नेत्रेनवावक्रिमा॰ लास्येनदृष्टिमानवाविपटिमाहास्येनवास्फीतिमाप्राणेशस्यतथापिमज्जतिमनोमय्येव
किंकारणम्॰ १०० मध्यास्वाधीनपतिकायथा॰ तदपिरतिमहोत्सवेनकारोयदपिकरेणचनीविधारणानि॰
प्रियसखिपतिरेषपार्श्वदेशंतदपिनमुंचतिवेद्मिमाचरामि॥ १०१॥ श्रीमत्कालभैरवायनमोनमः॥

म्यंत्यः॰ शार्दूलविक्रीडितंवृत्तम्॰ १०० मध्यास्वाधीनपतिकायथेमुदाहरति॰ यदपीति॰ हेप्रियसखि॰ प्रियावासौसखिचतस्याःसंबोधनं॰
रतिमहोत्सवेसंभोगक्रीडायां॰ यदपियद्यपि॰ नकारोनिषेधः॰ वचनः॰ करेणयद्यपिनीविधारणावस्त्रग्रंथिवसनानि॰ तदपितथापि॰
एषपतिःप्रियःपार्श्वदेशं॰ वेपदिनमुंचति॰ तत्किंमाचरामि॰ अतःपरंकिंकर्त्तव्यमित्यर्थः॰ तत्त्वंशिक्षयेतिशेषः॰ पुष्पिताग्राछंदः॰ १०१॥

प्रौढास्वाधीनपतिकायथेत्युदाहरति· वक्रस्येति· काचनसखीवदति· हेसखि· कांतः प्रियः कस्याश्चिन्नायिकायाः धन्यानांअरविन्दसुन्दरदृशां इतरासांनायिकानां· कांतस्त्वतिकरणाद्धन्यत्वं अरविंददुकूलेवकथितम्· वक्रस्यमुखस्य· अधरपल्लवस्य· वचसोवचनस्य· हास्यस्यहसि तस्य· लास्यस्यनृत्यस्य· स्तुतिंकरोतीतिवक्रादेसर्वत्रसंबंधः· किंतुमेदयितस्यवल्लभस्य· स्वप्नेनापिजाग्रदनुभवसंस्कारजः स्वप्नस्तेनापि अन्यानायिकाश्रुतिपथंकर्णमार्गं· चेतः पथंमनोविषयं· दृक्पथं दृग्विषयं· नगच्छतिनप्राप्नोति· प्रत्यक्षतः किंतुनप्राप्तिरित्यर्थः· तस्य

प्रौढास्वाधीनपतिकायथा· वक्रस्याधरपल्लवस्यवचसोहास्यस्यलास्यस्यवाधन्यानामरविन्दसुन्दरदृशांकांतस्तनोतिस्तु तिम्· स्वप्नेनापिनगच्छतिश्रुतिपथंचेतःपथंदृक्पथंकाप्यन्यादयितस्यमेसखिपथंतस्यास्तुभेदग्रहः· १०२ परकीयास्वा धीनपतिकायथा· स्वीयाःसन्तिगृहेसरोरुहदृशोयासांविलासक्षणेकांचीकुंडलहेमकंकणरणत्कारोनविश्राम्यति· को हेतुःसखिकाननेघरपथेसौधेसखीसन्निधौभ्राम्यंतिममवक्त्रभस्यपरितोदृष्टिर्नमांमुंचति· १०३ ॥ ॥ ॥

तादृशास्य· भेदग्रहः कथमस्तु· तेनसहकेनापिनिर्मितेनभिन्नत्वमाभवतीत्यर्थः· शार्दूलविक्रीडितंवृत्तम्· १०२ परकीयास्वाधीनपतिकायथे त्युदाहरति· स्वीयाइति· काचनसखीवदति· हेसखि· स्वीयाआत्मीयाः सरोरुहदृशः गृहेसंभवंति· यासांस्वीयानांविलासेचकोराभितया दिना· क्षणेतांकांचीकुंडलहेमकंकणानांरणत्कारोनविश्राम्यति· तत्रकुंडलंकर्णभूषणं· हेमकंकणंसुवर्णप्रधानं· तत्रकोहेतुः किंका रणं· काननेवने· घरपथे· घरस्यपंथाघरपथस्तस्मिन्· सौधे· सुधायाश्चूर्णस्तन्निर्मितःसौधस्तस्मिन्धवलगृहे· सखीनांसन्निधौ ममवक्त्रभस्यदृष्टिः· मांपरितःसर्वतोभ्रमंतीनमुंचतिमांनत्यजति· तन्नजानामीत्यर्थः· अत्रस्वीयाभ्यःस्वाधिकारकथनेनअतिरे

सामान्यवनितास्वाधीनपतिकाया यथेत्युदाहरति. संस्येवेति. काचित्सखीवदति. मृगदृशः प्रतिमंदिरं. मंदिरेमंदिरेइतिवीप्सायामव्ययी
भावः. संस्येवभवंस्येव. यासांमृगदृशां. सुधासागरोऽमृतसमुद्रस्तस्यस्रोतः. स्यूतं लग्नं यत्सरोजं कमलंतद्वत्सुन्दरः चमत्कारोपे
षांते. एवंविधादृशोविलासाः. किंतुविचित्रंआश्चर्यम्. युवातरुणःप्रियः. विचित्रयन्मन्मथकलानांवैशद्यहेतोः. उत्कर्षकारणात्. पुन
र्वारंवारं. मय्येवचित्तहरंमनोहरम्. चित्तंप्रयच्छतिददाति. किंकारणम्. तन्नजानामीत्यर्थः. शार्दूलविक्रीडितंवृत्तम्. १०४ अथाभि

सामान्यवनितास्वाधीनपतिकायथा. संस्येवप्रतिमंदिरंमृगदृशोयासांसुधासागरस्रोतस्स्यूतस
रोजसुन्दरचमत्कारादृशोविभ्रमाः. चित्रं किंतुविचित्रमन्मथकलावैशद्यहेतोःपुनर्वित्तंचित्तह
रंप्रयच्छतियुवामय्येवकिंकारणम् १०४ स्वयमभिसरतिप्रियमभिसारयतिवायासाऽभिसा
रिका. अस्याश्चेष्टा. समयानुरूपभूषणशंकाप्रज्ञानेप्रणयकपटसाहसादयः. इतिपरकीयायाः.
स्वीयायाःप्रकृतएवकर्म्मी.॥

सारिकांदर्शयति. स्वयमिति. अभिसारयति. कुसादिनाप्रियमानयतीत्यर्थः. उक्तंच. कामार्त्ताभिसरेत्कांतंसारयेद्वाभिसारिकेति.
स्पष्टमन्यत्. अस्याअभिसारिकायाः. समयानुरूपेत्यादिस्पष्टम्. स्वीयापरकीययोरभिसारवैशिष्ट्येतेसमत्वमाह. इतीति. इ
तिउक्तप्रकारेण. परकीयायाःस्वकीयायाश्चक्रमोऽभिसारव्यापारः. प्रकृतएवउद्दिष्टएव.॥ ॥श्रीरामचन्द्रायनमः॥ ॥

तत्रमुग्धाभिसारिकायथेतिदर्शयति· दूतीति· काचित्सखीवदति· हेमुग्धेअयंदयिताभिसारसमयः· दयितेऽभिसारणयोग्यसमयो
जातः प्राप्तः· त्रपांलज्जां मुंच· समयमाह· विद्युद्दूती उपागता समीपंप्राप्ता· पुनः· सहस्थायिनी· सहतिष्ठतीतितथाभूता· सहचरीसखीरा
त्रिः· दैवज्ञः· दैवंभाग्यंजानातीतितथाभूतोज्योतिर्वित्· जलदोमेघः· स्वनेनशब्देन· शुभांप्रस्थानवेलां· दिशतिकथयति· तिमिरस्तो
मोपि अंधकारसमूहोपि· द्विद्वीरवैः भृंगादिध्वनिभिः· मंगलनिर्भितांवार्चंतनोतीतिविस्तारयति· यथाकस्यचिज्जिगीषोर्मंगलंवि

मुग्धाभिसारिकायथा· दूतीविद्युदुपागतासहचरीरात्रिश्चिरस्थायिनीदैवज्ञोदिशतिस्वनेनजलदः प्र
स्थानवेलांशुभाम्· वाद्यंमांगलिकंतनोतितिमिरस्तोमोपिद्विद्वीरवैर्ज्ञातोयंदयिताभिसारसमयोमुग्धे
विमुंचत्रपाम्॥ ॥मध्याभिसारिकायथा· भीतासिनैवभुजगात्पथिमद्गुजल्पसंगेपुनः किमपिकंपमुरी
करोषि· अंभोधरध्वनिभिरक्षुभितासिकांतेमह्याचिसाविवदनासिकिमावरामि॥ ॥ ॥ ॥ ॥

स्तारयतीत्यर्थः· अत्ररूपकालंकारः· शार्दूलविक्रीडितंवृत्तम्॥ ॥मध्याभिसारिकायथेमुदाहरति· भीतासीति· कश्चिन्नायिकांवदति·
हेकांते· पथिमार्गे· भुजंगात्सर्पात्· नैवभीतासि· पुनः· मद्गुजल्पसंबंधे· किमपिईषदपि· कंपंडरीकरोषि· सात्विकभावोदयादितिभावः·
उरयुर्दरीयोररीवेत्यमरपाठात्· उरीतिहृस्वप्रयोगश्चिंत्यः· तथाअंभोधरध्वनिभिः अक्षुभितासि· पुनः· मद्वाचिमद्वाग्वचनइत्यर्थः· स
विवदनाअसिवक्रीकृतवदनाभवसि· किंआवरामि· किमत्रमतस्यसंधातव्यमित्यर्थः· वसंततिलकंछंदः॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र.स.टी. प्रौढाभिसारिकायथेत्युदाहरति. स्फुरदुरसिजेति. अथअन्यप्रश्ने. कथय. यदिमनोरथोऽभिलाषोमनोनस्यान्नभवेत्. संप्रश्नेलिङ्ः
३१ नाहस्फुरदुरसिजभारभंगुरांगी. स्फुरंतौयौउरसिजौस्तनौ. तयोर्भारेणभंगुरंनम्रं. अंगंयस्याः साभवति. किशलयवत्. कोम
लांकांतिर्यस्यतेनपदेनचरणेन. निशासुरात्रिषु. कथंकेनप्रकारेण गंतुंसहेत. गमनसहाभवेदित्यर्थः. प्रश्नकात्स्म्र्येथयोअर्थे

प्रगल्भाभिसारिकायथा. स्फुरदुरसिजभारभंगुरांगीकिशलयकोमलकांतिनापदेन. अथकथयकथं
सहेतगंतुंयदिननिशासुमनोमनोरथःस्यात्.॥ ॥परकीयाभिसारिकायथा. रभसादभिसर्तुमुद्यता
नांवनितानांसखिवारिदोविवस्वान्. रजनीदिवसोंधकारमर्चिर्विपिनंवेश्मविमार्गएवमार्गः।। ।

स्यमरः. पुष्पिताग्राछंदः। ।परकीयाभिसारिकायथेत्युदाहरति. रभसादिति. हेसखि. रभसात्कांतमिलनोत्कंठात्. अभिसर्तुं
कांतंप्रत्यभिगंतुं. उद्यतानां कृतोद्यमानांवनितानाम्. अत्यनुरागवतीनांयोषितां. वारिदोमेघः. विवस्वान्सूर्यः. रजनीरात्रिः. दिवसः शिवः
अंधकारंअर्चिःप्रकाशकंतेजः. विपिनंवनं. वेश्मगृहम्. विमार्गःअपथाः. सएवमार्गः. वनिताजनितात्पर्यानुरागायांचयोषितीत्य ३१

मः॥ लिपवछिकंछः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमिस्राअभिसारिकोक्ता ज्योत्स्नाऽभिसारिकायथेतिताम्रुदाहरति· चन्द्रोदयइति· चंद्रोदयेअंगकेषु प्रियविरहतनुत्वेन अनुकंपानिअंग
कानितेषु· अनुकंपायांकस्तूरीचन्दनं· विमलमाआलिप्य· चन्द्रकिरणसमानत्वेन कोपिमांनज्ञास्यतीतिधियेतिभावः· विहस्यकांत

ज्योत्स्नाभिसारिकायथा· चन्द्रोदयेचन्दनमंगकेषु विहस्यविमलस्यविनिर्गतायाः॥ मनोनि
हंतुं मदनोपिबाणान्करेणकौन्दान्बिभरांबभूव॥ ॥श्रीमद्रामचन्द्रायनमोनमः॥

संगमेनआत्मानंसुखयिष्यामीत्यौत्कंठेनेतिभावः· विनिर्गतायाः कांतंप्रत्यभिसृतायानायिकायाः· मदनोपिमदयतिहर्षयतीत्ये
वंभूतोपिमदनोनिहंतुंपीडयितुं· करेणकौन्दान्· कुन्दस्यावयवाः पुष्पाणिकौन्दास्तान्बाणान्· बिभरांबभूवदधार· अत्रो
पजातिर्वृत्तम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिवामिसारिकायथेत्युदाहरति· पह्लीतामिति· सप्रजनाः गृहजनाः मिथः परस्परं· कृतमहोत्सवं· कृतं महोत्साहं यस्यां क्रियायां तथ थास्यात्तथा· पुरः अग्रे· प्रस्थिताः आमंत्रणक गृहं चलिताः· कृसति· पह्लीनां अल्पग्रामाणां· अधिपस्य स्वामिनः· पंकजदृशां स्त्रीणां· प वेस्तिवामंत्रणे· पर्वणि वेत्रपोर्णमास्यादौ यउत्सवस्तदर्थमामंत्रणे तस्मिन् जाते सति· सव्याजं किंचिदपदिश्य स्थितयोः· पुनर्विरह स्यमनोरथावाप्त्यानंदेनेति भावः· शुद्धांते अंतःपुरं· गतयोः प्राप्तयोः· यूनोः युवतीच युवाचतयोः· पुनः· स्विन्नकपोलयोः· स्विन्नौस्वे

दिवामिसारिकायथा· पह्लीनामधिपस्य पंकजदृशां सर्वे त्सवामंत्रणे जाते सप्रजनामिथः कृतमहोत्सा हं पुरः प्रस्थिताः· सव्याजं स्थितयोर्विहस्य गतयोः शुद्धांतमंदिरे यूनोः स्विन्नकपोलयोर्विजयते कोप्येष कंठग्रहः॥ ॥

देयुक्तौ कपोलौ ययोस्तयोः· परस्परांगसंगमेन सात्त्विकभावोदयादिति भावः· कोप्येष अलक्षितमशयः· कंठस्य ग्रहो ग्रहणं· आलिंगनमि तियावत्· विजयते· विशेषेण जयति· विस्मतीत्यर्थः· अत्र वांतःपुरं प्रत्यभिसरणेनाभिसारिकेयम्· शुद्धांतश्चावरोधश्चेत्यमरः· पह्ली कुटी ग्रामकयोरितिविश्वः· शार्दूलविक्रीडितं वृत्तम्॥ ॥श्रीमन्मकुलमर्त्तयेमलाधिपतयेनमोनमः॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामान्याभिसारिकायथेमुदाहरति· लोलद्योलेति· वारांगनावेश्या· कस्यापिकृतिनोधन्यस्य· क्रीडाकुंजगृहं· प्रयाति अभिसरति· कथंप्रयातीत्
तआह· लोलंतंवलंतं· चोलस्यप्रछदपटस्य· चमत्कृतिश्चमत्कारोयस्यांक्रियायांतयथास्यात्तथा· पुनः· प्रविलसंतीकांचीलतायाः संकृतिर्यत्र·
क्रियायांतत· पुनः· अंचज्झटोयः कंचुकस्तस्यवंधस्तेनवंधुरानम्रा· वलंती मंडितावक्षोजकुंभस्यस्तनतिर्यत्रक्रियायांतत· पुनः· स्फूर्जती

सामान्यवनिताऽभिसारिकायथा· लोलच्चोलचमत्कृतिप्रविलसत्कांचीलतासंकृतिस्यंचत्कंचुकवंधवंधुरवलद्वक्षोज
कुंभोन्नति· स्फूर्जद्दीधितिविस्फुरज्जतियलच्चामीकरालंकृतिक्रीडाकुंजगृहंप्रयातिकृतिनेः कस्यापिवारांगना·॥ ॥मु
ग्धायालज्जाप्रधानेन· मध्यमायालज्जामदनसाम्येन· प्रगल्भायाः प्राकाश्यप्राधान्येन· धीरायाधैर्यप्राधान्येन· अ
धीरायाअधैर्यप्राधान्येन· धीराधीरायाधैर्याधैर्यप्राधान्येन· ज्येष्ठायाः स्नेहाधिक्यप्राधान्येन· कनिष्ठायाः स्नेह
न्यूनत्वप्राधान्येन· परोढायाः संगुप्तिप्राधान्येन· मुग्धायाइवकन्यायाः· सामान्यवनितायाः धनप्राप्तिप्राधान्येन·
अष्टविधनायिकावर्णनमितिशेषः·

संतीदीधितिः कांतिविशेषोयत्रतत· पुनः· विस्फुरंतीयागतिस्तयावलंतीचपला· चामीकरालंकृतिः· सुवर्णालंकारोयत्रक्रियायां
तत· सर्वाण्यपिक्रियाविशेषणानि· वंधुरवंधूरौनम्रोचेतिविश्वः· शार्दूलविक्रीडितंवृत्तम्·॥ ॥संप्रतिपरिशेषयति· मुग्धाइत्या
दिशेषांतंस्पष्टम्·॥ ॥श्रीमन्मकुलमर्त्तयेमहागणाधिपतयेनमोनमः॥ ॥श्रीरामचन्द्रायनमः॥ ॥श्रीकृष्णायनमः॥ ॥

कश्चिन्नायिकागमनं कांतवियोगवि
ह्वलानायिकाजीवितं १

र.स.टी. तत्रप्राकाशंप्रागल्भ्यांस्वप्राचीनप्रकृतिंप्रदर्श्येदानींनवीनमतमभिधातुंपद्योपन्यासपूर्वकमाह· प्रस्थानमिति· काचिदग्निमक्षणेप्र
३९ तिवदति·हेजीवितप्रियतमेयातुंदेशांतरंगंतुंनिश्चितचेतसि· निश्चितंचेतोयस्यतस्मिन्प्रियतमेसति· सर्वेसमं· समकालमेवप्रस्थिताः
चलिताः· तेके· तत्राह· प्रियसखैः· प्रियाश्चतेसखायश्चते· समीपवर्तित्वात्· तैर्वलयैः कंकणैः· प्रस्थानंकृतं· तत्क्षणमेवक्षीणत्वं

प्रस्थानंवलयैःकृतंप्रियसखैरस्रैरजस्रंगतंधृत्यानक्षणमासितंव्यवसितंचित्तेनगंतुंपुरः· यातुंनिश्चितचेतसि
प्रियतमेसर्वेसमंप्रस्थितागंतमेसतिजीवितंप्रियसुहृत्सार्थःकिमुत्सृज्यते·॥ ॥श्रीरामचन्द्रायनमोनमः॥

प्राप्तम्· अधोनिर्गतमित्यर्थः· पुनरस्रैः रक्तैः अजस्रंसंततं·गतंचलितम्· विरहशोषितत्वादितिभावः· पुनःधृत्याधैर्येण· क्षणमपिनासितंन
स्थितम्· पुनः चित्तेनपुरस्तदग्रतः· स्वर्गंगंतुं·व्यवसितं· व्यवसायउद्यमःकृतइत्यर्थः· विवक्षितमाह· गंतवेसतिप्रियविंता — — — शाकज शिवः
त्वादित्यर्थः· प्रियसुहृदांसार्थसंघातः· किमुवितर्के· उत्सृज्यतेपरित्यज्यते· सार्थांतरवान्नविलंबोऽवलंबनीयइत्यर्थः· संघातमात्रकइति ३९
विग्वः· शार्दूलविक्रीडितंवृत्तम्·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादीति॰ अग्रिमक्षणे अग्रभाविनीत्यर्थः॰ प्रोष्यत्पतिकेतिलक्षणग्रंथपरंपरादुष्टोऽयंपाठः॰ ल्टदिवसतेरुदिष्यत्ससिद्धोकविप्र

इत्यादिप्राचीनग्रंथकारलेखनादग्रिमक्षणेदेशांतरनिश्चितगमनेप्रेयसिप्रवत्स्यत्पतिकापिनवमीनायिका भवितु
मर्हति॰ तथाहि॰ तस्याः प्रोषितपतिकाविप्रलब्धोत्काखुनांतर्भावः॰ भर्त्तुः सन्निधिवर्त्तित्वात्॰ नकलहांतरितायाम
तंर्भावः॰ कलहाभावात् अनवमानितपतित्वाच्च॰ नापिखंडितायामंतर्भावः॰ प्रियस्यान्योपभोगचिह्नितस्या
गमनाभावात्प्रियायाः कोपाभावदर्शनात्॰ काकुवचनकातरप्रेक्षणादिस्त्रचितांतःपक्षपातदर्शनाच्च॰ नवा
सकसज्जायामंतर्भावः॰ वारनियमाभावात्सज्जीकरणभावनिर्वेदादिदर्शनाभावाच्च॰ नस्वाधीनपतिका
यामंतर्भावः॰ अग्रिमक्षणएवसंगविच्छेददर्शनात्॰ नहिस्वाधीनपतिकायाः कदाचिदपिसंगतिविच्छेद
इतिसंप्रदायः॰ व्रजन्नपिपतिः स्वाधीनपतिकयानिरुध्यते॰ अन्यथा भर्त्तरिस्वाधीनत्वमेवतस्याभज्येत॰
नेह॰ तथासर्वथाभर्त्तुर्विदेशगमनात्॰ किंच॰ निर्वेदास्रुपातनिःश्वासवनविहारादिमदनमहोत्सवव्यतिरे

कश्चचिंत्यः॰ किंतुप्रवत्स्यत्पतिकेतिवक्तव्यम्॰ नवमीनायिकांतरणी॰ तथाहीतिप्रदर्श्यते॥ ॥श्रीमद्रामचन्द्रायनमोनमः॥ ॥

र·स·टी·
४०

अस्मयुक्तमुत्तमयामइत्यंतंस्पष्टम्· युक्तं समंजसं उत्तमयामः· भेदकत्वनंयुक्तं उत्प्रेक्षितमित्यर्थः· लक्षणंत्विति· यस्याइत्यादिवाष्पादयइत्यंतं स्पष्टम्· तत्रमुग्धाप्रवत्स्यत्पतिकायथेतिउदाहरति· प्राणेश्वरइति· क्षामोदरी कृशोदरी· नायिका· प्राणेश्वरेकांते· निर्गमायप्रयाणाय· किं

नाप्यभिसारिकायामंतर्भावः· अभिसारेतत्स्वभावादंतस्तापदर्शनाच्चेतियुक्तमुत्तमयामः· लक्षणंतु· यस्याः पतिरग्निमक्षणेदेशांतरंयास्यतिएवसाप्रवत्स्यत्पतिका· अस्याश्चेष्टा· काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसंतापसंमोहनिःश्वासवाष्पादयः· मुग्धाप्रवत्स्यत्पतिकायथा· प्राणेश्वरेकिमपिजल्पतिनिर्गमायक्षामोदरीवदनमानमयांचकार· आलीपुनर्निभृतमेत्यलतानिकुंजमुन्मत्तकोकिलकलध्वनिमाततान·॥ ॥श्रीमन्मकुलमर्त्तयेमहागणाधिपतयेनमोनमः॥ ॥ ॥ ॥

मपिकिंचिदपि· जल्पतिपृच्छतिसति· वदनंआननमयांचकार· लज्जयावक्तुमशक्यत्वादितिभावः· पुनः· आलीसखी· निभृतंमदंमंदं लतानिकुंजमेत्यप्राप्य· उन्मत्तकोकिलकलध्वनिं· आततानचकारेत्यर्थः· मत्तकोकिलध्वनिंआकर्ण्य· अयंवसंतांगं ज्ञात्वा विरहकातरतयानप्रयास्यतीतिबुद्ध्येत्यर्थः· वसंततिलकंछन्दः·॥ ॥श्रीभवानिशंकराभ्यांनमोनमः॥ ॥ ॥ ॥ ॥ ॥ शिवः
४०

मध्याप्रवत्स्यत्पतिकायथेतिताम्रुदाहरति। गंतुमिति। प्रिये गंतुं वदति पृच्छति सति। मृगदृशो नायिकायाः दीर्घनिश्वसितं न आसीत् नाभवत्। मृगदृशा इति पदं कातरत्वेनेति भावः। ---नयनयोर्जलं आविरासीत् प्रकटीबभूव। विरहजनितदुःखेनेति भावः। परंतु। कचः केशः जातावेकवचनं। किंभूतितः। आयुर्लिपिं आयुरक्षरालिं पठितुं। भालस्थलीललाटप्रदेशे। समुपाजगाम। आयुर्लिपेस्तत्र विद्यमानत्वादित्यर्थः। बलात् अति संश्लिष्टापि केशपद्धिकाविरहविंतया ललाटपदमवतीर्णे सति। अत्रोत्प्रेक्षालंकारः। वसंततिलकं छंदः।

मध्याप्रवत्स्यत्पतिकायथा। गंतुं प्रिये वदति निःश्वसितं न दीर्घं नासीन्नवाननयनयोर्जलमाविरासीत्।
आयुर्लिपिं पठितुमेणदृशः परं तु भालस्थलीं किमु कचः समुपाजगाम॥ ॥प्रौढप्रवत्स्यत्पतिकाय
था। नायं प्रभवति प्रभुर्वामपि तन्नुत्यागे वियोगज्वरस्ते नाहं विहितांजलिः पशुपते पृच्छामि सत्यं वद। तां
बूलं कुसुमं पटीरमुदकं यद्धूमिदीपतेस्याद् अत्रैव परत्र तत्किमु विषं ज्वालावलीदुःसहम्॥ ॥

॥ ॥प्रौढांप्रवत्स्यत्पतिकामुदाहरति। नायं प्रभवतीति। भोः पशुपते। तनुत्यागेपि। अयं वियोगज्वरः। प्रभुर्युवां स्त्रीणाम्। न प्रभवति। तेन हेतुना विहितांजलिः कृतांजलिरहं पृच्छामि। सत्यं यथार्थं वद। किं तदित्याह। तांबूलं कुसुमं पुष्पम्। पटीरं चंदनं उदकं पद्धूमिदीपते। मृतो देशेनेत्यर्थः। तत्सर्वं अत्रैव यथेत्यर्थः। परत्र स्वर्गेपि। किमु विषं ज्वालावलीदुःसहं अग्निज्वालावद्दुःखे

परकीयांप्रवत्स्यत्पतिकामुदाहरति· स्वस्तमिति· काचित्कांतं प्रवदति· हे कांत· पन्नगमूर्द्धि· पन्नगानां सर्पाणां मार्गप्राप्तानामित्यर्थः· मू
र्द्धि मस्तके· पादलग्नं स्वस्तं· त्वदर्थे कालो विगलित इति तात्पर्यार्थः·· किंच· गुरोः श्वशुरादेः· भक्तिः सेवा· विमुक्ता त्यक्ता· त्वदर्थं इत्य
र्थः·· पुनः· नीतिः कुलमर्यादा· त्यक्ता· भवतो हेतोर्मया किं न दुःकृतं· अपितु सर्वमपीत्यर्थः·· त्वयि प्रस्थिते सति· उक्तं· एतद्वक्ष्यमाणमित्य

परकीयाप्रवत्स्यत्पतिका यथा· स्वस्तं पन्नगमूर्द्धि पादयुगलं भक्तिर्विमुक्ता गुरोस्त्यक्ता नीतिरकारि किं न
भवतो हेतोर्मया दुःकृतं· अंगानां शतयातना नयनयोः कोपि क्रमो रौरवः कुंभीपाकपराभवश्च मनसो युक्तं त्वयि
प्रस्थिते·

र्थः· तदेवाह· अंगानां शतयातनां· असंख्यतीव्रवेदनाः· यातना तीव्रवेदने त्यमरः· पुनः· नयनयोः कोपि रौरवः· क्रमः रौरवनरकविन्यास इ
त्यर्थः· यद्वा· रुरुश्चित्रमृगः रुरोरयं रौरवः· क्रमः पातः· तद्वत्पतनं पश्यंत्या मे जीवितं पतयतीत्यर्थः·· च पुनः· मनसः कुंभीपाक
पराभवः· कुंभीपाकनरकवत्पीडा वेत्यर्थः· यद्वा· कुष्मांकस्तस्यां पाको विकोशत्त्वतद्वत्पराभवः· यथाग्निना कुष्मांडं पच्यते न बाहिरग्निना
तप्तायां मत्तनो मनसो यथा भविष्यतीत्यर्थः· शार्दूलविक्रीडितं वृत्तम्·॥ ॥श्रीभैरवायनमो नमः॥ ॥ ॥ ॥ ॥ ॥

सामान्यवनिताप्रवत्स्यत्पतिकामुदाहरति मुग्धामिति · वारांगनावेश्या · विगलन्नयनांबुधारा · विगलती नयनांबुधारा यस्याः सा इत्थमनेन प्रकारेण · निगाघ्रिपतमंकरयोर्बभार दधे · इत्थं कथम् · हे प्रिय · वलपाय · वलपंकं कणंरक्षितुमिव र्थः · मुग्धां अंगुलीयकं प्रदेहि · यतः इ तद्वलयं भवद्वियोगं आसाद्य प्राप्य · सहसा आकस्मिकं · वहिर्यास्यति · पतिष्यतीत्यर्थः · वसंततिलकं छंदः॥ ॥अथोत्तमत्वादिभेदानि रूपयति · अहितकारिण्यपीति · अस्या उत्तमाद्याः · स्पष्टमन्यत् · यथेति तामुदाहरति · पतिरिति · वामभ्रुवा · वामे सुन्दरे भ्रुवौ यस्याः सा तया

सामान्यवनिताप्रवत्स्यत्पतिका यथा · मुग्धां प्रदेहि वलयाय भवद्वियोगमासाद्य यास्यति वहिः सहसा यदेतत् · इत्थं निगाघ विगलन्नयनांबुधारा वारांगना प्रियतमं करयोर्बभार॥ ॥अहितकारिण्यपि प्रियेहितकारिणी उत्तमा · अस्या उत्तमैव सकलाश्चैषा · तद्यथा · पतिः शयनमागतः कुचविचित्रितोरस्थलः प्रसन्नवदनाम्बुजैरपमतर्पि वामभ्रुवा · अवर्जित भगास्मित द्युतिपटीरपंकद्रवैरसज्जि विलसद्विलोचनवमत्कृतेन्दीवरैः॥ ॥श्रीमद्रामचन्द्राय नमो नमः॥

कुचविचित्रितोरस्थलः कुचाभ्यां विचित्रं सपत्न्यां आलिंगनेनेति भावः · उरः स्थलं यस्य एवं भूतः · शयनं शय्यां · आगतः प्राप्तो यम् · प्रसन्ना निधानि वदनानि तान्येवाम्बुजानि तैः आतर्पितः प्रीणितः · पुनः · शुभगाया स्मितद्युतयस्ता एव पटीरपंकद्रवाः चंदनकर्दमरसास्तैः · अर्चितः चर्चितः · पुनः · विलसती विलोचनेभ्यस्त्वो यच्चमत्कृतानि कांतिच्छटाविक्षेपः तस्मात् एव इन्दीवराणि नीलकमलानि तैः अपरजि रजितः · निष्कपटत्वात् दैहिकद्रव्यैरेव संमानितः · पतिहितस्याप्युत्तमत्वं · चमत्कृतेरंबुजैरितिः · समीचीनपाठे · उत्तमं जनुसत्वात् वा

मंसलवेप्रतीपेवद्विलेवातिसुदंरेतिबिम्बः: पुष्पितंछंदः॥ ॥

र.म.टी. ४२ अथ मध्यमां हिताहितकारिणीत्यादिचेष्टां तं स्पष्टम्. यथेति तामुदाहरति. कांत इति. सागसि सापराधे कांते. कंचुकस्पर्शि. कंचुकं स्प
शतीति. तस्मिन्सति. साचीकृतग्रीवया. साचीकृता वक्रीकृता ग्रीवा यया तया नायिकया. कोपेन कषायेन. ईषद्रक्ता मन्मथशरा येन क
राः कटाक्षांकुराः. ताः कांतागतागतविभ्रांतिरूपावलोकनच्छटायुक्ताः प्रेरिताः वपुनः. साकूते साभिप्राये. चाटुकारिणी सखी सर्वः.

हिताहितकारिणि प्रियतमे हिताहितचेष्टावती मध्यमा. अस्यास्त्वयवहारानुसारिणी चेष्टा. यथा. कां
ते सागसि कंचुकस्पृशि तया साचीकृतग्रीवया युक्ताः कोपकषायमन्मथशराः कृताः कटाक्षांकुराः॥
साकूते तदहासकेसरचयो माध्वीकधारालसा प्रीतिः कल्पलता च कांचनमहादानीकृता भ्रुवा। ॥

भ्रुवा. शोभने भ्रुवौ यस्याः सा. तया. कांचनः अपूर्वा कल्पलता प्रीतिः. मनोरथसंपादकत्वाद्व्रतेत्युक्तम्. महादानीकृता. प्रीतेरधि
कत्वेत दातत्वम हता. किंभूता प्रीतिः. दरः ईषत् हास एव केशरः किंजल्को यस्मिन. एवं रूपं यद्वक्त्रं तदेव माध्वीकं मधु. तस्य धारा
प्रस्रुतिस्तया अलसा निर्भरा. कल्पलतापि मधुकेशरयुता भवति. दरहासकरितिप्रियविशेषणे. दरोहासो यस्मिन्नुरसो माधु शिवः ४२
र्यादित्युक्तम्. ववइति व्याख्याने प्रियहासस्यानुपयुज्यमानत्वाद सम्ंजसम्. शार्दूलविक्रीडितं वृत्तम्॥ ॥ ॥ ॥

अथाधमाऽहितकारिण्यपीति चेष्टां तस्य च्छम्। तत्र चंडी कोपनस्त्री प्रसंमते इति विश्वः। तद्यथेत्यधमामुदाहरति। प्रस्थान इति।
हे सखि वियोनायकः प्रस्थाने पुष्पत्रोटनादिनिमित्तगमने। तव मुखांभोरुहे मुखकमले। कमलेन छायां करोति। त्वन्मुखातप
बाधाभीत्येति भावः। पुनः शिशिरयाशीतलया। श्रीखंडद्रवस्य चंदनरसस्य धारया। पुरोग्रे। मार्गीसिंचति। तस्मिन्प्रेयसि अ

हितकारिण्यपि प्रियेऽहितकारिणी अधमा। एषैव च निर्मितकोपना चंडीत्यभिधीयते। अस्यानि
ष्कारणकोपत्वादधमैव चेष्टा। तद्यथा। प्रस्थाने तव यः करोति कमलच्छायां मुखांभोरुहे श्रीख
ण्डद्रवधारया शिशिरया मार्गं पुरः सिंचति। तस्मिन्प्रेयसि विद्रुमद्रवनदीरिंगत्तरंगभ्रमिभ्रांतकां
तसरोजपत्रसदृशाभ्रूयो दृशा कुप्यति।

तिशयप्रिये। स्त्रयः पुनः दृशा कुप्यति। क्रोधं प्रकटयसीत्यर्थः। किंभूतया। यदिभ्रूमेति। विद्रुमाणां द्रवो निर्झरस्तस्य या नदी
तस्याम्। रिंगत्स्खलत्तोये तरंगास्तेषां। भ्रमिभ्रमिः आवर्त इति यावत्। तस्मिन्भ्रांतं अनेकवक्रीकांतं यत्सरोजपत्रं। तत्सदृ
शा समानया। विद्रुमो रक्तके दंडे प्रवाले वालपल्लवे इति विश्वः। स्यादावर्तोंभसां भ्रमः इत्यमरः। शार्दूलविक्रीडितं वृत्तम्।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वित्तरभीयाग्रंथविस्तरभीत्या. प्रत्येकमेतासामिति. एतासां पूर्वोक्तानां नायिकानां. प्रत्येकं एकां एकां प्रतिनैव उदाहृताउदाहृ
रतेनोक्ताइत्यर्थः. एवं नायिकां निरूप्येदानीं तत्संख्यादिसहायिनीः अपि निरूपयन्सखीं दर्शयति. विश्वासेति. विश्वासः करो
तीति सा पार्श्वसमीपे वर्ततीति सा सखी. तस्याः सख्याः मंडनं अलंकाररचना. उपालंभः सनिंदोवचनविशेषः. परिहासः उ

विस्तरभियाप्रत्येकमेतासामुत्तममध्यमाधमभेदानोदाहृताइति. विश्वासविश्रामकारिणी पार्श्ववर्तिनीस
खी. तस्या मंडनोपालंभशिक्षापरिहासप्रभृतीनि कर्माणि. मंडनं यथा. स्तनकनकमहीधरोपकंठे प्रिय
करचदुच्चदुच्चलसत्प्रमोदं. रहसि मकरिकामिषा लिखंती कमलमुखी कमलेः सखीं जघान.॥ ॥ ॥

पहासः. यः सनिंद उपालंभ इत्यमरः. तत्र च मंडनमुदाहरति. स्तनकनकेति. कमलमुखी नायिका. कमलेः लीलाकमलैः स
खीं जघान. कौतुकेन ताडनं चकारेत्यर्थः. किंभूतां सखीं. स्तनकनकेति. स्तनरूपकनकमहीधरः स्वर्णपर्वतस्तस्य. उपकंठे
अतिसमीपे. मकरिकायाभिषात्. उद्यत्सत्प्रमोदं उद्यत्सत्प्रमोदो यस्यास्तं प्रलकमित्यर्था. प्रियस्य करपल्लवं. रहसि एकांते

लवतीं. प्रभिनाताछसें:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपालंभमुदाहरति· सांद्रध्वानैरिति· हे नाथस्वामिन्· सांद्रध्वानैर्निरंतरं ध्वनिभिः· मुखरिता दिशो याभिस्ताः· तोयदानां श्रेणयः पंक्तयः
३ धारासारैः संपाते· धरणीवलयमंडलं· सर्वतः प्लावयंति· तेन उक्तहेतुना· मत्सखीमुक्तमेव· अखंडनमनोभवाविपुलं महांतं स्नेहं
वहति· मद्वियोगमशक्नुवत्कांतो मे पावलंबनेन सभागमिष्यतीति मत्वेति भावः· त्वं निःस्नेहः· तदिदं मम विस्मयाय आश्चर्याय· ताह
शे जनेऽभावनेदं विस्मयस्यार्थः· मंदाक्रांता छंदः॥ ॥अथ शिक्षामुदाहरति· सानंदमिति· काचित्सखी वदति· हे आलि सखि·

उपालंभोयथा· सांद्रध्वानैर्मुखरितदिशः श्रेणयस्तोयदानां धारासारैर्धरणिवलयं सर्वतः प्लावयंति· तेनास्ने
हं वहति विपुलं मत्सखी मुक्तमेव त्वं निःस्नेहो यदसि तदिदं नाथ मे विस्मयाय॥ ॥शिक्षा यथा· सानंदमालि
वनमालि विलोकनाय निर्गच्छ कुंजमिति किंतु विचारयेथाः· झंकारिणो मधुलिहो दिवसे भ्रमंति रात्रौ पुनश्चपल
बंधुपुराश्चकोराः·

वनमालि विलोकनाय श्रीकृष्णदर्शनाय· सानंदं यथास्यात्तथा· कुंजं निर्गच्छ· किंतु इति विचारयेथाः· विचारं कुर्वीथाः· इति किं
तत्राह· झंकारिणो झंकारध्वनियुक्ताः मधुलिहो भ्रमराः· दिवसे भ्रमंति· पुनः रात्रौ· चपलानि चंचुपुटानि येषां ते चकोराः· चं
द्रिकाप्रियाभ्रमंतीत्यर्थः· तवांगस्योगंधमनुलक्ष्य चंद्रचंद्रिकास्वादनार्थं· भ्रमद्भ्यां मधुलिट्चकोराभ्यां· बहुलजनप्रीति
दृश्यते· तेन सा यं समयोगां तु योग्य इति नाम्न इति वाक्यार्थः· वसंततिलकं छंदः॥ ॥श्रीरामचंद्रायनमोनमः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिहासमुदाहरति· आगारेति· सीता जानकी· इत्थं सखीजनस्य वचः· श्रीरामभद्रीयणोक्तं· प्रतिपद्य प्राप्य· कृत्वेत्यर्थः· स्मितस्य
द्युतिभिः उत्तरयांचकार· हासकांतिभिरुत्तरं दत्तवतीत्यर्थः· इत्थं कथं· आगारं गृहं तद्भित्तिलिखिताद्युः लोकभर्तुर्भुवनपाल
स्य श्रीकृष्णस्य· दशमूर्त्तिम्मत्स्यकूर्मवराहनृसिंहवामनपर्शुराम श्रीराम बलराम बुद्ध कल्किरूपा द्युः कः किंनामेत्यर्थः· नि
वेदय त्वं कथय याव· भवनागारमंदिरमित्यमरः· वसंततिलकं छन्दः॥ ॥सख्याः परिहासवत्परिहासानुकूल्यं प्रियस्यापि

परिहासो यथा· आगारभित्तिलिखिताद्युनिवेदय त्वकः सप्तमोदशममूर्त्तिषुलोकभर्तुः· इत्थं सखीजनव
चः प्रतिपद्य सद्यः सीतास्मितद्युतिभिरुत्तरयांचकार॥ ॥सख्याः परिहासवद्यथा· भ्रूसंज्ञया दिशतितन्वि
सखीनवाग्निरित्थं विहस्यसुखवेदितिमापे· राधाविरपदधानघ्राणद्रूयमानविंवाधरावदनमानमयांचकार·

परिहासः· प्रियकृतपरिहास इत्यर्थः· यथेति तमुदाहरति· भ्रूसंज्ञयेति· दधानघ्राणेन द्रूयमानस्तप्यमानो विंवाधरोयस्याः सा राधा
चिरायचिरकालं· वदनं आनमयांचकार· कसति· हे तन्वि· तनोतिशृंगाररसमितितन्वीतस्याः संवोधनं· भ्रूसंज्ञया सखी
दिशसि प्रेरयसि· परं वन्हिर्वनेनैर्नदिशसीत्यर्थः· इत्थं मुरवैरिणो श्रीकृष्णे विहस्य भाषमाणे सति· अत्र दंतक्षतप्रका
शात्मे परिहासः· वसंततिलकं छन्दः॥ ॥श्रीमद्रामचन्द्रायरघुवंशतिलकाय नमो नमः॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रियस्येत्यादिनाप्रियायाः परिहासंपद्येनुदाहरति· दिव्यमिति· शैलभुवापार्वत्या· इत्थंविहस्यलपितउक्तः· शंभुः· वः शिवायकल्याणाय· अस्तु· इत्थंकथं· दिव्यरूपशपथपूर्वादेतद्धारं निन्हुवानंवदति· हेशंभो धापिस्यापियदिहासः· जलदिव्यं शपथविशेषः कथं· यतस्तवमौलौमस्तके· सुरधुनी· यः शिरसिगंगांवहति· तस्यकथंजलं दिव्यमित्यर्थः· पुनः· अहिःसर्पः· कथंदिव्यं· सचाहिस्तवांगोपरिः सर्पालंकारस्यकथंसर्पोदिव्यमित्यर्थः· तस्माद्धूतविधौत्वयाभ्यर्थितयोरितोहारः परित्यज्यतामिति· शार्दूलविक्रीडितंवृत्तम्.॥ ॥सर्वांनि

तस्मिञ्जौत्स्नोर्णप्रीतिप्रुक्तं विरवप· अंस ॥
पापविस्मरिष्पतीसर्पः आपाष्ठरः॥ ॥

प्रियस्यपरिहासवत्प्रियायामपिपरिहासः· यथा· दिव्यंवारकथं—पतः सुरधुनीमौलौकथंपावकोदिव्यंतद्धिविलोचनंकथमहिर्दिव्यंसवांगेतव· तस्माद्धूतविधौत्वयाद्यमुषितोहारः परित्यज्यतामित्यंशैलभुवाविहस्यलपितः शंभुः शिवायास्तुवः॥ ॥दूत्याव्यापारपारंगमाद्दूती· तस्याः संघट्टनविरहनिवेदनादीनिकर्माणि· संघट्टनेयथा· अंबतिरजनीरुदंतिचेतिमिरमिदंदूतिवंचतिमनोभूः· उक्तंनत्सजनभक्तंविरवपरक्तंमनस्मिन्.

रूपायद्दूतींदर्शयति· दूत्येति· दूत्यंदूतस्यभावः· दूतवणिग्भ्यांचेतिशात्रेणभावेयत्· तद्व्यापारेपारंगच्छतीतिपारंगमातस्याइति· संघट्टनंद्वयोर्मेलनं· संघट्टनंयथेनुदाहरति· काचित्कांतानयनरूपप्रतीक्षांदूतींप्रतिवदति· हेदूति· रजनीरात्रिः· अंयातियाप्नोति· तिमिरंअंधकारंइदंउदंचतिउद्गच्छति· मनोभूःकामः वंचतिच्छलति· प्रुक्तंयदुक्तंतद्दर्शीकरणादिरूपमित्यर्थः· नत्सजनविस्मदेत्यर्थः·

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

र. स. टी. ४५ विरहनिवेदनं यथेत्युदाहरति. वक्रे इति. हे श्रीकृष्ण. धात्रा ब्रह्मणा. धरामंडले चंद्रमुखी राधा नायिका. प्रदीपकलिका दीपज्योतिः.
वक्रे क्षिपतेस्म. तावता किं तत्राह. तस्यां चंद्रमुख्यां राधायां. दैववशात्. चरमापि अंतिमापि. दशा अंतर्दशा. अंतावस्थेत्यर्थः.
दीपपक्षे दशा वर्तिः. प्राणोवाकुल्येन. समुन्मीलति सम्युगुदति. तन्नतो हेतोः. नतेन नम्रेण. शिरसा उपलक्षिता प्रभुः. अ

विरहनिवेदनं यथा. वक्रे चन्द्रमुखीप्रदीपकलिका धात्रा धरामंडले तस्यां दै
ववशाद्दशापि चरमा प्राप्य समुन्मीलति. तन्नम्रः शिरसा नतेन सहसा श्री
कृष्ण निक्षिप्यतां स्नेहस्तत्र तथा यथा न भवति त्रैलोक्यमंधं तमः॥ ॥

वीजयापि मिलित्वा निवेदयामीत्यर्थः. सहसा आकस्मिकं तत्र राधारूपदीपकलिकायां. तथेति तत्प्रकारेण स्नेहः प्रेम निक्षि
प्यताम्. अन्यथा त्रैलोक्यं अंधं तमो भवति. भवत्स्नेहं विना सर्वं वस्तु निविडांधकारतुल्यं तस्या भवतीत्यर्थः. दीपपक्षे
स्नेहस्तैलम्. यथा तैलाभावेन निर्वाणमाप्नोति चरमावस्थापि दीपज्योतिस्तैलदानेन प्रकाशते इति. अत्र श्लेषोपमा शिवः ४५
लंकारः. शार्दूलविक्रीडितं वृत्तम्.॥ ॥श्रीमन्मकुलमर्त्तये महागणाधिपतये नमो नमः॥ ॥ ॥ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

नायिका निरूप्येदानीं नायकं निरूपयति। शृंगारस्येति। उभयनिरूप्यत्वात्। नायिकानायकयोर्निरूपणीयत्वात्। शेषं स्पष्टं। स च
नायकस्त्रिविधस्त्रिप्रकारकः। पतिरित्यादि। उपपतिर्जारः। वेशो वरतिर्वैशिकः। जारत्वमुपपतित्वं समौ। त[illegible]रवानगरं वेशो वेश्याज
नसभाम्यपरस्समरः। तत्र पतिं दर्शयति। विधिवदिति। अग्न्यादिसाक्षित्वेनेत्यर्थः। पतिमुदाहरति। त्वमिति। शिवो वदति। हे पीयूषम
यूख। पीयूषं अमृतं मयूखाः किरणाः यस्य स। तत्संबोधनं। अमृतकिरणचंद्रेत्यर्थः। सेकिमु। फणानां भोगैर्विस्तारैः शनैर्वीज

शृंगारस्योभयनिरूप्यत्वान्नायकोपि निरूप्यते। स च त्रिविधः पतिरुपपतिर्वैशिकश्चेति। विधिवत्पाणिग्रा
हकः पतिः। यथा। त्वं पीयूषमयूख मुंच शिशिरं स्त्रिग्धान्सुधासीकरांस्त्वं भोगीन्द्र विलंबसे किमु फणाभो
गैः शनैर्वीजय। त्वे स्वर्वाहिनि किंच सिंच सलिलैरंगे। शिरीषोपमे सेयं शैलसुता कठोरमहसः कांतापथि
क्लाम्यति॥ ॥

यवान्मुत्यजेत्यर्थः। किंच। भो स्वर्वाहिनि स्वर्गंगे। त्वं सलिलैः सिंच। यतः शिरीषोपमे। शिरीषपुष्पतुल्येंऽगे रूपलक्षिता। सा इयं शै
लसुता पार्वती। कठोरमहसः उग्रतेजसः सूर्यस्येत्यर्थः। कांतापथिमार्गे। क्लाम्यति ग्लानिं प्राप्नोति। पीयूषमयूखं तु धेयमपरः।
स्निग्धांत्मत्स्यजांद्र इति शब्दार्णवः। शार्दूलविक्रीडितं वृत्तम्॥ ॥श्रीमन्मकुलमर्त्तयेगणाधिपतयेनमोनमः॥ ॥

र·स·टी· अथपतिंविभजते·अनुकूलेत्यादिनांत·अत्रानुकूलंदर्शयति· सर्वकालिकेति· सर्वकालभवंसार्वकालकम·अध्यात्मादित्वाट्ठञ्
४६ सर्वकालमनुरक्तः·कदापिनविरक्तइत्यर्थः·शेषंस्पष्टम·यथेतिदर्शयति·पृथ्वीति·सीतयासहप्रस्थितःश्रीरामोवदति·हेपृ
थ्वित्वंकोमलाभव·सीतायाश्चरणकमलयोरतीवकोमलत्वात·हेदिनमणेसूर्य·त्वंशैत्यंशीततामंगीकुरु·उष्णतांपरिहरेत्य

अनुकूलदक्षिणधृष्टशठभेदात्पतिश्चतुर्धा·सर्वकालेपरांगनापराङ्मुखत्वेसतिसर्वकालमनुरक्तोऽ
नुकूलः·यथा·पृथ्वित्वंभवकोमलादिनमणेत्वंशैत्यमंगीकुरुत्वंवर्त्मन्लघुतांप्रयाहिपवनत्वंस्वेदमुत्सा
रय·स्वांत्रिध्वंसयदंडकावनगिरेनिर्गच्छमार्गाद्बहिःश्रीतांशोविपिनंमयासहयतोनिर्गंतुमुत्कंठते·

र्यः·हेवर्त्मनहेमार्ग·त्वंलघुतांअल्पतांप्रयाहिप्राप्नुहि·हेपवनवायो·त्वंस्वेदंश्रमंउत्सारयदूरीकुरु·हेदंडकावनगिरे·दंडकयारण्य
क्षस्याधिष्ठितंवनंदंडकारण्यमित्यर्थः·तत्संबंधेऽगिरे·सांनिध्यंश्रय·नैकट्यंकुर्वित्यर्थः·किंच·मार्गाद्बहिर्निर्गच्छ·मार्गंप शिवः
रित्यज्यदूरंतिष्ठेत्यर्थः·यतः·असौसीतामयासहनिर्गंतुमुत्कंठतेवांछतीत्यर्थः·शार्दूलविक्रीडितंवृत्तम्॥ ॥ ॥ ॥ ४६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथदक्षिणं दर्शयति· सकलेति· सकलनायिकाविषयः समसहजानुरागो यस्य सः· यथेतित्तमुदाहरति· एतदिति· गोपीजनम
ध्यस्थं मात्मानं निरीक्ष्य श्रीकृष्णः सखायं वदति· एतस्य मदृशांसुन्दरीणां सहस्रं पुरो स्फुरति प्रकाशते· कुत्रकस्या विषये अक्षि
द्वयं निवेशयामि· त्वं कथय· समानुरागाख्येतामुनेत्रद्वयं कयं युगपन्निवेशयामीति विप्रतिपन्नो भ्रमः· इतिआकलय्य विवा

सकलनायिकाविषयकसमसहजानुरागो दक्षिणः· यथा· एतत्पुरः स्फुरति पद्मदृशां सह
स्रमक्षिद्वयं कथय कुत्र निवेशयामि· इत्याकलय्य नयनांबुरुहे निमिल्य रोमांचितेन वपु
षा स्थितमच्युतेन॥ ॥

र्ष्य· रोमांचितेन वपुषा· उपलक्षितेन· अच्युतेन कृष्णेन· नयनांबुरुहे नेत्रकमले· निमील्य स्थितम्· न किंचित्कृतमित्यर्थः· इ
तरैकस्या वस्या पानिरसत्वं विंस्यम्· तथावनीतगोविंदे· स्निग्धपतिकामयितुं वती सत्रापि निरसत्वम्· वसंततिलकं छंदः॥ ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपयच्छंदर्शयति· अपरइति· कापिसखीवदति· भूयोवारंवारं· निश्शंकंयथास्यात्तथा· कृतदोषोपिकृतापराधोपि· भूयोनिवा
रितोपि· नात्रागंतव्यमित्यादिनावचनेन· भूयः प्रश्रयेविनये· परापलोदत्तमानसइत्यर्थः· यथेति· धृष्टमुदाहरति· बद्ध
दृति· ययाहारैः· कमलयोर्वद्धोपि· पुनः· द्वारतोद्वारात्· वारितोपि· स्वापंनिद्रांज्ञात्वा· पुनरुपगतः समीपंप्राप्तः· ततः दूरतो

भूयोनिश्शंकंकृतदोषोपिभूयोनिवारितोपिभूयःप्रश्रयःपरापलोधृष्टः· यथा· ब
द्धोहारैःकरकमलयोर्द्वारतोवारितोपिस्वापंज्ञात्वापुनरुपगतोदूरतोदत्तदृष्टिः· त
ल्पोपांतेकनकवलयंभुक्तमन्वेषयंत्याहृष्टोधृष्टःपुनरपिमयापार्श्वएवप्रसुप्तः। ।

दूरात् दत्ताप्रेरितादृष्टिर्येनसः· मज्ञावंज्ञातुमिच्छयेतिभावः· पुनः· तल्पोपांतेशय्यासमीपे· भुक्तंस्थापितंकनकवलयं· रात्रौ
तालंकृत्वासुप्त्वादित्यागमोक्तंतदितिभावः· यद्वा· भुक्तमेवंभूतस्यापिविरहेएकृशत्वात्पतितमित्यर्थः· अन्वेषय ॥
त्याअन्वेषणंकुर्वत्यामया· पार्श्वेप्रसुप्तएवधृष्टोदृष्टः· मन्दाक्रान्ताछन्दः·॥ ॥श्रीकृष्णायनमोनमः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शठं लक्षयति· कामिनीत्यादि स्पष्टम्· शठ इत्यस्याकारः· मौलौ शिरसि· दाममालां विधाय कृत्वा· पुनः· भालफलके ल
लाटपट्टे· पत्रावलीम् आलिख्य· पुनः भुजंगयोः केयूरं निधाय· पुनः कुचयोः मुक्तास्त्रजं विन्यस्य· मृगदृशोः नायिकायाः
विश्वासं समुपार्जयन् उत्पादयन्· काञ्चीनिवेशच्छलात्· काञ्चीः क्षुद्रघंटिकां पानिवेशोपयास्थानपक्षे· हस्तच्छलात्·

कामिनीविषयकपटुः शठः· यथा· मौलौ दाम विधाय भालफलके आलिख्य पत्रा
वलीं केयूरं भुजयोर्निधाय कुचयोर्विन्यस्य मुक्तास्रजम्· विश्वासं समुपार्जयन्मृ
गदृशः काञ्चीनिवेशच्छलान्नीवीग्रंथिमपाकरोति मृदुनाहस्तेन वामभ्रुवः॥ ॥

मृदुना· शनैः शनैः करणं· रूपेण हस्तेन· वामभ्रुवो वक्रभ्रुवो· नीवीग्रंथिम्[illegible]पाकरोति दंतुमिच्छयापरिहरतीत्यर्थः· नाय
कस्योत्तममध्यमाधमत्वेन दक्षिणशठधृष्टा इति निरूपणीयत्वे उक्तमस्त धृष्टशठ इत्यसमीचीनः· शार्दूलवि
क्रीडितं वृत्तम्॥ ॥

CC-0 In Public Domain. Digitization by eGangotri. Funding: MIDR

उपपतिं लक्षयति· आचारेति· आचारस्य आम्नोपदर्शितमार्गस्य· हानिहेतुर्नाशहेतुरित्यर्थः· उपपतिमुदाहरति· शंकाशंखव
लितेनेति· कामिनीव कामी च कामिनौ· तयोः· तत्किं रतं· अद्भुतमित्यर्थः· तदेवाह· यत्र रतेः· शंखवलितेन चकितेन नयनप्रांतेन न प्रेक्ष्यते· यत्र वा· रते· केष्वरं ध्वनिना भरिअ धिकं यो भीतिस्तथाच· किंच· यथास्या नो श्लिष्यते नालिंग्यते· यत्र

आचारहानिहेतुः पतिरुपपतिः· यथा· शंकाशंखवलितेन यत्र न नयनप्रांतेन न प्रेक्ष्यते केष्वर
ध्वनिभरिभीतिचकितं नो यत्र वाश्लिष्यते· नो वा यत्र शनैरलग्नदशनं बिंबाधरः पीयते नो
वा यत्र विधीयते च मणितं तत्किं रतं कामिनोः॥ ॥श्रीमद्रामचन्द्राय नमो नमः॥ ॥

वा· अलग्नाः दशना दंता यस्मिन् तत्· अलग्नदशनं यथा स्यात्तथा· शनैर्मन्दं मन्दं· बिंबाधरः नो पीयते· यत्र वा· मणितं
रतिकूजितं· न विधीयते न क्रियते· प्रच्छन्नकामत्वादिति भावः· शार्दूलविक्रीडितं वृत्तम्॥ ॥श्रीकृष्णाय नमः·
श्रीमद्गुरुचरणकमलेभ्यो नमो नमः॥ ॥श्रीकालभैरवाय नमः॥ ॥श्रीगणेशाय नमः॥ ॥ ॥ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपपतिरपिचतुर्द्धाचतुःप्रकारः अनुकूलाधुक्तभेदैरित्यर्थः॰ परंतुशठत्वं॰ तत्रतेषुनियतंनिश्चितं॰ परेअनुकूलादयोऽनियताः॰
अथवैशिकंदर्शयति॰ बहुलेति॰ अद्भ्रंबहुलंबह्विस्मरः॰ यथेतितम्मुद्राहरति॰ कांचीति॰ कश्चित्सखायंवदति॰ वारविलासवत्याः
रपायाः॰ कमपिअनंगरंगकाम्यविलासं॰ आशास्महेवांछामः॰ किंभूतमनंगरंगं॰ काच्याः कलक्कणितेनमधुरास्फुटध्वनि

उपपतिरपिचतुर्द्धा॰ परंतुशठत्वंतत्रनियतं॰ अनियताःपरे॰ बहुलवेश्योपभोगरसिकोवैशिकःस्य
था॰ कांचीकलक्कणितकोमलनाभिकांतिंपारावतध्वनिसविचित्तकंठपालिम॰ उद्भ्रांतलोचनव
कोरमनंगरंगमाशास्महेकमपिवारविलासवत्याः॥ ॥श्रीमत्कृष्णायनमोनमः॥ ॥

ना॰ कोमलामधुरानाभाकांतिर्यस्मिन्नं॰ पुनः॰ पारावतानांध्वनितेनकूजितेनःविचित्रिताकंठपालिर्यत्र॰ नानाविधिरतिकू
जितवानुर्यादितिभावः॰ पुनः॰ उद्भ्रांतोलोचनचकोरोयत्रतम॰ मन्मुखचंद्रिकाया— — मितिभावः॰ वसंततिलकंछंदः॥ ॥

वैशिकंविभजते. वैशिकस्त्विति स्पष्टम्. तत्रोत्तमवैशिकं लक्षयति. दयितापाइत्यपिस्पष्टम्. यथेति तमुदाहरति. वक्षुरिति.
कांतःपक्ष्मलदृशः. प्रापासिति. पक्ष्मालि यस्यां. तादृशी दृग्यस्याः. सा तस्या नायिकायाः. शोणारविन्दश्रियं. शोणारविन्दस्य
रक्तकमलस्य श्रीः शोभा यस्मिन् तत्तम्. कोपोदयेनेति भावः. नेत्रप्रांतं उदीक्ष्य उर्द्ध्वदृष्ट्वा. उच्चैः अधिकं जल्पति. स्मितं हास्यं

वैशिकस्तूत्तममध्यमाधममेदास्त्रिधा. दयितापाऽत्यः प्रकोपेपि उपचारपरायणउत्तमः. यथा.
वक्षुःप्रांतमुदीक्ष्य पक्ष्मलदृशः शोणारविन्दश्रियं नोच्चैर्जल्पति न स्मितं वितनुते नो स्लाति वीटीं नवा.
तल्पोपांतमुपेत्य किंतु पुलकभ्राजत्कपोलद्युतिः कांतः केवलमाननेन शिरसा भुक्तां स्रजं गुंफति। ।

नवितनुते न विस्तारयति. नवा वीटीं गृह्लाति. किंतु तल्पोपांतं शय्यासमीपं उपेत्य प्राप्य. पुलकै र्भ्राजंती कपोलयो र्द्यु
तिर्यस्य सः. केवलं एकं यथा स्यात्तथा. आननेन शिरसाउपलक्षितः भुक्तां स्रजं गुंफति. तन्त्री तयेग्रथतीत्यर्थः. शा
र्दूलविक्रीडितं वृत्तम्.॥ ॥श्रीमन्मंगलमूर्त्तये महागणाधिपतये नमो नमः॥ ॥श्रीकालभैरवाय नमः॥ ॥

मध्यमं लक्षयति· प्रियायाः इति स मध्यमः· यथेति तमुदाहरति· आस्यमिति· कश्चिन्मध्यमनायको नायिकांप्रति वदति· यद्य
पीदं आस्यं हास्यवर्जितं· पुनः· लास्येन गीतादिना· वचो वचनं· वीतं रहितं· पुनः· शोणसरोजस्य कांति पल्लिरः· ततोने
त्रकोपेनेति भावः· तदपि क्वापि प्रदेशे विभ्राम्यतामित्यर्थः· यतः मुदृशस्तव सापत्नः सायंभव इति सर्वत्र योज्यम्·

प्रियायाः प्रकोपेयः प्रकोपमनुरागं वा न प्रकटयति चेष्टायामनोभावं गत्वाति स मध्यमः· य
था· आस्यं यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रं शोणसरोजकांति तदपि क्वापि क्षर
त्वा· आस्यं यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रे शोणसरोजकांति तदपि क्वापि क्षर
पा· आस्यं पद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रं शोणसरोजकांति तदपि क्वापिक्षप
ला· स्थीयताम्· मालायाः करलोघमोमकरिकारंभः कुचाभोगयोर्धूपः कुंतलयोरलीषु सुदृशः सा
यंतनो दृश्यते॥ ॥

विचरचनाविशेषः· आभोगो विस्तारः· पुनः· कुंतलयो
मालायाः करलोघमो दृश्यते· पुनः· कुचाभोगयोर्मकरिकारंभः· चित्ररचनाविशेषः· आभोगो विस्तारः· पुनः· कुंतलयो
रलीषु केशसमूहेषु· धूपः अगुरुचंदनादिभिरधिवासितः· दृश्यत इति सर्वत्र संबंधः· सायंमालादिप्रसाधनं·
मत्संगप्राप्त्यर्थमित्यर्थः· अत एव मुदः शिंताया त्वया हास्यवर्जितादिकमर्थमेवेत्यर्थः· शार्दूलविक्रीडितं वृत्तम्। ॥

र.स.टी.
५०

अथाधमं लक्षयति· भयकृपेत्यादिस्पष्टम्· यथेति तमुदाहरति· उदयतीति· काचित्सखीं वदति· हे सखि· यस्य हृदि लज्जापि नैव उ
दयति· इणगतावित्यस्य रूपं नोऽच्छति· करुणापि मद्विषयिका दयेत्यर्थः· कोपि भीतिलेशो न च· तस्य एवंभूतस्य करे पुनरपि· अ
तःपरमपि वकुलमुकुलानां कोशो अभागस्तद्वत्कोमलां मां न पातयेथा· न प्रापयेथा· पुष्पिताग्राछंदः॥ ॥प्रसंगादन्यदप्याह·
मानीति· अवमानितश्च नार्या विरज्यते सत्तु भवेज्ज्येष्ठ इत्यादिभरतवाक्यान्मानित्वम्· चतुरश्च वक्ष्यमाणलक्षणः· तयोः शठ एवां

भयकृपालज्जाशून्यकामक्रीडया मकृतकृत्याकृत्यविचारोऽधमः· यथा· उदयति हृदि यस्य नैव लज्जा न च करु
णा न च कोपि भीतिलेशः· वकुलमुकुलकोशकोमलां मां पुनरपि तस्य करे न पातयेथाः। ।मानी चतुरश्च शठ
एवांतर्भवति· मानी यथा· वाक्याकृतपराधयुतं तव वचो वज्रोपमेयं मनः श्रुत्वा वाचमिमां मयास्य विनयं व्याजा
द्बहिः प्रस्थिते· प्रातर्वीतविलोकने परिहृतालापे विहृताननेप्राणेशे निपतंति हंत कृपणा वामभ्रुवो दृष्टयः। ।

तद्भवः· मानी यथेति तमुदाहरति· वाक्याकृतेति· हंतेति खेदे· वामभ्रुवः वामे मनोहरे भ्रुवौ यस्यास्तस्याः कृपणादीना दृष्टयः· प्राणे
शे कांते निपतंति विश्राम्यंति· हे कांत तव वचो वचनं वाक्याकृतपराधयुतम्· वाचैव हि भर्विंयदाकूतं अभिप्रायस्तत्पराधयुतम्· त
त्सुधानं· मनो वज्रोपमेयं वज्रतुल्यं· अतो वज्रमनस्त्वत्तव वचनं सर्वं विषमित्यर्थः· इमां उक्तलक्षणां वाचं श्रुत्वा विनयमपास्य
त्यक्त्वा· प्रातः प्रभाते· व्याजात्केन चिन्मिषेणेत्यर्थः· बहिर्गृहादित्यर्थः· प्रस्थिते चलिते· पुनः वीतविलोकने वीतं त्यक्तं विलो
कनं येन तस्मिन्· पुनः· परिहृतस्त्यक्तः आलापो येन तस्मिन्· पुनः· विहृतं परिवर्जितं आननं येन तस्मिन्· आलापो भाषणं मि

यद्स्मरा:: शार्दूलविक्रीडितं वृत्तम्·

शिवः
५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचुरमुदाहरति· वागिति· वाग्भंग्यसमागमश्चचेष्टाभंग्यसमागमश्चतुरः· तत्र वाचाभंग्यः समागमोयस्यस वाग्भंग्य
समागमः· यथेतितमुदाहरति· तमोजपालइति· कश्चिन्नायिकांप्रतिवदति· हेशातोदरि· शातंकृशंमुदरंयस्याः सातत्सं
बोधनं· निशायाः कालेसमयेतमोजपालेतमसांजपालाः प्ररोहापस्मिन्त्रेवंभूतेहरिदंतपालेहरितांदिशामंतरालेमध्ये
विनिर्गतायास्तववनीनांनिकटेनदीनांतटे· कः सहायोघटेत· वक्तृतोऽहमेववचुरइत्यर्थः· इंद्रवज्रोपेंद्रवज्रामिश्रित

वाक्चेष्टाभंग्यसमागमश्चतुरः· वाग्भंग्यसमागमोयथा· तमोजपालेहरिदंतपालेकालेनिशायास्त
वनिर्गतायाः· तटेनदीनांनिकटेवनीनांघटेतशातोदरिकः सहायः॥ ॥ चेष्टाभंग्यसमागमोयथा·
कांतेकनकजंबीरंकरेकिमपिकुर्वति· आगारलिखितेभानौविन्दुमिन्दुमुखीददौ॥ ॥ ॥ ॥

पादत्वादुपजातिछन्दः॥ ॥चेष्टायाभंग्यसमागमोयस्यसः· यथेतितमुदाहरति· कांतइति· कांतेकनकजंबीरंसुवर्णजंबीरं
फलविशेषं· किमपिवैचित्र्यपूर्वकं· करेहस्तेकुर्वतिसति· इन्दुमुखीनायिकाआगारलिखितेभानौगृहभित्तिलिखितचित्रस्
ये विन्दुंतदर्शकरूपंददौदत्तवती· एतेनभान्वाच्छादकविन्दुदानेनसूर्यास्तसमयेतवमयासहक्रीडासंकेतउच्यते· अनुष्टुप् छं

र.म.टी.
५१

प्रसंगादन्यदप्याह॰ प्रोषितेति॰ पातीति पतिः स्वामी॰ उपपतिर्वैशिकश्च प्रत्येकं प्रोषितो भवति॰ क्रमेणोदाहरणानीति प्रो-
षितमुदाहरति॰ ऊरू रंभेति॰ कश्चिद्विरहिनायिकामनुरन्नाह॰ हंतेति खेदे॰ सा नायिका॰ वेधादि॰ उदलिम महद्दपेवर्त्तते इ-
त्यर्थः॰ तदा तापस्य विरहजनितस्य॰ शांतिः कथं न॰ शांतिउपायमेवाभिनयपूर्वकमाह॰ यस्याः नायिकायाः॰ ऊर्वादि-

प्रोषितः पतिरुपपतिर्वैशिकश्च भवति॰ क्रमेणोदाहरणानि॰ ऊरू रंभा दृ-
गपि कमलं शैवलं केशपाशो वक्त्रं चंद्रो लपितममृतं मध्यदेशो मृणालम्॰
नाभिः कूपो वलिरपि सरित्पल्लवः किं च पाणिर्यस्याः सा वेदुरस्ति न कथं हं-
त तापस्य शांतिः॥ ॥

षु सर्वत्र संबंधः॰ ऊरू रंभाकदली॰ दृगपि दृष्टिरपि कमलं॰ केशपाशः केशसमूहः॰ पाशः पक्षश्च हस्तश्च कलापार्थाः कचा-
त्पर इत्यमरः॰ वक्त्रं मुखं चंद्रः॰ लपितं अमृतं वचनं॰ मध्यदेशो मृणालं विशाम॰ नाभिः कूपः॰ वलिरपि त्रिवलिरपि सरित्॰ किं- शिव.
च॰ पाणिः पल्लवः॰ इत्थं शीतलमपि सामग्र्यां सत्यामपि मत्तापशांतिर्न भवतीति मद्भाग्यविपर्यय एवेत्यर्थः॰ मंदाक्रांताछंदः॥ ॥ ५१

...0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपपतिं प्रोषितमाह· यांत्याइति· सलिलकेलिकुतूहलाय· सरः सरोवरं यांत्या· वामदृशः सुन्दरनेत्र्याः आज्ञात्किं विदुद्विष्वे
त्मर्थः· उपेत्य समीपमागत्य· वर्त्मनि वर्त्तमाने मपि अंतः स्मितद्युतिभिः चमत्कृता येदृक्तरंगास्तैरंगीकृतं स्वीकृतं· कि
मपि संकेतवेष्टितं स्मरामि· वसंततिलकं छंदः॥ ॥वैशिकं प्रोषितपतिमाह· अध्वतेति· पुरसुदृशोवेश्यायाः स्मरवे

यांत्याः सरः सलिलकेलिकुतूहलाय आज्ञादुपेत्य मयि वर्त्मनि वर्त्तमाने· अंतः स्मितद्युतिचमत्कृतदृक्त
रंगैरंगीकृतं किमपि वामदृशः स्मरामि॥ ॥अध्वतपरिपतत्त्रिवोलवंधं प्रुषितनकारमवक्र
दृष्टिपातम्· प्रकटहसितमुन्नतास्यविंवं पुरसुदृशः स्मरवेष्टितं स्मरामि॥ ॥ ॥ ॥

ष्टितं स्मरामि· किंभूतं· अध्वतो नक्तः परिपततो निवोलस्य वंधो ग्रंथिर्यस्मिन् तत्· पुनः प्रुषितश्चोरितो नकारो यत्र
तत्· पुनः अवक्रोऽकुटिलो दृष्टिपातो यत्र तत्· पुनः प्रकटहसितं यत्र तत्· पुनः उन्नतमास्यविंवं मुखमंडलं यस्मिन्·
अध्वतादिषु सर्वत्र ध्वतत्वादिति भावः· पुष्पिताग्रा छंदः॥ ॥श्रीमकुलभर्त्तृयेनमोनमः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसंगादन्यदप्याह. अनभिज्ञइति. संकेतादिचेष्टितमभिसमंतान्नजानातीतिएवंभूतोनायकोनायकामः नायकवशाभास
ते. तद्गुणहरति. शल्यइति. काचिद्दूतीवदति. हे दूति. शल्येसम्यग्निखहेवहुविधावहुप्रकाराभंगिः. अंगरचनायोजिताकृते
त्यर्थः. पुनःनिर्जनंजनरहितंवनं. अथानंतरम्. पुष्पव्याजंउपेत्यप्राप्य. निर्गतवहिर्निःसृतम्. मयेतिशेषः. पुनःष्ट

अनभिज्ञोनायकोनायकामातएवयया. शल्येसम्यग्नियोजितावहुवि
धाभंगिर्वनंनिर्जनंपुष्पव्याजमुपेत्यनिर्गतमयस्फारीकृताष्टयः. तां
वूलाहरणछलेनविहितोमत्कौचवक्षोरुहावेतेनापिनवेत्ति दूतिकियता
यत्नेनसज्ञास्यति॥ ॥

ष्टयःस्फारीकृताःविकासिताः. पुनः तांवूलस्यआहरणछलेनग्रहणमिषेण. वक्षोरुहौस्तनौव्यक्तौविहितौकृतौ.
एतेनापिउक्तप्रकारेणनवेत्तिनजानाति. तर्हिकियतायत्नेनसनायकाभासोज्ञास्यतिमयाभिलषितमित्यर्थः. शिवः
शार्दूलविक्रीडितंवृत्तम्॥ ॥श्रीमन्मङ्गलमत्र्यमहागणाधिपतयेनमोनमः॥ ॥ ॥ ॥ ॥ ५२

प्रासंगिकमन्यदपि निरूपयति· नवेति· ते ते भेदा इति· उक्तादय इत्यर्थः· तस्या नायिकाया अवस्थाया भेद उक्तादित्तभे
देन भेदाः· विशेषाकालिकोवस्था इत्यपरः· तस्यैव नायकस्य स्वभावः प्रकृतिस्तद्भेदेन भेदाः इत्युभयोर्विशेषात्· के
के स्वभावा इत्यत आह· अनुकूलत्वमित्यादि· अन्यत्रेत्यादि स्त्रीकर्तृत्या इत्यंतं स्पष्टम्· तथावेति· असंप्रदायाप्राचीनसं

नवनायिकाया इव नायकस्य ते ते भेदाः संत्विति वाक्यम्· तस्या अवस्थाभेदेन भेदाः तस्यैव स्वभा
वभेदेन भेदा इति विशेषणात्· अनुकूलत्वं दक्षिणत्वं धृष्टत्वं शठत्वमित्येतावत एव नायकस्य स्वभावा
इति· अन्यत्र· अवस्थाभेदेन यदि नायकस्य भेदः स्यात्तदा कविप्रलंभखंडितादयो नायकाः स्वीक
र्तव्याः· तथा च संकेतमवस्थायां स्त्रीणाम नागमने वा संप्रदायात्· अन्यस्य भागमशंकाध
र्तत्वं वान्यसंभोगविकृततत्वं वा नायकानां प्रति तदुद्भावने रसाभासापत्तिरिति· ॥ ॥ ॥

प्रदायाभावादित्यर्थः· कुत एतदित्याह· अन्येत्यादि· अन्यस्याः अपरस्याः सभागमस्तस्य शंकावितर्कस्तेन धूर्तत्वं वा· अ
न्यस्याः संभोगविकृतत्वं वा नायकानां· ननु नायिकानामित्यर्थः· प्रस्तुतसंप्रदायमनादृश्येत्यर्थः· तत्तदुद्भावने तेषां नाय
कानां तासां उक्ताद्यवस्थानां उद्भावने उद्घाटने रसाभासापत्तिः· शृंगारहानिप्राप्तिरिति अनौचित्यादित्यर्थः· उक्तं हि· अ

त्तिविसाइत्ताइत्यसंभोगासमकालएवात्पर्यः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रासंगिकमन्यदप्याह·तेषामिति· तेषां नायकानां नर्मणा अनुकूलहासादिव्यापारेण सचिवं नियोजयति· स नर्मसचिवः हा
स्यसखेत्यर्थः· सचिव इति· षच समवाये धातोः रूणादिप्रत्यये साधुः· सः पीठमर्दादिभेदाच्चतुर्द्धा· चतुः प्रकार इत्यर्थः· कुपि
तेति· कुपिता चासौ स्त्री चेति· तां प्रसादयतीति प्रसादकः प्रसादयिता· पीठं चरणनिवेशस्थानं मर्द्दातीति सः· कोमलो तव
चरणौ कथमत्र दत्ताविल्यादिहास्येन स्पर्शनं भवतीत्यर्थः· यद्वा· पीठं शृंगारादिरसरूपं मर्द्दाति आलोडयतीति· यथेति

तेषां च नर्मसचिवः स च पीठमर्द विट चेटक विदूषक भेदाच्चतुर्द्धा· कुपितस्त्रीप्रसादकः पीठमर्दः· यथा·
कोपं कोपविधिः प्रपञ्चकरुणागर्भं वचो जायतां धीरषट्पदवदीर्घिकापरिमलेरामोदिनी मेदिनी· आस्तां
वास्यहपालुलोचनमिदं व्यावर्त्तयंती मुहुर्यस्मै कुप्यसि तस्य सुन्दरि तपो वृन्दानि वन्दामहे॥ ॥ ॥

तमुदाहरति· कोपमिति· हे मानिनि· अयं कोपविधिः कः· आत्मनः प्रतिकूलत्वात्· कुत्सितोऽयं परित्याज्येत्यर्थः· किंतु करुणा
दयागर्भं यस्य· तद्वचो वचनं प्रपञ्च· प्रियेप्रकटयेत्यर्थः· अत एव त्वद्वचोयः धीरषट्पदः भ्रमरः अस्त तत्प्रवाहस्तस्य दीर्घिका
तस्याः· परिमलैर्गंधविशेषैः· मेदिनी भूमिः आमोदिनी जायताम्· वा अथवा· हे सुन्दरि· आस्तां कोपविधिः· यतः स्पृह
यालुः स्पृहाशीलं· इदं लोचनं नेत्रं मुहुर्वारंवारं व्यावर्त्तयंती· रत्नाकृष्टमिव परावर्त्तयंती यस्मै कांताय कुप्यसि तस्य
तव कांतस्य· तपो वृन्दानि तपः समूहान् वन्दामहे· चिरं घृततपः समूहं विना तादृक्कोपप्रसादपात्रत्वालभ्यत्वादिति भावः·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरं दर्शयति · कामतंत्रेति · कामस्य तंत्रं सिद्धांतं तस्य कला भेदास्तत्र कोविदः · तंत्रं प्रधाने सिद्धांत इति विश्वः · यथेति तमुदाहरति · आयातेति · हे कृशोदरि · कुमुदेश्वरः श्वशुरः आयातः उदित इत्यर्थः · सर्वेश्वरः सर्वेषामीश्वरः प्रेरकः वा द्विजपते · विशेषेण शीतमंदसुगंधिरूपेण जयतीत्यर्थः · विपराभ्यां जेरित्यात्मनेपदम् · भैरवो भयानकः · विरहव्यथाजनकत्वात् · भृंगो भ्रमरः · स्फूर्जतीति झंकारशब्दं कुर्वन् भ्रमतीत्यर्थः · प्राणेश्वरः प्राणवल्लभो निकटं न भवति · ततः किमित्यत आह · एते कुमुदेश्वर

कामतंत्रकलाकोविदो विदः यथा· आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृंगः स्फूर्जति भैरवो न निकटं प्राणेश्वरो भवति · एते सिद्धरसाः प्रसूनविशिखो वै घोनवघोत्सवो मानव्याधिरसौ कृशोदरि कथं त्वं चेतसि स्थास्यति॥ ॥

दयः सिद्धरसाः सिद्धो निष्पन्नो रसः शृंगारो येभ्यस्ते · प्रसूनविशिखः पुष्पबाणः कामइत्यर्थः · अनवघोत्सवः अनघः अनिंद्यः उत्सवः तत्तद्रूपव्याधिनाशके वैद्यविकित्सारंभो यस्य सः · असौ दृश्यमानो मान एव व्याधिः · त्वच्चेतसि तव मनसि · कथं केन प्रकारेण स्थास्यति न स्थास्यतीत्यर्थः · अथवा रसग्रंथेषु कुमुदेश्वरसर्वेश्वरभैरवप्राणेश्वरसिद्धेषु व्याधिर्न तिष्ठतीत्यर्थः ·
शार्दूलविक्रीडितं वृत्तम्॥ ॥

वेदकंदर्पपति· संधानेति· संधाने संयोजने चतुरश्छेदः· यथेतितमुदाहरति· सावन्द्रेति· सा प्रसिद्धा चन्द्रवत्सुंदरमुखी नायिका·
सप्रसिद्धः सकलकलाभिज्ञो देवे त्वन्नंदगोपतनयश्च· देवादनिर्देशेनेत्यर्थः· निकुंजभवनं कुंजगृहं समुपाजगाम· अश्रांत
रेति· अस्मिन्नवसरे तयोर्मिलनसमय इत्यर्थः· सहचरीति सहचरः सखा· तरलोत्सर्ये· कठोरेतीत्रेसति· पनीयस्य जलस्य·
पानकपटेन सरः तडागं प्रतस्थे· प्रयिक्षिप्ते तस्मिन्नंतरायं ज्ञानं प्रस्थानं कृतवानित्यर्थः· वसंततिलकं छंदः॥ ॥विदू

संधानश्चतुरश्छेदो यथा· सा चंद्रसुंदरमुखी सवनं दसूनुर्देवान्निकुंजभवनं समुपाजगाम· अश्रांतरे स
हचरस्तरलोकठोरे पानीयपानकपटेन सरः प्रतस्थे॥ ॥अंगादिवैकृत्यैर्हास्यकारी विदूषकः· यथा·
आनीय नीरजमुखीं शयनोपकंठमुत्कंठितोस्मि कुचकंचुकमोचनाय· तत्रांतरे मुहुरकारि विदूषकेन प्रा
तस्तनस्तरलकुक्कुटकंठनादः॥ ॥

यकं दर्पपति· अंगादीनित्यस्य च्छ्रय· यथेतितमुदाहरति· आनीयेति· कश्चिन्नायको वयस्यं प्रतिवदति· नीरजमुखीं नायिकां शय
नोपकंठं शय्यासमीपं आनीय कुचकंचुकमोचनाय उत्कंठितोस्मि· अत्रांतरे विदूषकेन प्रातस्तनः प्रातर्भवस्तरलकुक्कु
टकंठनादो मुहुर्वारंवारं प्रकारि कृतः· तथा चेष्टितस्याद्धरात्रेपि प्रभातभ्रांत्या हास्यकारित्वात्· वसंततिलकं छंदः॥
॥ ॥श्रीमन्मङ्गलमूर्तये नमो नमः॥ ॥श्रीमद्रामचन्द्राय नमो नमः॥ ॥श्री भैरवाय नमः॥ ॥ ॥

एवंशृंगाररसंनिरूप्यसात्विकभावान्दर्शयति· स्वेदः स्तंभइति॥ ॥यथेति· सर्वानपिविस्तरभीयाएकेनैवपद्येनदर्शयति·
भेदोवाचीति· काचित्सात्विकभाववतीगोपीपृच्छति· हेसुन्दरि· सप्रसिद्धः कौटिकन्दर्पलावण्यः व्रजेन्द्रस्यनंदस्य· तनयः पुत्रः
कृष्णः त्वयाकिंआलोकितोदृष्टः· यतः वाचिवाक्यविषये भेदः स्वरभंगोगद्गदत्वमित्यर्थः· समुज्जृंभते प्रकाशतेति· मनोविनापदेषु
योऽसम· दृशोर्नेत्रयोर्जलमानन्दाश्रुकुचतटे स्वेदः· अतिकठिनमपिकुचतटंप्रस्वेदयुक्तमित्यर्थः· अधरेप्रकंपः· चुंबनला

स्वेदस्तंभोऽथरोमांचः स्वरभंगोऽथवेपथुः· वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकाः स्मृताः॥ ॥यथा· भेदोवाचि
दृशोर्जलंकुचतटे स्वेदः प्रकंपोऽधरे पांडुर्गंडतटीवपुः पुलकितंलीनंमनस्तिष्ठति· आलस्यंनयनश्रियोश्चर
णयोः स्तंभः समुज्जृंभतेतत्किंसुन्दरिसव्रजेन्द्रतनयः कृष्णस्त्वयालोकितः॥ ॥श्रीमद्रामायनम्॥

लसात्वेनाधैर्यवतोऽधरस्यकंपनमित्यर्थः· गंडतटीपांडुः तद्विरहतापात्कपोलस्थलेवैवर्ण्यमित्यर्थः· वपुर्गात्रंपुलकितंतत्स्मर
णानन्दादितिभावः· मनोलीनंनष्टचेष्टंतिष्ठति· प्रलयोनष्टचेष्टतेत्यमरः· नयनश्रियोर्नेत्रलक्ष्म्याआलस्यंतद्विलोकन
व्यतिरेकेणान्यस्यदर्शनायोग्यत्वात्· पुनः चरणयोः स्तंभः जडतासकलकलानिधेस्तादृशस्यावलोकनंविना एतादृशावस्था
उदयादितिभावः· अत्रानुमानालंकारः· शार्दूलविक्रीडितंवृत्तम्·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र· स· टी· अथ शृंगारं दर्शयति· रतीति· रतिः स्थायी भावोऽस्य स शृंगारः· तथा च भरतः· रतिर्हास्यश्चेत्यादि· स च शृंगारो द्विविधः· द्वे विधे
५५ प्रकारौ यस्य सः· संयोगविप्रलंभरूपेण· संयोगः संयुक्तयोः स्त्रीपुंसयोरालिंगनादिरूपः संयोगः· विप्रलंभः वियुक्तयोरभीष्टा
प्राप्तिरूपो वियोगः· तत्र संयोगो यथेति संयोगमुदाहरति· वियतीति· वियति अंतरिक्षे· जलदो मेघो विलोलति· लुल विमर्दे धा
तुः· विधुः चन्द्रः· स्खलति पतति· वेष्टते चलति· कपोतः पक्षी कूजयति शब्दायते· तारकाणां नक्षत्राणां ततिः समूहो वियतति·

रतिस्थायीभावः शृंगारः स च द्विविधः· संयोगो विप्रलंभश्च· संयोगो यथा· वि
यति विलोलति जलदः स्खलति विधुश्चलति कूजति कपोतः· निष्पतति तार
काततिरांदोलति वीचिरमरवाहिन्याः॥ ॥श्रीकृष्णाय नमो नमः॥

अमरवाहिन्या गंगाया· वीचिस्तरंगः· आंदोलति आंदोल इवाचरति· चुरादेरनित्यत्वाद् एषां तास्मिन् भावः· प्रकृते पर्ये जलदादीनामनुप
योगात्· जलदेन भ्रमज्जलप्लुतकेशपाशो नायिकायाः· विधुना मुखचन्द्रः· कपोतकूजनेन कंठध्वनिः· नक्षत्रनिपतनेन हारत्रुटिः
केशग्रथितपुष्पपातो वा· गंगावीच्याकृष्टाहारलतांदोलनं· उपरि वर्तमानत्वादमरवाहिनीति विशेषणम्· एतेन विपरीतरति शिवः
रूपः संभोगो ध्वन्यते· आर्याभेदो पगीतिश्छन्दः॥ ॥श्रीमन्मुकुलसुन्दर्यै महागणाधिपतये नमो नमः॥ ॥ ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रलंभोयपेतितमुदाहरति· प्रादुर्भूतइति· कापिसखीविरहिणींप्रियंवदति· तस्यपंतवपंथाः· सत्यथः तंद्रष्टुकामाः पंकेरुहजल
दृशः कमलपत्रनेत्रायाः नायिकायाः प्राणाः कंठदेशंप्रयांतित्वकर्षेणप्राप्नुवंति· अस्यछा· तवमुखविधुंमुखचंद्रंद्रष्टुंवक्षाः उरस्थल
उड्डीयगंतुंबिसिन्याः पद्मिन्याः पत्रवस्य छलेनकिंपक्षंसृजति· अन्यथावक्षसउड्डीनासंभवात् · बिसिनीपद्मिनीमुखोरस्तमरः· अत्रो

विप्रलंभोयथा· प्रादुर्भूतेनवजलधरेत्वत्पथंद्रष्टुकामाः प्राणाः पंकेरुहदलदृशः कंठदेशंप्रयांति· अस्यत्किंवात
वमुखविधुंद्रष्टुमुड्डीयगंतुंवक्षः पक्षंसृजतिबिसिनीपत्रवस्यछलेन·॥ ॥विप्रलंभेवाभिलाषचिंतास्मृतिगु
णकीर्तनोद्वेगप्रलापोन्मादव्याधिजडतानिधनानिदशावस्थाभवंति· तत्रसंगमेछाअभिलाषः· यथा· तस्यांमुक्तत्त्व
सरस्यांवेतोनयनंवनिष्यतितम्· वेतोगुरुनिमग्नंलघुनयनंसर्वतोभ्रमति·॥ ॥श्रीकृष्णायनमोनमः॥

त्प्रेक्षालंकारः· मंदाक्रांताछन्दः ।विप्रलंभेनाभिलाषादयोदशावस्थाभवंति· ताःस्वयमेवस्पष्टयति· तत्रेति· तत्रतासु· संगमस्यमि
लनस्यइछाअभिलाषः· यथेति· लक्षयति· तस्यामिति· कश्चित्स्वर्वानुरागीनायकोवदति· तस्यांप्रसिद्धायांरूपलावण्यादिपुना
यामित्यर्थः· मुक्तत्त्वदेवसरसीसरस्यांवेतोनयनंवनिष्यतितंमग्नंतत्रवेतोमानसंगुरुअतोविनिलीनंत्रुडितंनयनंतुलघुसर्व
तोभ्रमति· मद्येतत्तस्यामेवलग्नंनेत्रदर्शनलालसंतदुपवर्पेवभ्रमतीत्यर्थः· आर्याभेदउपगीतिः॥ ॥श्रीरामायनमः॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिंतामाह · दर्शनं च संतोषश्चतौ तयोः प्रकारस्य प्रतिक्रिया या जिज्ञासा ज्ञातुमिच्छा तस्याश्चिंतनं स्मरणं चिंता · यथेति तामुदाहरति · म
येति · मया तस्मिन्कुंजोपकंठे कुंजसमीपे अघ कलकंठानां कोकिलानां नादो विधेयः कर्त्तव्यः · यतः राधाकर्त्री · मधोर्वसंतस्य · विभ्रमं
भ्रांतिं आवहंती · नेत्रोत्पलतोरणानि नेत्रे इतस्ततश्चालितेव संतदर्शनार्थं ते एव तोरणानि वंदनमालाः कुर्वीत · विभ्रमो भ्रांतिहाव
योरिति मेदिनी · इंदुवज्रोपेंद्रवज्रयोरुपजातिः ॥ ॥अथ स्मृतिं दर्शयति · प्रियाश्रितेति · प्रियमिष्टं तदाश्रितयाऽ‍ड्हो धितो यः सं

दर्शनसंतोषयोः प्रकारजिज्ञासाचिंतनं चिंता · यथा · मया विधेयो भ्रमरघतस्मिन्कुंजोपकंठे कलकंठनादः · राधा मधो
र्विभ्रममावहंती कुर्वीत नेत्रोत्पलतोरणानि ॥ ॥प्रियाश्रितचेष्टयोद्बोधितसंस्कारजन्यं ज्ञानं स्मृतिः · यथा · रा
मो लक्ष्मणदीर्घदुःखचकितो नाविष्करोति क्रुधां श्वासं नोत्सतरं जहाति सलिलं धत्ते न वा वक्षसि · वातावर्त्तविव
र्त्तमानदहनक्रूरैरनंगाग्नेरैः क्षामः किंतु विदेहराजतनयां स्मरः स्मरन्वर्त्तते ॥ ॥श्रीमद्रामचंद्राय नमः ·

स्कारस्तज्जन्यं ज्ञानं स्मृतिः · यथेति तामुदाहरति · राम इति · लक्ष्मणस्य यद्दीर्घदुःखं शल्यघातपातरूपं तेन चकितो व्याकुलो रामो
यथा दुःखं न आविष्करोति · प्रकटयति · यतः श्वाससमुत्सतरमत्युत्सन्नं जहाति · वाश्रयवा · वक्षसि ज्ञाता वेकवचनम् · नेत्रयोः स
लिलं न धत्ते · नेत्रास्त्रुं न दधातीत्यर्थः · किंतु विदेहराजो जनकस्तस्य तनयां सीतां स्मरयो वारं वारं स्मरन्वर्त्तते तिष्ठतीत्यर्थः · किं स्म

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE-IKS

गुणकीर्त्तनं दर्शयति· विरहेति· विरहकालीनं विरहभवं कांताविषये यत्प्रशंसायाः प्रतिपादनं गुणकीर्त्तनं· संभोगेपि गु
णकीर्त्तनपरिहाराय विरहकालीनेति विशेषणम्· यथेति तामुदाहरति· स्पर्श इति· कश्चन विरही वदति· हे सखे· स्पर्शः स्प
र्शनव्यापारश्च तस्या नापि का यात्तनतरस्य स्पर्शः वीक्षणं दर्शनव्यापारश्च तस्या वक्त्रवीक्षणं समयः कालयापनं वे तस्याः
केलिकथालापसमर्थो भवतीति सर्वत्र योज्यम्· अनुष्टुप्भेदः॥ ॥उद्वेगं दर्शयति· कामक्लेशेति· कामक्लेशेन जनितं य

विरहकालीनकांताविषयं प्रशंसाप्रतिपादनं गुणकीर्त्तनम्· यथा· स्पर्शस्तनतरस्पर्शो वीक्षणं वक्त्र
वीक्षणम्· तस्याः केलिकथालापं समर्थः समयः सखे॥ ॥कामक्लेशजनितसकलविषयकेहेय
ताज्ञानमुद्वेगः· यथा· गरलद्रुमकंदमिन्दुबिंबं करुणं वारिजवारणोव संतः· रजनीस्मरभूपतेः कृपाणी
करणीयं किमतः परं विधातः॥ ॥

त्सकलविषयके हेयताज्ञानं स उद्वेगः· यथेति तमुदाहरति· कश्चिद्विरही वदति· इन्दुबिंबं चन्द्रमंडलं गरलद्रुमस्य विषवृक्षस्य· कं
दं मूलं· किंच· वसंतः कर्त्ता· करुणेव वारिजं कमलं तस्य वारणः गज इव· वसंते हि कमलानाम भावो हि भवतीति· किंच· र
जनी रात्रिः· स्मरभूपतेः कामस्य राज्ञः कृपाणी शस्त्री· कृपाणी कर्त्तरी स भाइस भरः· प्रस्तुतमाह· हे विधातः· परं किं करणीयं·
स्याभसहत्वादिति भावः· औपच्छंदसिकं छंदः॥ ॥

र·स·टी·
५१

प्रलापं दर्शयति · प्रियाश्रितेति · प्रियाश्रितोयः कात्स्न्तिकः कल्पनानियुक्तो व्यवहारः स प्रलापः · प्रलापोनर्थकं वचरत्वमरः ·
अंतःकरणस्य मनसो विक्षेपो व्यापारः तस्य विक्षेपस्य निदानं कारणमुत्कंठा औत्सुक्यं · यथेति तमुदाहरति · अर्द्धसंमिति ·
काचित्सखीं वदति · अयमेव क्षणे नेत्रं अर्द्धसंवीक्षणं यत्तत्किं करिष्यतीति मन आदिष्यपि योऽयम् · मन अर्द्धसंमिलनम् ·

प्रियाश्रितकात्स्न्तिकव्यवहारः प्रलापः · कल्पनायाः कारणमंतःकरणविक्षेपः · तस्य च निदा
नमुत्कंठा · यथा · अर्द्धसंवीक्षणं वक्षोरर्द्धसंमीलनं मनः · अर्द्धसंस्पर्शनिः पाणिरयमेकिं
करिष्यति ॥ ॥औत्सुक्यसंतापादिकारितमनोविपर्याससमुत्थप्रियाश्रितदृग्व्यापार उन्मा
दः · व्यापारः कायिको वाचिकश्च ·

नयनद्वयोः संमिलनं यत्र तत् · पाणिर्हस्तः अर्द्धसंस्पर्शनः · तद्द्वयोः संस्पर्शनं यत्र · तदतिरिक्तानां चक्षुरादीनां काकथा भवि
ष्यतीत्यर्थः · अनुष्टुप्छंदः ॥ ॥उन्मादं दर्शयति · औत्सुक्यौत्सुक्यं कलासहिष्णुत्वम् · संतापः संज्वरः · आदिना भ्रमादिः · ए
तैः कारितो यो मनोविपर्यासो व्याकुलता तस्मादुत्थो जातः · प्रियाश्रितो यो व्यापारः निरर्थकउद्यमः स उन्मादः · व्यापोर

ङ्कायिकोऽरिकः · कायिकोऽभ्यन्तरश्च

शिवः
५१

नं. ४३६९

रसमञ्जरी

श्री ५ को सरकार

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रप्रोषितभर्त्तृकांदर्शयति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

४ परिलेखः / ले० मल्लारिः /
नं० ४३७०

जन्मर्क्षतिथिवारधिस्न्यसहितंनंदैर्भजेत् शेषके ज्ञेयानि स्वदशा रवेस्तु घटिकाख्यास्त्रः ३ शशांके शराः ५॥
रामा ३ क्षेकुजसौम्ययोश्वसदला मंदस्यनंदा गुरोः सार्द्धाष्टौ नवदिक्तमोभृगुसुते सार्द्धत्रयं केतवे॥
सूर्ये वित्तविनाशनं परकृते धर्मार्थकामः शशी भौमे शस्त्रविघातरोगमरणं सोमात्मजः संपदम्॥
मंदे मंदमतिर्गुरौतु अभदं राहुस्तथा बंधनं भृगुकश्चैव सुखं ददाति विपुलं विघ्नं दशा केतवे॥ ॥

नित्यदशा.

सू.	चं.	मं.	बु.	शु.	गु.	श.	अ.	के.
३	५	३	८	६	८	६	१०	३
०	०	०	०	३०	३०	०	०	३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशायनमः॥ ॥तमीशं मूर्द्धि विभ्राणं तमीशं च गुरुं भजे॥तमीशं मूर्द्धि विभ्राणं तमीशोत्थं वरं खेचरान्॥१॥राज्ञा मुखास
१ नगते बलद्युयस्थः पृष्टो द्विजो नहि रवेर्न विधोर्यहः किम्॥हस्त्यश्वयानरथपत्तिखुरोत्थधूलिव्याप्तान्तरे खगगने ग्रहणे न दृ
हीनम्॥२॥इत्युक्ते गणकेन भूमिपतिना पृष्टः पुनः स्यात्कदा पर्वावश्व सविस्तरं ग्रहमुखं कस्यां दिशि स्यादिति॥श्रुत्वा राज्ञो गिरं
रामः४ हृद्योपरि कथं वा व्योमग्रहो मानसे कृत्वेत्थं नृपभीति विह्वलतनुर्जातस्तदा दैववित्॥३॥तस्माद्ब्रह्मिरवीन्दुपर्वगणकानन्दायत
स्वाद्भुतं पर्वांगं गणके धार्यमखिलं हस्ताच्छितीर्येगुणैः॥अभ्याकर्षणजस्ततश्च सकलं वाच्यं विनोदाय वै भूपानां वयथा स्फुट
टार्कसहितैर्वृत्तैः स्वरामग्रभैः॥४॥वेदस्थानगताः शिवाश्वककुभः षोडाखगाः स्युर्द्वि पाथाधोव्यद्विन वाम्बिम तत्कुशराद
ध्वीषक्ष्विवेदारदाः॥५॥स्वर्गीश्वं दृभूवोयमोयमद्वाराराममाश्वयः स्युस्तिर्नाडीषाक्षिशराधिकासु शशिनो विंबांगुलानि क्र
५॥सम्यंशां कथमा विवाणलवकानं दाश्विनः स्युस्तथा समंशां दृयमाविवाणलवकानागाश्विनोभानि च॥सम्यंशानि
विषट्लवानि विदलान्यंगाश्विनो भूंगभागोद्यावाणयमाविषष्ठलवका ते साईमितद्वाः कुभाः॥६॥द्वेधाः स्युश्च नखा च
त्रिधा त्वतिधृतिस्त्रिशत्याधृतिर्वेदगावालसष्टिस्तत्पदं तं नंदगजवेदाभाड्सिन ताश्वयः॥७॥नंदाभ्व्यभ कुदस्रवाण रसरा
मांकेन्दुवेदाः क्रमान्मानैक्याईमबांगुलानि घातिषे नौस्युत्थमानस्फुटम्॥७॥भूरामाब्धिरसाद्रिनंदशिवस्तर्यैरद्भुवं रामः १
राड्सिस्तागं दृभयमाद्दसाविमिताश्वाधोक्षिरामागजाः॥स्युच्चस्त्वष्टि कुबाणतत्वरवि गुणाम्यमाग्निवेदाड्सिसेवोणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुयमाभ्रकाणिवशाराः स्युर्देर्लवेषुर्यगो४॥७॥भूदलो त्रिविधो गुणाः शरगताः सूर्यस्थिताः सागराश्चाङ्कुंकास्तथराश्वभानिभगृतं भा८
न्यष्टवेदागुणा४॥ धृत्यभ्राणियमाश्विवेदशरराभांके भुवंशः स्थितिः स्वर्गाभानिसुराश्वपदक्रानिरथोशून्या व्यः पंचधा॥८॥षोडा८
भस्त्रिविधो ग्रमोलधरगाः स्वस्वर्गकाश्वामरावाणाब्धी दृशरा द्विवाणगुणपदषट्का॥ श्रमर्दानिहि॥ रवञ्जेनेकवयादयो क्रिय८
मुखस्थार्के हिविंवानिवेवाशाः सप्तगताभवाः शरगुतौ सन्नच्छंगुलानिक्रमात्॥१०॥षड्वेदषड्रामषड्श्विसिद्धवेदाग्निवेदाक्षि
कृतेषवश्च॥ वेदास्तशशाकारसम्भूयमश्वरसाश्वभून्यं क्रमशोभवंति॥११॥ ॥तिथेर्गते ध्येव्ययघटी भुविरं विधोश्च मानैक्यह८
लं स्थितं यद्॥ मग्वर्क दोर्भागभवः प्रथत्कसतेनोनितंतासिहितंभ८
वेद्रि॥१२॥ तद्बाधेन विवर्जितं रवच्छन्नांगुलाधः स्थिताः स्वस्वांघ्री८
पुपलेः स्थितिविरहिताच्छायग्रहांत्यास्थिती॥ षड्ग्राकांद्द॥१२ल्यक८
भेव्यगा वितरथाते स्तोधिके मर्दकं रवच्छन्नांगुलनोन्नतद्दपितेम
र्दग्रहांत्से भवेत्॥१३॥ तिथ्यंतोग्रहमध्यः स्यात्स्थित्यर्धाभ्यां सहीन

५४	५५	५६	५७	५८	५९	६०	६१	६२	६३	६४	६५	तिथयः
११ ४२	११ २९	११ १७	१० ५	१० ५४	१० ४४	१० ३२	१० २१	१० ११	१० २	९ ५२	९ ४३	विंधानि
२९ २०	२८ ४८	२८ १०	२७ ४८	२७ २०	२६ ५०	२६ ३०	२६ ०	२५ ३०	२५ १०	२४ ५०	२४ ३०	भूसा
२० २२	२० ९	१९ ४८	१९ ३१	१९ ७	१८ ४७	१८ २९	१८ १०	१७ ५२	१७ ३६	१७ १९	१७ ४	मानैक्या

स्पर्शमोक्षौ समर्दधीनाद्यो मिलनदर्शने॥१४॥ ॥इति श्रीमल्लारिकृते विधूग्रहः॥ ॥हृद्राः सार्द्रखगोनगाविवरणाः सा
पुक॥ स्पर्शमोक्षौ सम्मर्दधीनाद्यो मिलनदर्शने
र्दाग्नयः स्याद्दलभूपादोनितभूर्महीजलधयस्त्र्यंशान्विताः पर्वताः॥ अंशाद्याविरसांशकाः खविधवो हृद्रा अजाघेशहे

दर्शांतोल्पतनोर्नतिर्घटसुतामेसोन्नतान्वेषपाक॥१॥मा
द्ववपंत्रयंनाडीद्वयंपादेनभूमितम्॥लंबनंपरएवेदि

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	भागाः
१	३	४	६	७	९	११	१२	१४	१५	१७	१८	२०	२२	माराः
३८	८	४३	१७	५१	२५	०	३४	८	४३	१७	५१	२५	०	

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	क्रान्तिः
१	२	२	२	३	३	३	३	३	४	४	४	४	४	४	४	४	४	४	४	४	स्थितिः
३७	०	३७	४८	३	१८	३०	४३	५४	३	८	१२	२१	३७	३३	३६	४०	४०	४०	४०	४०	

३	३	२	०	लंब
३०	०	०	४५	नातिः

स्वं
र्गां
धा

१	२	३	४	५	६	७	८	९	तत्कालं
१	१	१	१	१	१	२	३	३	सद्यघ
०	२१	३३	४६	५१	५७	३	६	६	टिकाः

१	२	३	४	५	६	७	८	९	१०	११	१२	रवितात्पर्यः
१०	१०	१०	१०	१०	१०	१०	११	११	११	११	११	विक्रांतिः
४६	४६	२६	२४	३४	४४	५४	४	१४	१६	६	०	

मार्द्रतोभवेत्॥२॥पंवधा
त्रकर्कुभस्त्रिधाभवाः स्युर्दि
धार्द्दिनकरागुणवंशः॥शक

१	२	३	४	५	६	७	८	९	१०	११	१२	लग्नांतं
११	९	६	३	०	१	०	१	४	७	९	११	अमातं
०	३०	४५	३०	३०	०	४५	०	२०	३०	४५	१०	नतिः
द.	द.	द.	द.	द.	उ.	द.	द.	द.	द.	उ.	द.	

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	नतिः
१०	१०	१०	१०	१०	११	११	११	१२	१२	१३	१४	१५	१६	२०	२२	६०	हारः

पंवदशाघोऽशहाराः स्युर्नतात्कृतिरवधरान्ततितात्र॥३॥त्रोलारामभुवोथनंदशाशिनः तिथ्यागजाक्षोणिभूवेदंगाष्टनवाब्धितो
कमगतास्त्रिंशाद्विरभ्राब्धयः॥गोष्टाडीदुगुणेन्दुयुक्कमगतास्त्रिंशद्वषोडमतानागाक्षोणिजिनाइमेनतेघटीर्थकाः स्युरेकादि

राम:
२

भु॥४॥दर्शांतघ्नदलांतरं खलु नतं पूर्वापरे दृक्केघ्नार्द्धरधिकाधिके भवति योत्रांको नताधः स्थितः॥दृङ्गंतोत्थनतोन्नतिर्भवति यातघ्न
र भक्तस्त्वसौ तत्स्याल्लवनकं तिथ्यावृणधनं स्यान्मध्यकालः स्फुटः॥५॥दर्शांतोत्थनतोन्नतिर्भगुणजांशैः साधकः संस्कृतोनत्वाने नरवी
दुर्विवृतिजं खंडविहीनं कुरु॥छन्नं स्याद्दमुतः स्थितिः स्थितिविहीनाद्योत्र दर्शांतकत्ताभ्यां लंबनकेवतत्रविहिते स्पर्शांतकालौ
स्फुटौ॥६॥भूत्रिघ्नानवधाय भावधगुणा भान्यब्धिवाणा रसा भूपा नेत्रयमाश्वभानि खगुणा दन्ताद्धिधा निर्जराः॥स्याद्कस्थिति
रस्पवग्रसनजो यो व्यंगुलाद्यिप्सुतो वाणस्यांकलवेन मर्द्दकमतः स्याच्चेम नोन्मलनम्॥७॥मानैक्यखंडविक्षविंबकुभाविमर्द्दस्थि
त्यादिकं परविंयोगहतेः पलैः स्वैः॥षड्कृतेष्वसहितोनितमध्यिमौकं हृत्स्फुटे स्फुटमिह विशिरवेपिताद्दूत्॥८॥येस्स्यर्विं
बाकनितांतदृष्म्याक्श्लेषनिघ्ना रविलग्नभागाः॥खरामद्विभक्ताः क्रमशः फलेन ते हीनयुक्तेवपरक्षयद्धे॥९॥नवेन्दु१८क्षौश२
विश्लेषपतुर्य्या शोनिता युता॥नवेन्द्वाल्याधिकाक्षांशे युक्तवत्स्यान्नतिः स्फुटा॥१०॥दिग्वाणभू१५१०वियुक्शको दन्ता३२
पंचसंयुतः॥नगनन्दाश्वकेत्त्ववर्पातिवृत्तादिकोमतः॥११॥ ॥इतिमन्नारिकृतेरविग्रहः॥ ॥वंद्राकैग्रहणे रविस्त्रिभविद्युक्क्ष
युक्तस्तांतो येर्न्हे पूर्वेभ्युगलंघ्दिकत्रिकमितेतत्रैलदिक्यादिदम्॥आक्षस्याद्दलनंत ~ छ८५घटी बैकस्ततः साईकृदिक्षुस्या८
त्रिथिघ्नुच्यं परनतेऽपा गुत्तरं प्राङ्नते॥१॥संस्कृत्यात्र तपोपमत्वपदिशा वाणस्यादिक्तः क्रमात्सव्यासव्यमिहोदितं त्रि६

मु ३

२

गगनेमध्यग्रहोमध्यमः॥ छन्नोऽस्थेः परस्वर्के [illegible] विरामोमर्द्दजैः स्वग्रहान्त्योत्रोमेलनमेलनोदिनकृतस्त्र्यंशग्रहेऽतोन्यथा॥
द्वेधा द्वे त्रिविधा गुणास्त्रिकृगतावेदाः शरा [illegible] स्त्रिधापंचस्थास्तुरसाश्चतुर्षुतुरगा द्वेधा गजाश्छन्नजाः॥ वेधादिकृव
रणामहीयमभिता साद्ध्र्यध्वयः धारिमतामर्द्दस्याद्ध्र्घटीवाम्नियेगादितामर्द्दांघ्रयोनुक्रमात्॥३॥ इत्थं शोमकरादिम

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	नतघघः
७	१३	१९	२४	२८	३१	३४	३६	३८	३९	४०	४०	३९	३८	३७	३५	३३	३१	२८	२४	अंकाः

छ्हणनेसौम्ये शरेवायवी
सौम्यात छ्हणं यमाशवि

शीखयाम्याग्निमध्ये रवेः॥ कर्कादौ यमदिक्शरे थनितीयाम्यतरे चोन्नरे वाणेवातरंशंप्रुदिक्विवरणोमध्येऽ
विधुरन्यथा॥४॥ छन्नघ्नादिगुणेष्टकं ग्रहविरामांतर्घटीभाजितं रूपाद्यैतयुतं तथेष्टसमये ग्रासो रवे स्याद्ध्रुवं॥

१	२	३	४	५	६	७	८	९	१०	११	१२	अंकः
१ ३	१ ३७	१ ४८	२ ६	२ १६	२ २२	३ [illegible]	३ ३०	३ ३२	३ ३२	३ ३३	३ ३३	स्थितिः

इष्टग्रासगुणं निजास्थितिदलेनाप्तं स्वपादैकयुक्सादिष्टसमये गुला
हितं वं ग्रहे अस्फुटं॥ ॥इति मल्लारिकृते परिलेखः॥ ॥शुभं

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	ग्रा.अं.
२	२	३	३	३	४	४	४	५	५	५	६	६	६	६	६	७	७	७	७	८	८	छन्नां.

० ३०	१ ०	१ ३०	३ ०	घटिकाः
१ ०	२ ०	४ ३०	६ ०	मर्द्दग्रंथः

२

नं० ४३७२ (6) कुवलयानन्दः

ले० अप्पय्य दीक्षितः।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कु.नं.मू.
१

॥श्रीगणेशाय नमः॥ अमरीकवरीभारभ्रमरीमुखरीकृतं दूरीकरोतु दुरितं गौरीचरणपंकजं १
परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्राञ्चौ जायापती स्तुमः २ उद्घाट्य योग
कलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ३ अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रिय
ते तेषां लक्ष्यलक्षणसंग्रहः ४ येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः प्रायस्त एव तेषा
मितरेषां त्वभिनवा विरच्यते ५ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते की
र्तिः स्वर्गंगामवगाहते ६ यत्रोपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारुसादृश्यमुद्भू
ततयोल्लसति व्यंग्यमर्यादां विनास्फुटं प्रकाशते तत्रोपमालंकारः ६ हंसीवेत्युदाहरणम् राम
१

इयंचश्लेषोपमेत्युच्यते हंसीकीर्त्तिः स्वर्गंगावगाहनं इवशङ्खं स्वैस्तेतेषांउपमानोपमेय
वा॰२ साधारणधर्मोपमावाचकानांचतुर्णामप्युपादानात् यथावा गुणदोषौबुधोगृह्णन्निन्दु
क्ष्वेडाविवेश्वरः शिरसा श्लाघते पूर्वंपरं कंठेनियच्छति १ अत्रयद्यपिउपमानोपमे-
ययोर्नैकसाधारणोधर्मः उपमाने ईश्वरेचन्दुगरलयोः ग्रहणमुपादानंतयोर्मध्येपूर्वस्यच
न्द्रस्यशिरसाश्लाघनंवहनंउत्तरस्यगरलस्यकंठेनियमनंस्थापनंउपमेयेबुधेगुणदोषयो
र्ग्रहणंज्ञानंतयोर्मध्येपूर्वस्यगुणस्यशिरसाश्लाघनंशिरःकंपनंअभिनंदनं उत्तरस्य मे॰२
दोषस्यकंठेनियमनंकंठादुपरिवाचाऽनुच्चारणमितिभेदात् तथापिचन्दुगरलयोः गु
णदोषयोः बिंबप्रतिबिंबभावेनाभेदादुपादानज्ञानादीनांग्रहणन्निस्साधेकशब्दोपा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानेनाभेदाध्यवसायाच्चसाधारणधर्मेत्तन्निपूर्वस्माद्विशेषः वस्तुतो भिन्नयोरप्युपमा
नोपमेयधर्मयोः परस्परसादृश्यात् भिन्नयोः पृथगुपादाने विंबप्रतिविंबभावः इत्यालं
कारिकसमयः वर्ण्योपमानधर्माणामुपमावाचकस्य च एकद्वित्र्यनुपादाने भिन्नालु
प्तोपमाष्टधाः २ तडिद्गौरींदुतुल्यास्याकर्पूरंतीदृशो मम कांत्या स्मरवधूयंती दृष्टा त
न्वी रहो मया ३ यत्त्वयामेलनं तत्र लाभो मे यश्च तद्रतेः तदेतत्काकतालीयमवितर्कित
संभवं ४ उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां वा शब्दनिपादकशब्दाभावेन
धर्मलुप्ता २ लुप्तोपमेत्युच्यते सा चाष्टधा यथा वाचकलुप्ता धर्मवाचकलुप्ता वाचकोपमेयलु राम
प्ता उपमानलुप्ता वाचकोपमानलुप्ता धर्मोपमानलुप्ता धर्मोपमानवाचकलुप्ताचे २

ति तत्रोपमानलोपरहिताश्चत्वारोभेदाः तडिद्गौरीत्यादिश्लोकेनदर्शिताः तद्वंतोभेदा
उत्तरश्लोकेनदर्शिताः तडिद्गौरीत्यत्रवाचकलोपः तडिदिवगौरीत्यर्थेउपमानानिसामा
न्यवचनैरितिसमासविधायकशास्त्रकृतः इंदुतुल्यास्येत्यत्रधर्मलोपस्त्वैच्छिकः नशा
स्त्रकृतः कांत्याइंदुतुल्यास्येत्यपिवक्तुंशक्यत्वात् कर्पूरंतीत्यत्रधर्मवाचकलोपः क
र्पूरमिवआचरंतीत्यर्थेविहितस्यकर्पूरवदानंदात्मकाचारार्थकस्यक्विपः इवशब्देन
सहलोपात् अत्रधर्मलोप ऐच्छिकः नयनयोरानंदात्मकतया कर्पूरंतीतितदुपा
दानस्यापिसंभवात् कांत्यास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः अत्रकांत्येतिवि
शेषणसामर्थ्यात्स्वात्मानंकामवधूमिवाचरंतीत्यस्यार्थस्यगम्यमानतयास्वात्मन उ

कु॰या॰
३

पमेयस्यसहोपमावाचकेनानुपादानात् सत्वेच्छिकः स्वात्मानंस्मरवधूयतीसुपमे
योपादानस्यापिसंभवात् काकतालीयमित्यत्रकाकतालशब्दौवृत्तिविषयेकाकताल
समवेतक्रियावर्त्तिनौतेनकाकागमनमिवतालपतनमिवकाकतालमितिइवार्थेस
मासाद्वतद्विषयादिति ज्ञापकात्समासः उभयत्रोपमेयंत्वस्यक्वचिद्रूम नंतत्रैवरहसि
तन्व्याजवस्थानंचतेनस्वस्यतन्व्याश्चसमागमः काकतालसमागमसदृश इतिफलति
११ ततः काकतालमिवकाकतालीयमितिद्वितीयस्मिन्निवार्थेसमासाद्यतद्विष
यादितिसूत्रेणेवप्रतिकृतावित्यधिकारस्थेनछप्रत्ययः तथाच पतनदलिततालं
फलंयथाकाकेनोपभुक्तमेवंरहोदर्शनक्षुभितहृदया तन्वीस्वेनोपभुक्तेतितदर्थः। राम
३

२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE-IKS

ततश्च काकागमनतालपतनसमागमरूपस्य काकश्च तालफलोपभोगरूपस्य चोपमान
स्यानुपादानादत्रास्यार्थोपमायामुपमानलोपः। समासार्थोपमायां वा चकोपमानलोपः
अ सर्वोप्यपलोपश्च तस्य विधायकशास्त्राकृतः अवितर्कितसंभवमिति साधारणधर्मस्या
नुपादानेप्यस्यार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाच
कइतिस्त्र्य दृष्टव्य धातव्यं। एतेषामुदाहरणांतराणि विस्तरभयान्न लिख्यंते २२
उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इंदुरिंदुरिव श्रीमानिसादौ तदनन्वयः १ एकस्यै
व वस्तुन उपमानोपमेयत्ववर्णनमनन्वयः १ वर्ण्यमानमपि स्वस्य स्वेन साधर्म्येनान्वे

कु॰टी॰ ४ नीतिमुसनेः अनन्वयिनोप्यर्थस्याभिधानेंसदृशांतरव्यवछेदेनानुपमत्वद्योतनाच्च। इंदुरि
दुरिवश्रीमानितिसूक्ते श्रीमत्वेनचंद्रस्य नान्यः सदृशोस्तीतिसदृशांतरव्यवच्छेदोलभ्यते॥
ततश्चस्वेनापिसादृश्यासंभवादनुपमत्वेपर्यवसानं। यथावा॥ गगनंगगनाकारंसा
गरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिवः॥ पूर्वोदाहरणे श्रीमत्वस्य
स्फो धर्मस्योपादानमस्ति। इहतुगगनादिषुवैपुल्यादिधर्मस्यतन्नास्तीतिविशेषः॥ पर्याये
णद्वयोस्तयोरुपमेयोपमामता। धर्मोयद्वत्पुरुषे श्रीरर्थोधर्मइवत्वयि॥ द्वयोः पर्या राम
येणउपमानोपमेयत्वकसनंतन्नीयसदृशव्यवच्छेदार्थे। धर्मार्थयोर्हिकस्यचित्के ४

4

न्वित्सादृश्येवर्णितेनसाम्यनेनसादृश्यमर्थसिद्धमपिमुखतोवर्ण्यमानंतृ
तीयसादृश्यव्यवच्छेदफलमिति।यथावा॥खमिवजलंजलमिवखंहंसश्चंद्रइवहंसश्चं
द्रः।कुमुदाकारास्तारास्ताराकाराणिकुमुदानि॥पूर्वत्रपूर्णश्रीरितिधर्मउपात्तः।
इहनिर्मलत्वादिधर्मोनोपात्तइतिभेदः।उदाहरणद्वयेपिप्रकृतयोरेवउपमा
नोपमेयत्वकल्पनं।साधर्म्यार्थसमुद्रः शरदिगगनसलिलादिनैर्मल्यस्यवर्ण ९५
नीयत्वात्।प्रकृताप्रकृतयोरप्येषासंभवति।यथा॥गिरिरिवगजराजो
यंगजराजइवोच्चकैर्विभातिगिरिः।निर्झरइवमदधारामदधारेवास्यनिर्

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

कु.या. रः स्त्रवति॥ प्रतीपमुपमानस्योपमेयत्वकल्पनं। त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो
१ विधुः॥ प्रसिद्धोपमानोपमेयभावप्रातिलोम्यांप्रतीपं॥ यथावा॥ यत्त्वन्नेत्रसमान तू२
कान्ति सलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी। येपि
तद्गमनानुसारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन
न क्षम्यते॥ अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्। अलं गर्वेण ते वक्त्र
कान्त्या चन्द्रोपि तादृशः॥ अत्र सुष्ठुगुणतया वर्ण्यमानस्यान्यत्र तत्साम्य एम ५
मसहमानस्योपमेयं किं विद्यद्दर्पेणावतानस्य तिरस्कारो द्वितीयप्रतीपं। पू

सा० १ वैसादृश्यविच्छित्तिविशेषं त्ति। यथा वा॥ गर्वमसंभाव्यमिमं लोचनयुगलेन
१८२ किं वहसि भद्रे। संतीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि॥ वर्ण्योपमे
यत्नाभेन तथान्यस्याप्यनादरः। कः कौर्यदर्पस्तमस्योत्तनुसाः संति हि त्विषः
असुलभस्तु गुणतया क्वचिदप्युपमानभावमसहमानस्यावर्ण्यस्य वर्ण्येनुपमेय
परिकल्पितावता। तस्मात्तिरस्कारः पूर्वप्रतीपवैपरीत्येन तन्नीयप्रतीपं। यथा वा
अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः। ननु संति भवादृ
शानि भूयो भुवनेस्मिन्वचनानि दुर्जनानां। वर्ण्येनान्यस्योपमायाः अनिष्पत्ति

कु॰यो॰ वचश्चतत्। मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं॥ अवर्ण्येवर्ण्योपमितेर्निष्पत्ति
६ वचनं पूर्वैः। उत्कर्षशालि चतुर्थप्रतीपं। उदाहरणे मुग्धापवाद इत्युक्त्योपमितेर्नि
ष्पत्तिरुद्घाटिता। यथा वा॥ आकर्णयसरोजाक्षि वचनीयमिदं भुवि॥ शशां
कःस्तवद्वक्त्रेणोपमेरुपमीयते॥ प्रतीयमुपमानस्य मयोपमितिमन्यते। दृष्टं चे ९४
द्दुर्धरं तस्याः किं पद्मेन किमिंदुना॥ उपमेयस्यैवोपमानप्रयोजनधुर्वहत्वेनो
पमानस्यातिलोम्यात्मन्यप्रतीयं। यथा वा॥ तद्दोजस सजधशत्रः स्थिता विमो राम
त्स्येति वित्ते कुरुते यदा यदा॥ तनोति भानोः परिवेषकैतवात्तदा विधिः कुंड ६

८

ऌनोविधोरपि॥केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविषयत्वेनतदं
तर्भावंमन्यंतेअन्येतुपंचमंप्रतीपप्रकारमुपमानाक्षेपरूपत्वादाक्षेपालंका ग्र
रमाहुः॥विषयभेदस्ताद्रूप्यरंजनंविषयस्ययत्। रूपकंतत्त्रिधाधिक्यन्यून
त्वानुभयोक्तिभिः। अयंहिधूर्जटिःसाक्षाद्येनदग्धाःपुरःक्षणात्। अयमास्तेवि
भुर नाशंभुस्तार्तीयीकंविलोचनं॥शंभुर्विश्वमवत्यद्यस्वीकृत्यसमदृष्टितां।अस्या
मुखेंदुनालब्धेनेत्रानंदेकिमिंदुना।साध्वीयमपरालक्ष्मीरसुधासागरोदिता
अयंकलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते।विषय्युपमानभूतंपद्मादि।विष

कु॰ या॰ यत्रोपमेयं वर्णनीयं मुखादि विषयिणोऽभेदेन ताद्रूप्येण च विषयस्य रंजनं रू
पवत्करणं रूपकं। अन्यरूपेण रूपवतः करणात्। तत्र च क्वचित्प्रसिद्धविषय्यभेदप
र्यवसितं। क्वचिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रपर्यवसितं। तत्राद्यं रूप
कं तावद्द्विविधमभेदरूपकं ताद्रूप्यरूपकमिति। द्विविधमपि प्रत्येकं त्रिविधं। प्रसि
द्धविषय्याधिक्यवर्णनेन तन्न्यूनत्ववर्णनेनानुभयोक्त्या चैवं रूपकं षड्विधं। अ
यं हीत्यादि सार्धश्लोकेनाभेदरूपकाणि। अस्या मुखेन्दुनेत्यादि सार्धश्लोकेन ताद्रू ९८
प्यरूपकाणि चाधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि।

येनदग्धाइतिविशेषणेनवर्णनीयेराज्ञिप्रसिद्धशिवाभेदानुरंजनाच्छिवस्यपूर्वा
वस्थातोवर्णनीयराजभावावस्थायांन्यूनत्वाधिकत्वयोरवर्णनाद्वानुभयाभे
दरूपकमाद्यं। तृतीयलोचनप्रहाणोक्तोपूर्वावस्थातोन्यूनतादर्शनान्न्यूनाभे रू २
उभका ४ दरूपकंद्वितीयं। नूतनत्ववर्णनमपि भेददार्ढ्यापादकत्वाच्चमत्कारकारि। विष
मदृष्टित्वपरित्यागेनजगद्रक्षकत्वोक्त्याशिवस्यपूर्वावस्थातोवर्णनीयराजभावा
वस्थायामुत्कर्षविभावनादधिकाभेदरूपकंतृतीयं। एवमुत्तरोत्तरत्वाद्रूपरू
पकोदाहरणेष्वपिक्रमेणानुभयन्यूनाधिकभावावुन्नेयाः। अनेनैवक्रमेणोदाह

कु.या.
८
रणांतराणि। चंद्रज्योत्स्नाविशदपुलिनेसैकतेस्मिन्सरय्वा वादद्यूतंचिरतरमभूत्सिद्धयूनोः
कयोश्चित्। एकोवक्तिप्रथमनिहतंकैटभंकंसमन्यस्तत्त्वंसत्वंकथयभगवन्कोहतस्त
त्रपूर्वं॥ अत्रमत्त्वमितनेनकंसकैटभयोः हंतागरुडध्वजः तत्तादात्म्यंवर्णनीयस्यराज्ञः
प्रतिपाद्यतेप्रतिकंसकैटभयोः वधयोः पौर्वापर्यप्रश्नव्याजेनतत्तादात्म्यदृढीकरणा
त्। पूर्वावस्थातः उत्कर्षापकर्षयोरविभावनात्तादात्म्याभेदरूपकं। वेधाद्वेधाभ्रमं
चक्रेकांतासुकनकेषुच। तासुतेषुविरक्तोयः साक्षाद्भर्गोनराकृतिः। अत्रसाक्षादि रम
ह तिविशेषणेनविरक्तस्यप्रसिद्धशिवतादात्म्यमुपदिश्यनराकृतिरितिदिव्यमूर्तिवैकल्य ८

8

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिपादनानन्वुनाभेदरूपकं। त्वय्यागतेकिमितिवेपतएषसिंधुस्त्वंसेतुमंथकृदतः
किमसौविभेति। द्वीपांतरेपिनहितेस्यवशोवदोघृत्वाराजपुंगवनिषेवतएवलक्ष्मीः
अत्रत्वंसेतुमंथकृदित्तिसेतोरमृतमथनस्यचकर्त्तापुरुषोत्तमेनवर्णनीयस्यतादा
त्म्यमुक्तंतथापितद्दागमनसेतुबंधनायमंथनायवेतिसमुद्रेणभेतव्यंद्वीपांतरे न५ पां४
णामपित्वद्दूषणंवदत्वेनपूर्ववत् द्वीपांतरेजेतव्याभावात् अप्रमत्तलक्ष्मीकत्वेनमंथ
नप्रसक्त्यभावाच्चेतिपूर्वाविस्यात। उत्कर्षविभावनाद्धिकाभेदरूपकं॥ किंपद्मस्यरु
चिंनहंतिनयनानंदंविधत्तेनकिंद्रुषंवारूषकेतनस्यकुरुतेनालोकमात्रेणकिं। व

कु.या. ङ्कं दोतवसस्समयं यदपरः शीतांशुरुज्झितनेदर्पः स्यादस्मतेन चेदिह तदप्यस्येव विंबा
५ धरे। अत्रापरः शीतांशुरित्यनेन वक्ष्कंदो : प्रसिद्धचन्द्राद्भेदमाविष्कृत्य प्रसिद्धचन्द्रका
र्यकारित्वमात्रप्रतिपादनेन उत्कर्षापकर्षयोरदर्शनादनुभयताद्रूप्यरूपकं॥ अच
तुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः। अभाललोचनः शंभुर्भगवान्बादरायणः। अत्र
३.६४ ब्रह्मादिवपर इति विशेषणेनानिरूपितताद्रूप्यमात्रविवक्षा विभाविता। चतुर्वदनता
दिविकसंचोक्तमिति न्यूनताद्रूप्यरूपकं। इदं विशेषोक्त्युदाहरणमिति वामनमतं। एम
यदाह। एकगुणहानौ गुणसाम्यदार्ढ्यं विशेषोक्तिरिति॥ किमसुभिर्ग्लपितैर्जडम ९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्मेममपिनिमज्जतुभीमसुतामनः।ममखलुश्रुतिमाहतदर्थिकांनलमुखेंदुपराविबु
धःस्मरः।अत्रदमयंतीकृतचंद्रोपालंभेप्रसिद्धचंद्रोननिर्यापणकेलिकमनःप्रवेशःश्रु
तिनास्यविषयःकिंतुनलमुखचंद्रएवेतितेनास्याधिकप्रतिपादनादाधिकतादू
प्यरूपकेरूपकस्यसावयवत्वनिरवयवत्वादिभेदप्रपंचनंतुचित्रमीमांसायांद्रष्टव्यं॥
परिणामःक्रियार्थश्चेद्विषयीविषयात्मना।प्रसन्नेनदृगब्जेनवीक्षतेमदिरेक्षणा।य
त्रारोप्यमाणोविषयीकिंचित्कार्योपयोगित्वेननिबध्यमानःस्वतस्तस्यतदुपयोगित्वा
संभवात्प्रकृतार्थात्मतापत्तिमपेक्षतेतत्रपरिणामालंकारः।तत्रउदाहरणंप्रस

कु॰ टी॰ नेनेति। अत्र दृगञ्चलवीक्षणलोपयोगित्वेन निबध्नतेनतुदृशः मधुरत्वेसकृदिसमासेन उत्तरप
१० दार्थप्राधान्यात्॥ नचउपमितसमासाश्रयणेन दृगञ्चलमिवेतिपूर्वपदार्थप्राधान्यमस्तीतिवा
च्यम्। प्रसन्नेनेतिसामान्यधर्मप्रयोगान्नउपमितंव्याघ्रादिभिः सामान्याप्रयोगइतितदप्रयो
गएवउपमितसमासानुशासनात् अञ्चलवीक्षणलोपयोगित्वेनस्वात्मनासंभवतीत्यतःस्वस
म्बन्धदृगात्मतापरिणतस्येक्षणात् परिणामालंकारः। यथावा॥ नीत्वोभ्रं तेशमौलिस्रज
ना ममरधुनीमात्मसौधान्तनीयः स्वस्मैसौमित्रिमैत्रीमयमुपकृतवानातरंनाविकाय॥ सामया राम
द्यस्तनीभिः शबरयुवतिभिः कौतुकोद्भृतदृष्टिंकृष्टादर्शीयमानः शबरमचलमथोचित्रकू १०
10

सर्वसमासोदाहरणमिदन्तु समासोदाहरणमिति २४

टंयत्रस्य। अत्रारोप्यमाणः भ्रातरः सौमित्रिर्मैत्रीरूपतापत्त्या गुहोपकारलक्षणकार्योपयो
गीनस्त्वात्मना गुहस्य गुणाय प्रसादे कापेक्षिकत्वेन वेतनार्थित्वाभावादिति परिणामः॥
बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते। स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि
त॥ यत्र नानाविधधर्मयोगैकवस्तुनस्तत्तद्धर्मयोगरूपनिमित्तभेदादनेकेन ग्रहीत्राने
कधोल्लिख्यते तत्रोल्लेखः। अनेकधोल्लेखने रुच्यर्थित्वभयादिकं यथार्हं प्रयोजकं।
रुचिरभिरतिः अर्थित्वं लिप्सा भयं भीतिः। स्त्रीभिरित्याद्युदाहरणं। अत्रैक एव राजा सौ
न्दर्यवितरणपराक्रमशाली — तिस्त्रीभिरर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः का

कुवया·
२२ मकस्तरुकान्तरूपोदृष्टः। यथावा। गजत्रातेति वृत्ताभिः श्रीकान्तइतियोवर्तते। यथा
स्थितश्चबालाभिर्दृष्टःशौरिः सकौतुकंत्रत्र। यत्त्वयाभीतंभक्तंगजंत्रत्रात्रायतेस्म
सोयमादिपुरुषोत्तमइतिवृत्ताभिः संसारभीसातदृभयार्थिनी॥ कृष्णोयंमधुरापुरं भिं३
प्रविशन्दृष्टः यस्तथावंचलितेनप्रसिद्धयाक्रियोपिकर्मोपचारवैदग्ध्येनात्मस्व
ल्लभः सोयंदिव्ययुवतियुवतिसमूहेः सोत्कंठंदृष्टः बालाभिरुक्तबालसंगतरूपवे 11
शालंकारदर्शनमात्रलालसाभिर्यथास्थितवेशादियुक्तोदृष्टइतिवक्तृभेदा तभः
त्वः। पूर्वकामत्वाद्यारोपरूपरूपकसंकीर्णः। अयंशुद्धइतिभेदः। एकेनवक्तृधो ११

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल्लेखेप्यसौ विषयभेदतः। गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने। गृहीतभेदाभा
वेपि विषयभेदा द्द्वैधोल्लेखनादसावुल्लेखः। उदाहरणं श्लेषसंकीर्णे वाचोवि
षये महान् पटुरिति वत् बृहस्पतिरित्याद्यर्थांतरस्यापि क्रोडीकरणात्। भ्रुवो
यथा। अकुंठे कुचयोः कृशा विलग्ने विपुलं चक्षुषि विस्तृतं नितंबे। अधरेरुण
माविरस्ति चित्ते करुणाशालिकपालिभागधेयं। सा स्मृतिभ्रांतिसंदेहैस्तदंकाल
ङ्कृतित्रयी। पंकजं पश्यतः कांतामुखं मे गाहते मनः। अयं प्रमत्तमधुपस्त्वन्मुखं वे
त्ति पंकजं। पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः। स्मृतिभ्रांतिसंदेहैः सादृश्या

कु॰व्या॰
१२

न्निबध्यमानेः स्मृतिमान्भ्रांतिमान्ससंदेह इति स्मृत्यादिपदो किं तमलंकारत्रयं
भवति तच्चक्रमेणोदाहृतं। यथा वा। दिव्यानामपि कृतविस्मयां पुरस्तादंभस्तः स्फुर
रविंदचारुहस्तां। उद्वीक्ष्य श्रियमिव कांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्य शौ
रिः॥ पूर्वत्र स्मृतिमडदाहरणे सदृशास्यैव स्मृतिः। अत्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्
संबंधिनो जलनिधिमंथनस्यापि स्मृतिरिति भेदः। पलाशकुसुमभ्रांत्या शुकतुंडे पतत्
स्यलिः। सोपि जंबूफलभ्रांत्या तमलिं धर्तुमिच्छति। अत्रान्योन्यविषयभ्रांतिनिबंध
नः पूर्वस्माद्विशेषः। जीवनग्रहणे नम्राः गृहीत्वा पुनरुस्थिताः। किं कनिष्ठाः किमु

12
एम
१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्मेष्ठाः घटीयंत्रसदुर्जनाः। पूर्वोदाहृतसंदेहः प्रसिद्धकोटिकः अयंत्वप्रसिद्धकोटि
प२ कइतिभेदः। शुद्धापह्नुतिरन्यस्यारोपार्थोधर्मनिह्नवः। नायंसुधांशुः किंतर्हि व्यो
मगंगासरोरुहं। वर्ण्यनीयेवस्तुनितत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः
कविमतिविकासोल्लसितधर्मांतरस्यापिनिह्नवः। शुद्धापह्नुतिर्यथा। चंद्रेघुनेदी
फ पुंडरीकत्वारोपफलकस्तदीयधर्मस्यचंद्रत्वस्यापह्नवः। यथावा। अंकंकेपिशशं
कि रेजलनिधेः पंकंपरेमेनिरे सारंगंकतिचिच्चसंजगदिरे भूच्छायमैच्छन्परे। इंदौ
यद्दलितेंद्रनीलशकलश्यामंदरीदृश्यते तत्सांद्रंनिशिपीतमंधतमसंकुक्षिस्थ

कु.या. मात्लोकयंति। अत्रोत्प्रेक्षाधर्मालाभ—पह्नवः। परपक्षत्वोपन्यासादर्थसिद्धः। सएवयु
१२ क्तिपूर्वमवेदुच्यते हेत्वपह्नुतिः। नेंदुस्तीक्ष्णोनलनिशार्कः सिंहोरोवोपमुत्थितः। अत्रचं
द्रएवतीव्रत्वेनेशित्वयुक्तिश्चांचंद्रत्वस्यतापह्नवोवडवानलत्वारोपार्थः। य
थावा। मथनभूमिधरमू—लशिलासहस्रसंघट्टनव्रणकिणः स्फुरतींदुमध्ये। छा
यामृगः शशकइत्यतिपामरोक्तिस्तेषांकथंचिदपितत्रहिनप्रसक्तिः। अत्रचंद्रम
ध्येमंथनकालिकमंदरशिलासंघट्टनव्रणकिणस्यैवछायादीनांसंभवोनास्ती १८
तिछायाद्यपह्नवः पामरवचनत्वोपन्यासेनाविष्कृतः। अन्यत्रतस्यारोपार्थःप १२

र्यस्तापह्नुतिस्तु सः। नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं। यत्र क्वचिद्वस्तुनि तदी
यधर्मनिह्नवः अन्यत्र वर्णनीयवस्तुनि तत्सधर्मस्यारोपार्थः सा पर्यस्तापह्नुतिर्य
था। चंद्रे चंद्रत्वनिषेधो वर्णनीयवस्तुनि प्रेयसीमुखे तदारोपार्थः। यथा वा। हा
पं ४ लाहलो नैव विषं विषं रमा जनाः व्यत्ययमत्र मन्यते। निपीय जागर्ति सुखेन तं शि
वः स्मरन्निमां मुह्यति निद्रया हरिः। पूर्वोदाहरणे हेतूक्तिर्नास्ति अत्र तु सास्तीति भेदः
न तत्र च पूर्वापह्नुतिवदत्रापि द्वैविध्यमिति द्रष्टव्यं। भ्रांतापह्नुतिरन्यस्याशंकायां भ्रांति
वारणे। तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः। अत्र तापं करोतीति स्मरवृत्तांतेक

कु०व्या० थितेतस्यज्वरसाधारण्यात्तन्न जुबुधाससख्याज्वरः किमितिपृष्टेनसखिस्मरइतित
१८ त्वोक्त्या भ्रांतिवारणंकृतं। यथावा। नागरिकसमधिकोन्नतिरिहमहिषः कोयमुभयतः
पुच्छः। नहिनहि करिकलभोयंशुंडादंडोयमस्यनतुपुच्छः। इदंसंभवत्भ्रांतिपूर्विकायां
भ्रांतापन्हुतावुदाहरणं॥ कल्पितभ्रांतिपूर्वा यथा। जटानेयंवेणीकृतकचकलापोनग
रलं गलेकस्तूरीयंशिरसिशशिरेखानकुसुमे। इयंभूतिर्नांगेप्रियविरहजन्माधवलिमापु
रारातिभ्रांत्याकुसुमशर किंमांप्रहरसि। अत्रकल्पितभ्रांतिर्जटानेयमित्यादिनिषे राम
धमात्रोन्नेया। पूर्वेषत्वस्याभावात्। द्वैटिलत्वततत्तारूप्यानोपमेत्युपमाभेदंमेने। यदा १४
19

ह।नपद्मंमुखमेवेदंनभृंगौचक्षुषीइमे।इतिविस्पष्टसादृश्यात्तत्वाख्यानोपमाम
तेति।छेकापह्नुतिरन्यस्यशंकातस्थ्येस्तेनिह्नवे।प्रजल्पन्मत्पदेलग्नःकांतःकिंनहिनू
पुरःकस्यचित्कंचित्प्रतिरहस्योक्तावन्येनश्रुतायांउक्तेस्तात्पर्यांतरवर्णनेनतथ्यनि
ह्नवेछेकापह्नुतिः।यथानायिकयानर्मसखींप्रतिप्रजल्पन्मत्पदेलग्नइतिस्वनायक
वृत्तांतेनिवेद्यमानेतदाकर्ण्यकांतःकिमितिशंकिनवतिमन्यांप्रतिनहिनूपुरइति
निह्नवः।यथावा।सीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचं।नागरिकःकिंमि
लितोनहिनहिसखिहैमनःपवनः।इदमर्थयोजनयातथ्यनिह्नवेउदाहरणंप्राह्

कु॰या॰ योजनया यथा। पश्येत्तन्नयने स्मरामि सततं भावो भवत्कुंतले नीले मुह्यति किं करोमि म
९५ हिते : क्रीतोस्मि ते विभ्रमैः इत्युत्सवप्रवचो निशम्य सरुषा निर्भर्त्सितो राधया कृष्णस्तत्सरमेव हर
तद्व्यपदिशन्क्रीडाविरः पातु वः। सर्वमिदं विषयांतरयोजने उदाहरणं। विषये के
प्यवस्थाभेदेन योजने यथा। वदंती जारवृत्तांतं पत्यौ धूर्ता सखी धिया। पतिं बुद्ध्वा सखि
ततः प्रबुद्धास्मीत्यपूरयत्। कैतवापह्नुतिर्व्यक्ते व्याजोक्त्यैर्निह्नुते पदे। निर्यांतिस्म 15
रनाराचाः कांतादृक्पातकैतवात्। अत्रासत्त्वाभिधायिना कैतवपदेन नेमे कांता राम
दृक्पाताः किंतु स्मरनाराचा इत्यपह्नवः प्रतीयते। यथा वा गारिके सुवारिक यथ विपिनो ९५

दूरेषु मध्याह्नजृंभितमहातपतापतप्ताः। स्कंधांतरोत्थितदवाग्निशिखाञ्चलेन जिह्वां
प्रसार्य तरवो जलमर्थयंते॥ संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना। उक्तानुक्तास्पद
याद्यासिद्धासिद्धास्पदे परे· धूमस्तोमं तमः शंके कोकीविरहशुष्मिणां· लिंपतीव तमों
गानि वर्षतीवांजनं नभः। रक्तौ तवांघ्रियुगलं भुवि विक्षेपणात् ध्रुवम्· त्वन्मुखाभेच्छ
य यानूनं पद्मैर्वैरायते शशी· मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः। प्रायोऽब्धित्वत्सद
नैक्यप्राप्त्यै तोयेन तपस्यति· अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमु
त्प्रेक्षा· सा वस्तुहेतुफलात्मगोचरत्वेन त्रिविधा· अत्र वस्तुनः कस्यचिद्धर्मांतरतादा

कु॰या॰
१६

त्प्रसंभावनाप्रथमास्वरूपोत्प्रेक्षेत्युच्यते॰ अहेतोर्हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा हे
तूत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते॰ आद्या स्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया चेति द्विवि
धा॰ परे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषया चेति प्रत्येकं द्विविधे॰ एवं षण्णामुत्प्रेक्षा
णां धूमस्तोमं स्यादिनाक्रमेणोदाहरणानि॰ रजनीमुखसंबन्धिविस्तरस्य तमसो नेत्रदृ
ष्टिप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यः प्रियविघटितसर्वदे
शप्रस्थितकोकांगनाहृदुपगतप्रज्वलितप्रियविरहानलधूमस्तोमतादात्म्यसंभावनास्व
रूपोत्प्रेक्षा॰ तमसो विषयस्योपादानादुक्तविषया॰ तमोव्याप्यनस्य नभःप्रभृतिभूप

राम
१६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यंतं सकलवस्तुसाङ्गमलिनीकरणेन निमित्तेन तमः कर्त्तृकलेपनं तादात्म्योत्प्रेक्षा।
नभः कर्त्तृकांजनवर्षणं तादात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा॰ उभयत्रापि वि
षयभूतस्य तमो व्यापनस्यानुपादानात् अनुक्तविषया॰ नचात्र तमसो व्यापनेन नि
मित्तेन लेपनकर्त्तृतादात्म्योत्प्रेक्षा नभसो भूपर्यंतगाढनीलिमव्याप्तत्वेन निमित्तेनां
जनवर्षणकर्त्तृतादात्म्योत्प्रेक्षा च तदुत्प्रेक्षाद्वयमुक्तविषयमेवास्तु॰ मैवम्॰ लिंप
ति वर्षतीत्याख्यातयोः कर्त्तृवाचकत्वेपि भावप्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रि
याया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्त्तुरुत्प्रेक्षणीयतया॰ न्यत्राच्च या

त्र

कु॰पा॰ संभवात्· अत एव हेतोः तस्योपमायामुपमानतया· नयोर्दृष्टिना निराकृतः। वर्ण्योपमेयुप
१० मानेत्याद्यनुभूतौ सोक्तियापदे· स्वक्रियासाधनमंशेनाप्युपमन्यत्रापेक्षितुमिति· के
चित्तु· नभोनभसोर्विषययोस्तत्कर्त्तृकलेपनवर्षणरूपधर्मात्मके श्लेत्याहुः तन्मते
स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा चेत्येवं द्वैविध्यं दृष्टव्यं· चरणयोः स्वतः सि वं४
द्धेरक्तिमनि वस्तुतो विशेषणं न हेतुरिति· अहेतोस्तस्य हेतुत्वेन संभावना हेतूत्प्रे
क्षा विशेषणस्य विषयस्यासत्त्वात्सिद्धविषया· चंद्रपद्मविरोधस्वाभाविके· राम
नासिकावदनकांतिप्रश्ना न हेतुरिति तत्र तद्धेतुत्वसंभावना हेतूत्प्रेक्षा वस्तु १०

नस्यदिच्छायाश्चभावात्असिद्धविषया ॥ मध्यः स्वयमेव कुचौ धरति न तु कनकदाम
बंधत्वेनाध्यवसितायावलित्रयशालिन्या यावलात् इति मध्यकर्तृक कुचधृतेस्तन्
त्वेनोत्प्रेक्षासिद्धविषयाफलोत्प्रेक्षा ॥ जलं स्वजले निजावस्थितेरुरवासतपस्त्वेना
ध्यवसितायाः कामिन्याचरणसायुज्यप्राप्तिर्न फलमिति तस्य गगनकुसुमोपमा
नाया स्तपःफलत्वेनोत्प्रेक्षणमसिद्धविषयाफलोत्प्रेक्षा ॥ अनेनैव क्रमेणोदाहर
णांतराणि ॥ वालेंदुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि सद्यो
वसंतेन समागतानां नखक्षतानीव वनस्थलीनां ॥ अत्र पलाशमुकुलानां वक्रत

लोहित्यसंबंधेन निमित्तेन वसंतनायकसमागमवनस्थलीसंबंधीसंघकृतनखक्षतलता
दात्म्यसंभावनोक्तविषयास्वरूपोत्प्रेक्षा। पूर्वोदाहरणे निमित्तभूतधर्मसंबंधोगम्यः इ
ह तूपात्त इति भेदः। न चिवशाद्वसंसादृश्येपरत्वेन प्रसिद्धत्वादुपमैवास्तु। लिंपतीव
मुदाहरणे लेपनकर्तुरुपमानत्वादुत्प्रेक्षोपसर्जनत्वादिह नखकृतानामन्यो
पसर्जनत्वस्योपमाबाधकस्यात्राभावात्। उच्यते। उपमायाम्यच्चकविरवस्य
तैरपि नखकृतैः सहवकुलाकासत्वस्य वसंतनायकसमागमवनस्थलीसंबंधि
त्वस्य विशेषणस्यानपेक्षितत्वात्। इह तदुपादानं पलाशमुकुलानां नखक्षतलता

दात्म्यसंभावनायामिव शशांकमेव स्थापयतीति तथात्वे एव तद्विशेषणसाफल्यात्
अस्ति च संभावनायामपीव शशांकः दूरे तिष्ठन्नेव दन्त इव भातीति पिनष्टीव तरंगौघैः
समुद्रः फेनचंदनं तदादाय करैरिंदुर्लिंपतीव दिगंगनाः ॥ अत्र तरंगौघैः फेनचंदन
स्य प्रेरणपेषणत्वं पोत्प्रेक्ष्यते समुद्रोत्थितस्य चंद्रस्य प्रथमं समुद्रप्रसृतानां करा
णां दिक्षु प्रापणं च समुद्रोपात्तफेनचंदनकृतलेपत्वेनोत्प्रेक्ष्यते उभयत्र क्रमेण
समुद्रजाततागत फेनचंदनपुंजीभवनं दिगंगधवलीकरणं च निमित्तमिति फेनचंद
नप्रेरणादिकरणस्यायनयोर्विषययोरनुपादानादनुक्तविषयस्वरूपोत्प्रेक्षेयेयं

कुं०
२१

नृपात्तयोः समुद्रचंद्रयोरेवतत्कर्तृकपोषणलिप्तत्वरूपधर्मोस्तीतिमतंतेषांमतेषु
वैदाहरणेधर्मिणिधर्मांतरतादात्म्यात्प्रेक्षा । इहतुधर्मिणिधर्मसंसर्गोस्तीतिमे
दः । वृगंतव्यः । रात्रौरवेर्दिवाचंद्रस्याभावादिवसमनु । भूमौभ्रतापमशसीस्वच्छवान्स
तन्नोदिते । रात्रौरवेर्दिवाचंद्रस्याभावः सन्नपिपतितापयशः सर्गेनहेतुरितितस्यतद्धे
तुत्वसंभावनासिद्धविषयाहेतूत्प्रेक्षा । यथा । विवस्वता । नापिपतेवमिश्राः सृणो
सहस्रेणसमंजनानां । गावोपिनैतापरनामधेयास्तेनेदमांध्यंखलुनांधकारे । अत्र
विवस्वतानंतस्वकिरणैः सहजनलोचनानपनमसनेद्द्व रात्रावांध्यंप्रतिहेतुत्वेनो

स४

१७
एम
१९

त्प्रेक्ष्यत इत्यसिद्धविषया हेतूत्प्रेक्षा। पुरं विधुर्वर्ये पितुंपयोधेः शंकेयमेणांकमणिः कि
पंति· पयांसि दृग्भिः प्रियविप्रयोगे सशोककोकांगनपनैः किपंति· अत्र चंद्रेणांकितं
समुद्रस्य बृंहणं सदेवनदातेनकृतत्वं चंद्रकांतमवं वणत्सकोकांगनाबाष्पस्रवणस
चफलत्वेनोत्प्रेक्ष्यत इति· सिद्धविषया फलोत्प्रेक्षा· रथस्थितानां परिवर्त्तनाय पुराण
नानामिव वाहनानाम्· उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्यां· अ
त्रोत्तरायणस्याश्वपरिवर्त्तनमसद्देव फलत्वेनोत्प्रेक्ष्यत इत्यसिद्धविषया फलोत्प्रे
क्षा· एताएवोत्प्रेक्षा मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते

कु॰
२०

शब्दैरिवशब्दैरपितादृशाः।इत्युत्प्रेक्षायांव्यंजकत्वेनभणितानांशब्दानांअप्रयोगमात्रे
क्षायथा॰त्वत्कीर्तिर्भ्रमणश्रांताविवेशस्वर्गनिम्नगां॰रूपकातिशयोक्तिःस्यान्नि
गीर्याध्यवसानतः।पश्यनीलोत्पलद्वंद्वान्निःसरंतिशिताःशराः।विषयस्यस्वशब्दे
नोल्लेखनंविनापिविषयिवाचकेनैवशब्देनयद्ग्रहणंविषयनिगिरणंतत्पूर्वकंविष
यस्यविषयिरूपतयाऽध्यवसानमाह।यन्निश्चयः॥तस्मिन्सतिरूपकातिशयोक्ति
र्यथा॰नीलोत्पलशब्दवाच्यांलोचनयोःकटाक्षाणांचनिगिरणपूर्वकंतद्रूपता
ऽध्यवसानं॰यथावा॰वापीकापिस्फुरतिगगनेतत्परंसूक्ष्मपद्यासोपानालीमधि

राम
२०
20

गतवतीकांचनीमेद्नीली· अभ्रमेशैलौसुह्रत्तिसुगमोचंद्रनछनदेशोतत्रस्था
सुलभममृतंसन्निधानात्सुधाशो:। अत्रवाप्यादिशद्वैर्नाभिप्रस्तयोनिमीलि:
अत्रातिशयोक्तौरूपकविशेषणांरूपकेदर्शितानांविधानामिहापिसंभवोस्ती
सतिदृशेनप्रदर्शनोर्थतेचात्राप्यभेदातिशयोक्ति:स्वाउप्यातिशयोक्तिरिति
द्वैविध्यंतत्राप्याधिक्यन्यूनतादिविभागश्चेतिसर्वमनुसंधेयं॰यथावा॰समाव
द्वयासेरूपवनचकोरैरनुसृत:क्रूरनूज्योत्स्नामछालैवलिफलपाकपलापिनी मप२
·उपप्राकाराग्यंप्रहिराउनयनेतर्कयमना।गनाकाशेकोयंगलितहरिण:शीत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कु० किरणः॥ अत्रकोयंगलितहरिणइत्युत्प्रेक्षाप्रसिद्धचंद्रांकेंदुः ततउत्कर्षस्यागर्भितः।
२१ एवमन्यत्राप्यूहनीयं॥ पद्यस्ययुक्तिगर्भत्वंसैवसायन्हवामनात्वस्क्तिषुसुधा
राजन्त्यांताः परंपोतिनांविधो॥ अत्रतत्स्वूक्तिमाधुर्यमेवामृतमित्युक्तिप्रायोक्तिः
चंद्रमंडलस्यामृतंनभवतिइत्ययनस्तुतिगर्भाः॥ यथा वा॥ मुक्ताविद्रुममंतराम
धुरस्तपुष्पंपराधूर्वहंप्रालेयद्युतिमंडलेरवलुतत्पोरेकासिकानालेवं॥ तन्नोदन
तिरारवमूर्द्धिनपुनःपूर्वाचलोभ्यंतरेतानीमानिविकल्पयंतितइमेपेयानमा रम
दृश्यते॥ अत्रोधररसएवमधुरसः इत्यतिशयोक्तिःपुष्परसोनमधुरसइत्यय २१

21

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्नुतिगर्भा ॥ अलंकारसर्वस्वकृता स्वरूपोत्प्रेक्षायां सापह्नवत्वमुक्तं ॥ गतासुरती
रंतिमिच्छद्मनेन ससंभ्रमं पौरविलासिनीषु । पञ्चोल्लसत्केतनतति च्छलेन मुक्ता हहा
सेव विभाति शिप्रा इति । तत्र त्रियानेवं भेदः । यत्त्वत्रप्रयुक्तायमपह्नुतीगर्भत्वमुक्तं पत्रे
फेनततित्व ॰ मयपह्नुतं तत्रैवा हहा सतोत्प्रेक्षणादिहतु पर्यस्तापह्नुतिगर्भत्वं ईदृ
मंडलाद्वावयपह्नुतस्याप्रस्तादेस्तु तत्सादिषु निवेषनात् । इदं च पर्यस्तापह्नुतिग
र्भत्वमुत्प्रेक्षायामपि संभवति ॥ तत्र स्वरूपोत्प्रेक्षायां यथा । जानेतिरागादिद
मेव बिंबं बिंबस्य च मत्कृ भिन्नोधरत्वं । द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमो

कु० भूदनयोर्जनानां॥ अत्रप्रसिद्धफलेविंवनामायकृत्स्नान्निरागेननिमित्तेनदमयंसधरे
२२ तदुत्प्रेक्षापर्यस्तापन्हुतिगर्भाहेतूत्प्रेक्षायांतत्क्रमेत्वंप्राग्लिखितेहेतूत्प्रेक्षोदाहरण
एवदृश्यते· तथांधकारेष्वांधहेतुत्वमपन्हुत्यान्यत्रनिवेशितं· फलोत्प्रेक्षायांयथा
हृ रवितप्तोगजः पद्मान्तंत्यान्वाधितुंध्रुवं॥ सरोविघ्नातिनस्नातुंगजस्नानंहिनिःफलं 22
अत्रगजस्यसरःप्रवेशाप्रतिफलेस्नानेफलत्वमपन्हुत्यपव्यवाधनेतन्निवेशितं·।
स अलमनपायस्मस्त्यानुशंत्यापकृतनमनुसरामः॥ भेदकातिशयोक्तिस्तुतस्यैवान्यतु एम
वर्णनं· अन्यदेवास्यगांभीर्यमन्यद्धैर्यंमहीपते॥ अत्रलोकप्रसिद्धगांभीर्याद्यभे २२

दृपिभेदोवर्णितः॥यथावा॥अन्येयंरूपसंपत्तिरन्यावैदग्ध्यधोरणी।नैषानलिन
पत्राक्षीसृष्टिःसाधारणीविधेः॥संबंधातिशयोक्तिःस्यादयोगेयोगकल्पनं॥सोयथा
लिपुरस्यासन्स्पृशंतिविधुमंडलं॥यथावा॥कतिपयदिवसैःक्षयंप्रयायात्कनकगि
रिःकृतवासरावसानः॥इतिमुदमुपयातिचक्रवाकीवितरणशालिनिवीररुद्र
देवे॥अत्रचक्रवाक्याःसूर्यास्तमयकारकमहामेरुक्षयसंभावनाप्रयुक्तसंतोषा
संबंधेपितत्संबंधोवर्णितः॥योगेप्ययोगःसंबंधातिशयोक्तिरितीर्यते॥त्वयिदात
रिराजेंद्रस्वर्द्रुमान्नाद्रियामहे॥अत्रस्वर्द्रुमेष्वादरसंबंधेपितदसंबंधोवर्णितः॥य

कु० थावा॥ अनयोरनवद्यांगि स्तनयोः जृंभमाणयोः अवकाशोनपर्याप्तस्तेवबाहुलतां
२३ तरे॥ अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः॥ आलिंगति समं देव ज्यां शरांश्च प
राश्च ते॥ ॥ अत्रमौर्व्याद्याशरसंधानं तदानीमेव शत्रवः क्षितौ पतंतीति हेतु
कार्ययोः सहत्वं वर्णितं॥ यथा वा॥ मुंचति कोशं भजति भजंति भ्रकुंघमरिवर्गः॥
हमीरवीरखड्गस्त्यजति सजंति क्ष्मांमाभुजः॥ अत्र खड्गस्य कोशत्यागादिसमका
लएव रिपूणां धैर्यग्रहसागादि वर्णितं॥ चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे १५
यास्यामीत्युदितेन त्स्यावलयोभवदूर्मिका॥ अत्रनायकगमनवार्त्ताप्रसक्तिमात्रेण २३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योषितोतिकार्श्यं कार्यमुखेन दर्शितम्। यथा वा। आदातुं सकृदीक्षितेपि कुसुमे हस्ताग्रमालोहितं लाक्षारंजनवा
र्त्तयापि सहसारसंकृतलं पादयोः॥ अंगानामनुलेपनस्मरणमप्यासंतस्वेदावहं हंताधीरदृशः किमन्यदलकाभो
दोपि भारायते। यथा वा। यामि न यामीति धवे वदति पुरस्तात् क्षणेन तन्वंग्याः॥ गलितानि पुरो वलयान्य
पराण्यपि तथैव दलितानि। असंबन्धातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे। अग्रे मानो गतः पश्चादनुनीता प्रिये
ण सा। यथा वा। कवीन्द्राणामासन् प्रथमतरमेवांगणभुवश्चलद्भृंगासंगाकुलकरिमदामोदमधुराः॥
अमी पश्चात्तेषामुपरिपतिता रुद्रनृपतेः कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः॥ एताक्तिस्तोप्यतिश
योक्तयः कार्यशैघ्र्यप्रख्यापनार्थाः। वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता। संकुचंति सरोजानि स्वैरिणी
वदनानि च॥ त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते। मालतीशशभृल्लेखा कदलीनां कठोरता॥ प्रस्तुतानामप्र
स्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययोगिता। संकुचंतीति प्रस्तुततुल्ययोगितायामुदाहरणं

।तत्र प्रस्तुतचंद्रोदयकालीनतया वर्णनीयानां सरोजानां प्रकाशाभीरुस्वैरिणीवदनानां च संकोचरूपक्रिया
न्वयो दर्शितः। उत्तरश्लोके नायिकायाः कुमार्या वर्णने प्रस्तुते अवर्णनीयानां मालत्यादीनां कठोरतारूपैकगु
णान्वयः। यथा वा। संजातपत्रप्रकरान्वितानि समुद्वहंति स्फुटपाटलत्वं। विकस्वराण्यर्ककराभिमर्शाद्दि
नानि पद्मानि च वृद्धिमीयुः॥ नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः। लब्ध्वापि लोके
परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः॥ अत्र ग्रीष्मवर्णने तदीयत्वेन प्रस्तुतानां दिनानां पद्मानां च एक
क्रियान्वयः। ऊरुवर्णने प्रस्तुतानां करिकराणां कदलीनां चैकगुणान्वयः। हिताहिते वृत्तितौल्यमपरा तु
ल्ययोगिता। प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया। अत्र हिताहितयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्य
पराभवदानस्य च श्लेषेणाभेदाध्यवसायाद्वृत्तितौल्यम्। यथा वा। यश्च निंबं परशुना यश्चैनं मधुसर्पिषा। य
श्चैनं गंधमाल्याद्यैः सर्वस्य कटुरेव सः। अत्र वृश्चति सिंचति अर्चति इत्यध्याहारैर्वाक्यानि पूरणीयानि। २४

पूर्वोदाहरणं स्तुतिपर्यवसायि। इदं निंदापर्यवसायीति भेदः। इयं सरस्वतीकंठाभरणोक्ता। तुल्ययोगिता। गु
णोत्कृष्टैः समीकृत्य वचो न्यात् तुल्ययोगिता। लोकपालोपमः पाशी श्रीदः शक्रो भवानपि॥ अत्र वर्णनीयो
राजा शक्रादिभिर्लोकपालत्वेन समीकृतः। यथा वा। संगतानि मृगाक्षीणां तडिद्विलसितान्यपि। क्षणद्वय
न तिष्ठंति घनारब्धान्यपि स्वमम्॥ पूर्वत्र स्तुतिरिह निंदा। इयं काव्यादर्शे दर्शिता। इमां तुल्ययोगितां सि
द्धिरिति केचिद्व्यवजहुः। यदाह जयदेवः। सिद्धिः ख्याते पुरेन्नाम कीर्त्तने तुल्यतोक्तये। युवामेवेह वि
ख्यातौ त्वं बलैर्जलधिर्जलैरिति। मतांतरे त्वत्र वक्ष्यमाणं दीपकमेव। वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दी
पकं बुधाः। मदेन भाति कलभः प्रतापेन महीपतिः॥ प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकं। यथा क
लभनरपालयोः प्रस्तुतप्रस्तुतयोर्भानक्रियान्वयः। यथा वा। मणिः शाणोल्लीढः समरविजयी हेति
दलितो मदक्षीणो नागः शरदि सरितः श्यानपुलिना॥ कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनि

कु० नं०
२५

म्लाशोभं ते गलितविभवाश्चार्थिषु नृपाः॥ अत्र प्रस्तुतानां नृपाणामप्रस्तुतानां मण्यादीनां शोभैकधर्मान्वयः। प्रस्तु
ते कनिष्ठः समानो धर्मः प्रसंगादन्यत्रोपकरोति। प्रासादार्थमारोपितो दीपो रथ्यामाभिवेति दीपसादृश्याद्दीप
कं संज्ञायां वेति इवार्थे कन्प्रत्ययः। यद्यपि सुवर्णपुष्पां पृथिवीं चिन्वंति पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च
जानाति सेवितुम्॥ इत्यत्र प्रस्तुताप्रस्तुतानां युगपद्धर्मान्वयः मदेन भाति कलभ इत्यत्राप्रस्तुतस्यैव प्रथमं ध
र्मान्वयस्तथापि प्रासंगिकत्वं न हीयते। वस्तुगत्या प्रस्तुतोद्देशेन प्रवृत्तस्यैव वर्णनस्याप्रस्तुतेऽप्यन्वयात्। न
हि दीपस्य रथ्याप्रसादयोर्युगपदुपकारित्वेन जामात्रर्थं श्रपितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणे न च
प्रासंगिकत्वं हीयते। तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहणात्सर्वोद्देशेनैव धर्मो
क्तिरिति विशेषः। अयं चानयोरपरो विशेषः। उभयोरनयोरुपमालंकारस्य गम्यत्वाविशेषेऽपि अत्राप्रस्तु
तमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभावस्तत्र तु विशेषाग्रहणाद्वैच्छिकः स इति। त्रि २५

Public Domain. Digitization by eGangotri

विधंदीपकावृत्तौभवेदावृत्तिदीपकं। वर्षं संबुदमालेमं वर्षं सेषा वशार्वरी। उन्मीलंति कदंबा निस्फुटंति कुटज
द्रुमाः। माद्यंति वातकास्तृप्ताः माद्यंति चशिखावलाः॥ दीपकस्थाने कोपकारार्थ कतमा दीपकस्थानीमस्यश
ब्दस्यअर्थस्यउभयोर्वाआवृत्तौ त्रिविधमावृत्तिदीपकं। क्रमेणाऽत्रमेणोदाहरणानि। यथावा। उत्कंठयतिमे
घानां मालावर्गं कलापिनां॥ यूनां वोत्कंठयसघ मानसं मकरध्वजः। शमयतिजलधरधारा चातकयूनांत
थंचिरोपनताम्। क्षपयति च वधूलोचनजलधाराकामिनां प्रवासकृचिं॥ वदनेन निर्जितं तव निलीयते। चंद्रबिं
बमंबुधरे। अरविंदमपिचसुंदरि निलीयते पाथसां पूरे। एवंचावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वाभावे विदी
पकश्चाप्यावृत्तिमात्रेण दीपकव्यपदेशः। वाक्ययोरेकरूपसाम्ये प्रतिवस्तूपमामता॥ तापेन भ्राजते सूरः शूर
श्चापेन राजते। यत्रोपमानोपमेयवाक्ययोरेकः साधारणो धर्मः पृथग्निर्दिश्यते सा प्रतिवस्तूपमा। प्रतिव
स्तु प्रतिवाक्यार्थं उपमा समानो धर्मोऽस्यामिति व्युत्पत्तेः। यथात्रैव भ्राजते राजते इत्येक एव धर्म उपमानोप

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

कु० नं० २६

मेयवाक्ययोर्भिन्नपदाभ्यां निर्दिष्टः। यथा वा। स्थिरा शैली गुणवतां खलबुध्या न बाध्यते। रत्नदीपस्य हि शि
खा वासया पि न नाश्यते॥ यथा वा। तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदिच्छति। स्थिते
ऽरविंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्ष्यते। अत्र यद्यपि उपमेयवाक्ये अनिच्छा उपमानवाक्ये अवीक्षेति धर्मभेदः
प्रतिभाति। तथापि वीक्षमाणेऽत्रस्या वर्जनीयस्य प्रतिषेधानर्हत्वादिच्छापूर्वकवीक्षाप्रतिषेधो यमनिच्छापर्यवसि
त एवेति धर्मैक्यमनुसंधेयं। अर्थावृत्तिः प्रस्तुतानामप्रस्तुतानां वा। प्रतिवस्तूपमा तु प्रस्तुतानामिति विशेषः। अयं
वापरो विशेषः। आवृत्तिदीपकं वैधर्म्येण न भवति। प्रतिवस्तूपमां तु वैधर्म्येणापि दृश्यते। यथा वा। विद्वानेव हि
जानाति विद्वज्जनपरिश्रमं। न हि वंध्या विजानाति गुर्वीं प्रसववेदनां। यदि संति गुणाः पुंसां विकसंत्येव ते स्वयम्॥ न
हि कस्तूरिकामोदः शपथेन विभाव्यते। चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः॥ त्वमेव कीर्तिमान् राजन् विधुरे
व हि कांतिमान्। यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिंबप्रतिबिंबभावेन निर्दिष्टौ तत्र दृष्टांतः। त्वमेव की २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्तिमानिसत्रकीर्तिकांसो विंबप्रतिविंबभावः। यथावा। कामंनृपाः संतिसहस्रशोन्ये राजन्वतीमाहुरनेनभूमि
म्॥ नक्षत्रताराग्रहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः। यथावा। देवींवाचमुपासतेहिबहवः सारंतुसारस्व
तंजानीतेनितरामसौगुरुकुलक्लिष्टोमुरारिःकविः॥ अब्धिर्लंघितएववानरभटैः किंत्वस्यगंभीरता
मापातालनिमग्नपीवरतनुर्जानातिमंथाचलः॥ नन्वत्रोपमानोपमेयवाक्ययोर्न्नमेवैकधर्मइतिप्र
तिवस्तूपमायुक्ता। मैवं। अचेतनेमंथाचलेज्ञानस्यबाधितत्वेनतत्रजानातीत्यनेनसागराधस्तलाव
धिपर्यंतसंस्पर्शमात्रस्यविवक्षितत्वात् अत्रोदाहरणेपदार्थवृत्तिदीपकाद्विशेषः। पूर्ववत्प्रस्तुताप्रस्तु
तविषयत्वमत्रतोद्रष्टव्यः। वैधर्म्येणापिअयंदृश्यते। कृतंचगर्वाभिमुखंमनस्त्वयाकिमन्यदेवंनिहताश्च
नोद्विषः। तमांसितिष्ठंतिहितावदंशुमान्नयावदायात्युदयाद्रिमौलिताम्॥ वाक्यार्थयोः सदृशयोरैक्या
रोपोनिदर्शना॥ यद्दातुःसौम्यतासेयंपूर्णेंदोरकलंकता॥ अत्रदातृपुरुषसौम्यत्वस्योपमेयवाक्यार्थस्यपू

र्गैर्दोरकलंकलस्योपमानवाक्यार्थस्य च यत्तङ्गामैक्यारोपः। यथा वा। अरण्यरुदितं कृतं शवशरीरमुद्
र्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम्॥ श्वपुच्छमवनामितं बधिरकर्णजापः कृतो धृतोऽन्धमुखदर्पणो य
दबुधो जनः सेवितः॥ अत्राबुधजनसेवायाः अरण्यरोदनादीनां यत्तङ्गामैक्यारोपः। पदार्थवृत्तिमप्येके वदं
त्यां निदर्शनाम्॥ त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः। अत्र नेत्रयुगले नीलाम्बुजगतलीलापदार्था
रोपो निदर्शना॥ यथा वा। वियोगे गौडनारीणां यो गंडतलपांडिमा॥ अदृश्यत स खर्जूरीमंजरीगर्भरेणुषु
॥ पूर्वस्मिन्नुदाहरणे उपमेये उपमानधर्मारोपः॥ इह तूपमाने उपमेयधर्मारोप इति भेदः॥ उभयत्राप्यन्य
धर्मस्यान्यत्रासंभवेन तत्समानधर्माक्षेपादौपम्ये पर्यवसानं तुल्यम्। इयं पदार्थवृत्तिनिदर्शना ललितोपमेति
जयदेवेन व्याहृता। यद्यपि वियोगे गौडनारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतस्तथा
पि विशिष्टयोर्धर्मिणोरैक्यारोपो वाक्यार्थवृत्तिनिदर्शना। उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः१ २७

दार्थवृत्ति। निदर्शनेति व्यवस्थामाश्रित्यास्माभिरिहोदाहृतः। एवं च त्वयि सति शिवदातर्यस्मदर्थिता ना
मितरमनुसरंतो दर्शयंतोर्थिमुद्रं गचारमचरणपाने दुर्ग्रहं दोग्धुकामाः करभमनुसरामः कामधेनौ
स्थितायाम्। दोर्भ्यामब्धिं तितीर्षंतस्तुष्टुवुस्त्वद्गुणार्णवमित्यादिषु वाक्यभेदाभावेपि वाक्यार्थवृत्ति
रेव निदर्शना विशिष्टयोरैक्यारोपसद्भावाद्वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थश
ब्देन बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतधर्मिणोर्विवक्षितत्वात्। ए
वं च राजसेवा मनुष्याणामसिधारावलेहनं। पंचाननपरिष्वंगो व्यालीवदनचुंबनमित्यत्र प्रस्तु
ताप्रस्तुतवृत्तान्तयोरैक्यपर्यवसानेपि वाक्यार्थवृत्तिनिदर्शनायां न क्षतिः। तयोर्बिंबप्रतिबिं
बभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति अतएव निदर्शनायाः रूपकाद्भेदः रूपकेष्वविशिष्ट
योरेव मुखचन्द्रादिकयोरैक्यारोपः। अंघ्रिदंडो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे। विधिविष्टरपद्मस्य नालदं

कु० नं०
२८

डोमुदे स्तु वः। इति विशिष्टरूपकोदाहरणेपि न बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टताभिधानात् विष्टरकमला
श्लिष्टत्वरूपसाधारणधर्मवत्तासंपादनार्थमेव तत्र विशेषणोपादानात्। यदा तु सौम्यतेत्यादिनिदर्श
नोदाहरणे भुदात्तपूर्णह्लादीनामानंदकरत्वादिमेवात्र विशेषणयोर्बिंबप्रतिबिंबभावाभावात्। यत्र तु
विषमाविषमपि विशेषणानां परस्परसादृश्येन बिंबप्रतिबिंबभावोस्ति। ज्योत्स्नाभस्मच्छुरणधवला बिभ्र
ती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रिकापालिकीयं। द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपा
ले न्यस्तं सिद्धांजनपरिमलं लांछनस्यच्छलेनेति सावयवरूपकोदाहरणे तत्रापि विषयविषयिणोः
तद्विशेषणानां च प्रत्येकमैक्यारोपः न तु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टका
पालिकीरूपविषयिणश्च विशिष्टरूपेणैक्यारोपोस्ति। तस्माद्राजसेवा मनुष्याणामित्यादावपि वा
क्यार्थवृत्ति निदर्शनेति युक्तम्। मतांतरे तु इह पदार्थवृत्त्यैव निदर्शनया भाव्यम्॥ अपरां बोधनं प्राहुः कि २८

मयाऽसत्सदर्थयोः। नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः। उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्। वि
भावयन्समृद्धीनां फलं सुहृदनुग्रहम्। कस्यचित् किंचित्क्रियया विशिष्टस्य स्वक्रियया परान्प्रत्यसतः सतो
वार्थस्य बोधनं यन्निबध्यते तदपरां निदर्शनामाहुः। असदर्थबोधने उत्तरार्द्धमुदाहरणं। तत्र नश्येदितिबो
धयेदिति वक्तव्ये बोधयेदित्यस्य गम्यमानत्वादप्रयोगः। ततश्च राज्ञा चंद्रेण सह विरुध्यस्य यं नाशक्रियया
विशिष्टं तमः स्वकीयनाशक्रियया दृष्टांतभूतया अन्योप्येवं राजविरुद्धश्चेन्नश्येदिति अनिष्टपर्यवसा
यिनमर्थं बोधयदेव नष्टमिति निबंधनादसदर्थनिदर्शना। तथोत्तरश्लोके सविता स्वोदयसमय एव पद्मेषु
लक्ष्मीमादधानस्तया पद्मलक्ष्म्याधानक्रियया परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करम
र्थं बोधयन्निबद्ध इति सदर्थनिदर्शना। यथा वा। उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन्। शैल
शेखरगतः पृषद्गणश्चारुमारुतधुतः पतत्यधः॥ अत्र गिरिशेखरगतो वृष्टिबिंदुकणो मंदमारुतमात्रे

कु०नं०१
२९

णापि कंपितः पतन्लघो रुन्नतपदस्थान्निपतनहेतुरिति असदर्थबोधमन्निबद्ध इति असदर्थनिदर्शना। चूडाम
णिपदे धत्ते यो देवं रविमागतं। सतां कार्यातिथेयीति बोधयन् गृहमेधिनः। अत्र समागतं रविं शिरसा संभावय
न्नुदयाचलः स्वनिष्ठधारविधारणक्रियया समागतानां सतामेवं गृहमेधिभिरातिथ्यं कार्यमिति सदर्थबोध
मन्निबद्ध इति सदर्थनिदर्शना। अत्र केचित् वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयं असंभवद्वस्तुसंबंधनि
बंधनमिति तृतीयां तु संभवद्वस्तुसंबंधनिबंधनेति च व्यवहरंति। तथा हि आद्यनिदर्शनायां वाक्यार्थयो
रैक्यमसंभवत्तयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनायामप्यन्यधर्मोन्यत्रासंभवन् धर्मिणोः साम्ये प
र्यवस्यति। तृतीयनिदर्शनायां तु स्वक्रियापरान्प्रति सदसदर्थबोधनं संभवदेव सम्यतां गमीकरोति। बोध
यन्गृहमेधिन इत्यादौ कारीषो ग्निरध्यापयतीतिवत्समर्थाचरणे णिचः प्रयोगः। ततश्च यथा कारी
षोग्निः शीतापनयनेन बहून्वटून्ध्ययनसमर्थान्करोति एवं वर्ण्यमानः पर्वतस्त्वयमुपमानभा २९

0. In Public Domain. Digitization by eGangotri.Fundi

सरणीश्वासानिलाहृते। स्तेयं हिमवालुकापि कुचयोर्धत्ते क्षणं दीप्ततां तन्नामः प तितां बुबक्ररले धारां
बुसंलीयते॥ अत्र नायिकाया विरहसहत्वातिशयप्रकटनाय संतापकार्याणि मृणालमाल्यादीन्यपि वर्ण
नीयत्वेन विवक्षितानीति तन्मुखेन संतापोऽवगम्यः। यत्र कार्यमुखेन कारणमुखस्यावगतिः पिनिव
द्धा तत्र नायमलंकारः किंतु अनुमानमेव। यथा वा। परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्य
स्यांतः परिमिलनमप्राप्य हरितम्। इदं व्यस्तन्यासं प्रशिथिलभुजाक्षेपवलनैः कृशांग्याः संतापं व
दति नलिनीपत्रशयनं। पर्यायोक्तं तु गम्यस्य वचो भंग्यंतराश्रयं। नमस्तस्मै कृतो येन मुधा राहुवधूकु
चौ। यदेवगम्यं विवक्षितं तस्यैव भंग्यंतरेण विवक्षितत्वादपि वाच्यतरेण रूपांतरेणाभिधानं पर्यायोक्तं
उत्तरार्द्धमुदाहरणं। अत्र भगवान् वासुदेवः स्वासाधारणरूपेण गम्यः। राहुवधूकुचवैयर्थ्यकारकत्वे
न रूपांतरेण स एवाभिहितः। ~~अत्र भगवान्वासुदेवः स्वासाधारणरूपेण गम्यः।~~ यथा वा॥ लोकं पश्यति य

कु० सं०
५१

स्यांघ्रिः समस्यांघ्रिं न पश्यति। ताभ्यामप्यपरिच्छेद्या विद्या विश्वगुरोस्तव॥ अत्र गौतमः पतंजलिश्च स्वा
साधारणरूपाभ्यां गम्यौ रूपांतरेणाभिहितौ। यथा वा। निवेद्यतां हंत समापयंते शिरीषकोषम्रदिमाभि
मानं। पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते॥ अत्र कियद्दूरं जिगमिषोतिगम्य एवार्थो रू
पांतरेणाभिहितः। देवं वंदे जलधिशरधिदैवतासार्वभौमं यास्तप्रष्टाभुवनविदिता यस्य वाहाधिवाहाः
।भूषापेटी भुवनमधरः पुष्करं पुष्पवाटी शाटी पालाः शतमखमुखाश्चंदनद्रुर्मनोभूः॥९८॥ अत्र यस्य वे
दाः वाहाः भुजंगमा भूषणा निद्रसादिवाक्यार्थस्य प्रवस्थितौ वेदत्वाद्याकारेण वगम्या एव वेदादयो यास्तप्र
मुखाविनेयत्वाद्याकारेणाभिहिताः। परंतु देवतासार्वभौमत्वस्फुटीकरणाय विशेषणविशेष्यभावव्यत्यासे
न प्रतिपादिताः। अलंकारसर्वस्वकृतापि पर्यायोक्तस्य संप्रदायागतमिदमेव लक्षणमंगीकृतं। गम्यस्यापि
भंग्यंतरेणाभिधानं पर्यायोक्तमिति। चक्राभिघातप्रथमाज्ञयैव चकार यो राहुवधूजनस्य। आलिंगनोद्दा ५१

मविलासवंधंरतोत्सवंचुंवनमात्रशेषं॥९०॥इदंप्राचीनंदुदाहरणमन्यथायोजितमिति।राहुवधूगतेनविशि
ष्टेनरतोत्सवेनराहुशिरश्छेदःकारणरूपोगम्यइति।एवंचगम्यस्यैवाभिधानमितिलक्षणानुपपत्तिमा
शंक्ययत्गम्यंतस्यैवाभिधानायोगात्कार्यादिद्वारेणैवाभिधानंलक्षणेविवक्षितमितिलक्षणंक्लि
ष्टगत्यायोजितं।लोचनकृतापि।पर्यायोक्तंपदन्येनप्रकारेणाभिधीयतेइति।इदमेवलक्षणमंगीकृ
त्यतदुदाहरणेचकार्येणशब्दाभिहितेनकारणंव्यंग्यंतस्यरूपदर्शयंतत्रलक्षणंलक्ष्यनामचक्लिष्टगत्या
योजितं।वाच्यादन्येनप्रकारेणव्यंग्येनोपलक्षितंसद्यदभिधीयतेतत्पर्यायोक्तमिति।सर्वोयंक्लेशः
किमर्थमितिनविद्मः।तादृशितानिहिगम्यस्यैवरूपांतरेणाभिधानेवहून्युदाहरणानि।वक्ताभिधा
नप्रथमास्थ्यैवेतिप्राचीनोदाहरणमपिस्वरूपेणगम्यस्यभगवतोरूपांतरेणाभिधानसंभवात्सुयोज
मेव।यत्तुराहुशिरश्छेदावगमनं।तत्रप्रायुक्तरीत्याप्रस्तुतांकुरएव।प्रस्तुतेनराहोःशिरोमात्रावशेषणेनालिं

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

कु० नं० गनैर्बंधमलाघापादनरूपेवा व्येभगवतोरूपांतरेणउपपादितेतेतभगवद्रूपेणावगमनंपर्यायोक्तस्यविषयः
४२ पर्यायोक्तंतदप्याहुर्यद्व्याजेनेष्टसाधनं।।यामिचूतलतांद्रष्टुंयुवाभ्यामास्यतामिह।।९१।।अत्रनायिका
नायकेनसंगमस्यचूतलतादर्शनव्याजेन।निर्गच्छंत्यासख्योःस्वाकूतसंपादनरूपेणेष्टसाधनंपर्यायोक्तं
।यथावा।देहिमत्कंदुकंराधेपरिधानविगूहितं।इतिविश्रंसयन्नीवींतस्याःकृष्णोमुदेस्तुवः।।९२।।पू
र्वत्रपरेष्टसाधनं।अत्रकंदुकसद्भावशोधनार्थंनीवीविश्रंसनव्याजेनस्वेष्टसाधनमितिभेदः।उक्तिर्व्याज
स्तुतिर्निंदास्तुतिभ्यांस्तुतिनिंदयोः।।कःस्वर्धुनिविवेकस्तेपापिनोनयसेदिवं।।९३।।साधुदूतिपुनःसाधु
कर्तव्यंकिमतःपरं।यन्मदर्थेविलूनासिदंतैरपिनखैरपि।।९४।।निंदयास्तुतेःस्तुत्यानिंदायाअवगमनंव्या
जस्तुतिः।कःस्वर्धुनीत्युदाहरणे।विवेकोनास्तीतिनिंदाव्याजेनगंगासुकृतिवद्देवमहापातकिनोपिस्व
र्गंनयतीतिव्याजरूपयानिंदयातत्प्रभावातिशयस्तुतिः।।साधुदूतीत्युदाहरणेमदर्थइयंतंक्लेशमनुभू ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तवसत्सीतिव्याजस्तुतिमात्रस्तु सामर्थ्यं न गतासि किं तु रंतुमेव गतासि धिक् कृतां इति कां धर्मविरुद्धकारिणीमिति निं
दावगम्यते। यथा॥ कस्ते शौर्यमदो योद्धुं त्वय्येकः सप्तिमाध्यते। सप्तसप्तिसमो ऽस्त्येक भवंति परिपंथिनः॥८५॥
अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतं देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति॥ गंगासागरमंब
रं शशिकला नागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनं॥८६॥ अत्र आद्योदाहरणे
सप्तसप्तिसदृगतश्लेषमूलनिंदाव्याजेन स्तुतिर्गम्यते। द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोसीति राज्ञः स्तुत्या व्या
जरूपया मदीयं वैदुष्यादिदारिद्र्यादिकं सर्वं जानन्नपि वसुप्रदाने न रक्षितुं शक्तोपि न ददासीति निंदा व्यज्यते। सर्व
मिदं निंदास्तुत्योरेकविषयत्वे उदाहरणं। भिन्नविषयत्वे निंद्या स्तुत्याभिव्यक्तिर्यथा॥ कस्त्वं वानर रामराजभव
ने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः॥ बद्धो राक्षससूनुनेति कपिभिः संता
डितस्तर्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते॥८७॥ अत्र हनुमन्निंदया इतरवानर स्तुत्यभिव

कु० नं०
४३

क्तिर्यथा। मद्दर्कं मुकुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्याशया धावसि॥ का
लेबालतृणानि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किंनाम तप्तं तपः॥१९८॥ अत्र हरिणस्तु
साराजसेवानिर्विण्णस्यात्मनो निंदा व्यज्यते। अयमप्रस्तुतप्रशंसाविशेष इत्यलंकारसर्वस्वकारः। तेनहि
सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरं वैधर्म्येण दृश्यते। यथा। धन्याः खलु वने वाताः कल्हारसु
खशीतलाः॥ रामामिंदीवरश्यामं ये स्पृशंत्यनिवारिताः॥९९॥ अत्र वाता धन्या इत्यप्रस्तुतार्थादहमध
न्य इति वैधर्म्येण प्रस्तुतार्थः प्रतीयते इत्युपपादितं। इयमेवाप्रस्तुतप्रशंसा न कार्यकारणप्रतिबं
धनेति दंडी। अप्रस्तुतप्रशंसा स्यादप्रकांडे तु या स्तुतिः॥ सुखं जीवंति हरिणा वनेष्वपरसेविनः॥२००॥
अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः॥ सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते॥१॥ राजानुवर्त्तनक्लेश
निर्विण्णेन मनस्विनेति। वस्तुतस्तु अत्र व्याजस्तुतिरित्येव युक्तं। स्तुत्या निंदाभिव्यक्तेरित्यप्रस्तुतप्रशंसातो

४३

वैचित्र्यविषयविशेषसद्भावात्। अन्यथाप्रसिद्धव्याजस्तुत्युदाहरणेष्वप्रस्तुतिभ्यां निंदास्तुतिभ्यां प्रस्तुतेस्तु
तिनिंदे गम्येते इति एतावता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात्। एवं चानया प्रक्रियया यत्रान्यगतस्तुति
विवक्षया न्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव। अन्यस्तुतिव्याजेन तदन्यस्तुतिरिति अर्थानुगम
सद्भावात्। यथा। शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः॥ तरुणि येन तवाधरपा
टलं दशति बिंबफलं शुकशावकः॥ ३। अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्य
ते॥ निंदाया निंदया व्यक्तिर्व्याजनिंदेति गीयते॥ विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः॥ अत्र हरनिं
दया विषमविपाकसंसारप्रवर्तयितो विधेर्निंदाभिव्यंग्या। यथा वा। विधिरेव विशेषगर्हणीयः करट त्वं
रटकः। तवापराधः। सहकारतरौ चकार यो सौ सहवासं सरलेन कोकिलेन॥ ४। अन्यस्तुत्या अन्यस्तु
त्यभिव्यक्तिरिति पंचमप्रकारव्याजस्तुतिप्रतिबंदीभूतेयं व्याजनिंदा। ननु यत्रान्यस्तुत्या न्यस्तुतिरन्य

कु० नं०
४४

निंद्यान्यनिंदा च प्रतीयते तत्र व्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमे स्तुतिनिंदारूपाप्रस्तुतप्रशं
सोदाहरणेष्वप्रस्तुतप्रशंसानवकाशात्तेषामपि व्याजस्तुतिव्याजनिंदाभ्यां क्रोडीकारसंभवात् इतिचेत्॥
उच्यते। यत्राप्रस्तुतवृत्तांतात् स्तुतिनिंदारूपात् तत्स्वरूपः प्रस्तुतवृत्तांतः प्रतीयते अंतश्छिद्राणि भू
यांसि कंटका बहवो बहिः॥ इत्यादौ तत्र लब्धावकाशा सारूप्यनिबंधना। प्रस्तुतप्रशंसा अत्रापि प्र
वर्त्तमाना न वारयितुं शक्या अन्यस्तुत्यान्यस्तुतिः अन्यनिंदयान्यनिंदेति। एवं व्याजस्तुतिव्याजनिंदे
अपि संभवतश्चेत्कामं ते अपि संभवेतां न तस्याः परित्यागः। यद्यपि विधिरेव विशेषगर्हणीय इ
ति श्लोके विधिनिंदया तन्मूलकाकनिंदया वा विशेषज्ञस्य प्रभोस्तेन च विद्वत्समततया स्थापि
तस्य मूर्खस्य निंदापि प्रतीयत इति सारूप्यनिबंधनाऽप्रस्तुतप्रशंसाप्यस्ति तथापि सैव व्याजनिंदा
मूलेतिप्रथमोपस्थिता सापि तत्र दुर्वारा। एवं च व्याजनिंदामूलकव्याजनिंदारूपे यमप्रस्तुतप्र ४४

Public Domain. Digitization by eGangotri. Funding...

शंसेतिचमत्कारातिशयः। एवमेवव्याजस्तुतिमूलकव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसादृश्यते। यथा॥ ला
वण्यद्रविणव्ययोनगणितः क्लेशोमहानर्जितः स्वच्छंदचारतोजनस्यहृदयेचिंताज्वरोनिर्मितः॥ एषापिस्व
गुणानुरूपरमणाभावाद्वराकीहताकोर्थश्चेतसिवेधसाविनिहितस्तन्वीमिमांतन्वता॥५॥ अत्राप्रस्तु
तायास्तरुण्याः स्तुतिनिंदाव्याजेनतन्निंदाव्याजेनचशब्दार्थचमत्कारातिशयप्रशंसायांपर्यवस्यति।
अस्यश्लोकस्यवाच्यार्थविषयेयद्यपिनासंततसामंजस्यं। नहीमेविकल्पावीतरागस्येतिकल्पयितुंश
क्यते। रक्षानवुगुणत्वात्वीतरागहृदयस्यएवंविधविषयेष्वप्रवृत्तेश्च। नापिरागित्वेहिपद्युप्रामतास्या
त्। तथापिविवक्षितप्रस्तुतार्थपरतायांनाकिंचिदसामंजस्यं। अतएवास्यश्लोकस्याप्रस्तुतप्रशंसापरत्व
मुक्तंप्राचीनैः॥ वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपत्तेरितिआक्षेपः स्वयमुक्तस्यप्रतिषेधोविचारणा
त्॥ चंद्रसंदर्शयात्मानमथवास्तिप्रियामुखं। अत्रप्रार्थितचंद्रस्यप्रियामुखसत्वेनकैमर्थ्यंविचार्यअ

कु० नं० ४५

यवेत्यादिसूचितप्रतिषेधो आक्षेपः। यथा वा। साहित्यपाथोनिधिमंथनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः॥ य
त्तस्य दैत्या इव लुंठनाय काव्यार्थचोराः प्रगुणीभवंति॥७॥ गृहीतं तु सर्वैर्यदि वा यथेष्टं नास्ति क्षतिः कापि क
वीश्वराणां॥ रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः॥८॥ अत्रापि प्रथमश्लोकेन प्रार्थितस्य
चोरेभ्यो रक्षितमलस्य स्वोल्लिखितवैचित्र्याणां समुद्रगतरत्नजालवदक्षयत्वं विचिंत्य प्रतिषेध आ
क्षेपः। निषेधाभासमाक्षेपं बुधाः केचन मन्यते। नाहं दूती तनोस्तापस्तस्याः कालानलोपमः॥९॥ के
चिदलंकारसर्वस्वकारादयस्त्वेवमाहुर्न निषेधमात्रमाक्षेपः। किंतु निषेधो बाधितः सन्नर्थांतरे पर्यव
सितः किंचिद्विशेषमाक्षिपति स आक्षेपः। यथा दूत्या उक्तौ नाहं दूतीति निषेधो बाधितत्वादाभास
रूपः संघट्टनकालोचितभाववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन्निदानीमेव भवद्भिराग
स्यनामिकोजीवनीयेति विशेषमाक्षिपति। यथा वा। नरेंद्रमौले न वयं राजसंदेशहारिणः॥ जग ४५

कुंटुंबिनस्तेऽघशत्रुनः कश्चिद्दिष्यते॥१०॥ अत्र संदेशहारिणामुक्तौ नवयं संदेशहारिण इति निषेधोनुपपन्नः॥
संधिकालोचितकैतवकथनपरिहारेण यथार्थवादित्वे पर्यवस्यन् सर्वजगतीपालकस्य तव न कश्चिदपि शत्रु
भावेनावलोकनीयः। किंतु सर्वेपि राजानो भृत्यभावेन संरक्षणीया इति विशेषमाक्षिपति। आक्षेपोन्यो विधौ
व्यक्ते निषेधे च तिरोहिते। गच्छ गच्छसि चेत्कांत तत्रैव स्याज्जनिर्मम॥११॥ अत्र गच्छेति विधिर्व्यक्तः नागा इति नि
षेधस्तिरोहितः। कांतोद्देश्यदेशे निजजन्मप्रार्थनयां स्वस्या मरणसंसूचनेन गर्भितः। यथा वा। न चिरं म
मतायायतव यात्रा भविष्यति॥ यदि यास्यसि यातव्यमलमाशंकयापि ते॥१२॥ अत्रापि न चिरं मम ता
पायेति स्वस्या मरणसूचनेन गमनानिषेधो गर्भितः॥ आभासत्वे विरोधस्य विरोधाभास इष्यते॥ विना
वितान्विहारेण वक्षोजौ तव हारिणौ॥ अत्र हाररहितावविहारिणौ हृद्याविति श्लेषमूलको विरोधाभा
सः। यथा वा। प्रतीपभूपैरपि किं ततोभिया विरुद्धधर्मैरपि भेतृतोज्झिता॥ अमित्रजिन्मित्रजिदोजसा

कु०नं० ४६

सयद्विचारदकूचारदृगव्यवर्त्तत॥१३॥अत्र विरोधाभाससमानोत्प्रेक्षा। शिरस्को विरोधाभास इति पूर्वस्मा
द्भेदः॥ विभावना विनापि स्यात् कारणं कार्यजन्म चेत्॥ अप्यलाक्षारसासिक्तं रक्तं त्वच्चरणद्वयं॥१४॥ अत्र
लाक्षारसासेककारणाभावेपि रक्तिमा कथितः॥ स्वाभाविकत्वेन विरोधपरिहारः। यथा वा। अपीतक्षी
बकादम्बमसंसृष्टामलांबरं॥ अप्रसादितसूक्ष्मांबु जगदासीन्मनोहरं॥१५॥ अत्र पानादिप्रसिद्धहेत्व
भावेपि क्षीबत्वादि निबद्धं। विभाव्यमान शरत्समयहेतुकत्वेन विरोधपरिहारः॥ यथा। वरतनुकवरीवि
धायिना सुरभिनखेन नरेंद्रपाणिना। अवचितकुसुमापि वल्लरी समजनि वृत्त निलीनषट्पदा॥१६॥ अत्र व
ल्लर्यां पुष्पाभावेपि भृंगालिंगनं निबद्धं। अत्र वरतनुकवरीसंक्रांतसौरभनृपपाणिनखसंसर्गरूपं हेत्वं
तरं विशेषणमुखेन दर्शितमिति विरोधपरिहारः॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता॥ अस्त्रैर
तीक्ष्णकठिनैर्जगज्जयति मन्मथः॥१७॥ अत्र जगज्जये साध्ये हेतूनामस्त्राणामसमग्रत्वं तीक्ष्णत्वादि

४६

गुणवैकल्यं। यथा वा। उद्यानमारुतोद्धूतचूतचंपकरेणवः। उदस्रयंति पांथानामस्पृशंतोपि लोचने॥१९
॥अत्र वाष्पोद्गमने रेणूनामसमग्रत्वं स्पर्शनक्रियावैकल्यं॥ इमां विशेषोक्तिमिति दंडी व्याजहार। यतः प्र
थमोदाहरणे मन्मथस्य महिमातिशयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकत्वातिशयरूपश्च विशे
षः स्थापित इति अस्माभिस्तु तीक्ष्णत्वादिवैकल्यमपि कारणविशेषाभावरूपमिति विभावना दर्शिता॥ का
र्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके॥ नरेंद्रानेव ते राजन् दशासिभुजंगमः॥२०॥ अत्र नरेंद्रा विषवै
द्याः सर्पदंशप्रतिबंधकमंत्रौषधशालिनः श्लेषेण गृहीता इति तस्यैव प्रतिबंधके कार्योत्पत्तिः। यथा वा॥
चित्रं तपति राजेंद्र प्रतापतपनस्तव। अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणं॥२१॥ अकारणात्कार्यजन्म
चतुर्थी स्याद्विभावना॥ शंखाद्वीणानिनादोयमुदेति महदद्भुतं॥२२॥ तत्र शंखत्वेन कामिनीकंठः तंत्री
नादत्वेन तद्गीतं चाध्यवसीयते इत्यकारणात्कार्यजन्म॥ विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना॥ शीतां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कु॰ नं॰
४७

शुकिरणास्तन्वि हृतसंतापयंति मां ॥ २३ ॥ अत्र तापनिवर्त्तकतया तापविरुद्धैरिंदुकिरणैस्तापजननिरुक्ता ॥
यथा वा ॥ उदिते कुमारसूर्ये कुवलयमुल्लसति भाति नक्षत्रं ॥ मुकुलीभवति चित्रं परराजकुमारपाणिपद्मा
नि ॥ यथा वा ॥ अविवेकिकुचद्वंद्व हंतुं नाम जगत्त्रयं ॥ श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणं ॥ २४ ॥ पूर्वोदा
हरणयोः कार्यकारणविरोधित्वं स्वाभाविकमिह श्रुतिप्रणयित्वस्य स्वरूपागंतुकगुणप्रयुक्तमिति भेदः ॥ कार्या
कारणजन्मापि दृष्टा काचिद्विभावना ॥ यशःपयोधिरभवत्करकल्पतरोस्तव ॥ २५ ॥ यथा वा जाता लता
हि शैले जातु लतायां न जायते शैलः ॥ संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातं ॥ २६ ॥ कार्याजनि
र्विशेषोक्तिः सति पुष्कलकारणे ॥ हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ॥ २७ ॥ यथा वा ॥ अनुरागवती
संध्या दिवसस्तत्पुरःसरः ॥ अहो दैवगतिश्चित्रा तथापि न समागमः ॥ २८ ॥ असंभवोर्थनिष्पत्तेरसंभाव्यत्व
वर्णनं ॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति ॥ २९ ॥ यथा वा ॥ अयं वारामेको निलय इति रत्नाकर इति ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding...

श्रितोस्माभिस्तस्मात्तरलितमनोभिर्जलनिधिः॥ क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यद्
तिमिमकरमापास्यति मुनिः॥३०॥ विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः॥ विषं जलधरैः पीतं मूर्छिताः
पथिकांगनाः॥३१॥ ययोः कार्यहेत्वोर्भिन्नदेशत्वं विरुद्धं च तयोस्तन्निबध्यमानमसंगत्यलंकारः। यथा वि
षपानमूर्छयोर्भिन्नदेशत्वं। यथा वा। अहो खलभुजंगस्य विपरीतो वधक्रमः॥ अन्यस्य दशति श्रोत्रमन्यः
प्राणैर्वियुज्यते॥३२॥ क्वचिदसंगतिसमाधाननिबंधनेन चारुतातिशयः॥ यथा॥ अजस्रमारोहसि दू
रदीर्घसंकल्पसोपानततिं तदीयां॥ श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव तन्मयतामवाप्य॥३३॥
विरुद्धमिति विशेषणाद्यत्र कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं। तत्र नासंगतिः। यथा॥ भ्रूचापवल्लीं सुमुखी
यावन्नयति वक्रतां॥ तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम॥३४॥ अन्यत्र करणीयस्य ततोन्यत्र कृ
तिश्च सा। अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा॥३५॥ अपारिजातां वसुधां चिकीर्षन् द्यां तथाऽकृ

कु० नं०
४८

थाः॥ गोत्रोद्धारप्रवृत्तोपि गोत्रोद्वेगं पुराकरोः॥ २६॥ अत्रकृत्स्नं प्रतिशत्रुरूपोपालंभवचने भुवि चिकीर्षितत
मातत्र करणीयमपारिजातं द्विविकृतमिसेकासंगतिः। पुरा गोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्ध
गोत्राणां दलनं खुरकुट्टनैः कृतमिति द्वितीया॥ द्विविधापि श्लेषोत्थापिता। यथा वा॥ ललवङ्गमंडितसपत्न
विलासिनीनां भूषाभवं साभिनवा भुवनैकवीर॥ नेत्रेषु कंकणमथो रुचुपत्रवल्ली चोलेंद्रसिंह तिलकं
करपल्लवेषु॥ मोहं जगत्त्रयभुवामपनेतुमेतदादायरूपमखिलेश्वरदेहभाजां॥ निःसीमकांतिरस
नीरधिनामुनैव मोहं प्रवर्द्धयसि मुग्धविलासिनीनां॥ २७॥ अत्रापोद्धरणं कंकणादिनामन्यत्र करणी
न्य यत्वं प्रसिद्धमिति तेनोपेक्षितं। भवति नाभावनारूपा न्यत्र कृतिरापेक्षिप्यत इति लक्षणानुगतिः। विषमं वर्ण्य
ते यत्र घटनाऽननुरूपयोः॥ केयं शिरीषमृद्वंगी क्वतावन्मदनज्वरः॥ २८॥ अत्रापि मृदुत्वेनातिदुःसहत्वे
न चाननुरूपयोरंगनामदनज्वरयोर्घटना। यथा वा। अभिलषसि यदीदो वक्रलक्ष्मीमृगाक्ष्याः पु ४८

नरपिसकृद्बधौमजसंक्षालयांके॥ सुविमलमथ बिंबं पारिजातप्रसूनैः सुरभयवदनो चे खंकृतस्यामुखंक॥
४०॥ पूर्वत्र वस्तुसती घटना। अत्र चंद्रवदनलक्ष्म्यो मत्तर्कितघटनेति भेदः। विरूपकार्यस्योत्पत्तिरपरं विषमं
मतं॥ कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका॥४१॥ अत्र कारणगुणप्रक्रमविरुद्धात् श्यामाद्धवलोत्प
त्तिः॥ कार्यकारणयोर्निवर्त्यनिवर्त्तकत्वे पंचमी विभावना॥ विलक्षणगुणशालित्वे अयं विषम इति भेदः
। अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्॥ भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः॥४२॥ इ
ष्टार्थमुद्दिश्य किंचित्कर्मारभ्यवतस्ततो न केवलमिष्टस्यार्थस्यानवाप्तिः किंतु तत एवानिष्टस्यापि प्र
तिलंभश्चेद्विषमं॥ यथा भक्ष्यपेक्षया सर्पपेटिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः
६८ ॥ किंतु स्वकल्पहानिरपीति। यथा वा॥ गोपाल इति कृष्ण त्वं प्रचुरक्षीरवांछया॥ श्रितो मातृस्तनक्षीर
मप्यलभ्यं त्वया कृतं॥४३॥ इदमर्थावाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तिरनिष्टप्रतिलंभे चोदाह

कु० नं०
४८

रणं।अनर्थपरिहाररूपेष्टार्थसमुद्यमादिष्टानवाप्त्यनिष्टप्रतिलंभेचोदाहरणं।अनर्थपरिहाररूपेष्टार्थ
समुद्यमात्तदुभयंयथा।दिविश्रितवतश्चंद्रंसैंहिकेयभयाद्भुवि।।शशस्यपश्यतत्वंगिसाश्रयस्यततोभय
म्।।७७।।अत्रनकेवलंशशस्यस्वानर्थपरिहारानवाप्तिः।किंतुस्वाश्रयस्यापिअनर्थावाप्तिश्चेतिदर्शितं।।
परानिष्टावाप्तिरूपेष्टार्थसमुद्यमात्तदुभयं।यथा।दिधक्षन्मारुतेर्वालंतमादीप्यदशाननः।।आत्मीयस्य
पुरस्यैवसद्योदहतमन्दभूत्।।७८।।पुरस्यैवेत्येवकारेणपरानिष्टप्रापणाभावोदर्शितः।अनिष्टस्याप्यवा
प्तिश्चेतिश्लोकेअनिष्टावाप्तिरपिशब्दसंगृहीततया इष्टानवाप्तिश्चप्रत्येकमपिविषमपदेनान्वयः।तत
श्चकेवलानिष्टप्रतिलंभःकेवलेष्टानवाप्तिश्चेत्यन्यदपिविषमद्वयंलक्षितंभवति।तत्रकेवलानिष्ट
प्रतिलंभोयथा।पद्मातपत्ररसिकेसरसीरुहस्यकिंकंदमर्पयितुमिच्छसिवापिकायाम्।।कालःकलिर्जग
दिदंनकृतज्ञमहोस्थिलाहरिष्यतितवैवमुखस्यलक्ष्मीं।।७९।।अत्रपद्मातपत्रलिप्सयापद्मबीजावापंकृतव

४८

स्यात्तल्लाभोस्त्वेवकिंतुमुखशोभाहरणरूपोलाटानिष्टप्रतिलंभः। केवलेष्टानवाप्तिर्यथा। खिन्नोसिमुंचशै
लंबिभृमोवयमितिवदत्सुशिथिलभुजः॥ भरभुग्नविततबाहुषुगोपेषुहसन्हरिर्जयति॥ ४७॥ अत्रयच्च
विशैलस्योपरिपतनरूपानिष्टावाप्तिरपिप्रसक्तातथापिभगवत्करांबुजसंस्पर्शमहिम्नासाचनजाते
तिशैलधारणरूपेष्टानवाप्तिमात्रं। यथा। लोकेकलंकमपहातुमयंमृगांकोजातोमुखंतवपुन
स्तिलकछलेन। तत्रापिकल्पयसितान्विकलंकरेखांनार्यः स्मराश्रितजनंहिकलंकयंति॥ ४८॥
अत्रानर्थपरिहाररूपेष्टानवाप्तिः। यथा। शापोप्यदृष्टतनयाननपद्मशोभेसानुग्रहोभगवता
मयिपातितोयं॥ कृष्यांदहन्नपिखलुक्षितिमिंधनेद्धोबीजप्ररोहजननींदहनःकरोति॥ ४९॥ अत्र
परानिष्टप्रापणरूपेष्टानवाप्तिः। स्वतोनिष्टस्यापिमुनिशापस्यमहापुरुषपुत्रभावावश्यंभावग
र्भतयादशरथेनेष्टत्वेनस्वीकृतत्वात्। यत्रकेनचित्स्वेष्टसिद्ध्यर्थंप्रेषितेनान्येननियोक्तुरिष्टमन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पेक्ष्य स्वस्यैवेष्टं साध्यते तत्रापि दृष्टानवाप्तिरूपमेव विभ्रमं। यथा॥ तं प्रतीप्रेषिता दूती तस्मिन्नेव लयं गता॥
सख्यः पश्यत मोहं मे। विपाकं वा विधेरमुं॥५०॥ तस्मिन्नेव लयं गतेति दूत्या नायके स्वाश्लेषं प्रदर्शितं। यथा वा। न
पुंसकमिति ज्ञात्वा प्रियाय प्रेषितं मनः॥ तत्तु तत्रैव रमते हताः पाणिनिना वयं॥५१॥ एतानि सर्वथैवेष्टा
नवाप्त्युदाहरणानि। किंचिदिष्टावाप्तिपूर्वकं तदनवाप्तिर्यथा। मदीये वरदराजस्तवे। भानुर्निशास्वभवद
ध्रिमयूखशोभालोभात्स्वतापकिरणोत्करमात्रभातं॥ तत्रोद्धृते कृतवहावथ लग्नरागे तापं भजत्यनुदि
नं क्षहि मंदतापः॥५२॥ यथा। त्वदङ्घ्रिकांतिमयमंबुजकोशमुद्राभंगात्ततस्तुभमभिन्नकरोपक्लृप्ता॥ ल
ब्ध्वापि पर्वणि विधुः क्रमहीयमानः शंसत्यनीशमुपचितां श्रियमाशु नाशं॥५३॥ अत्राद्यश्लोके सूर्यकि
रणानां रात्रावग्नौ प्रवेशानमागमप्रसिद्धं सूर्यकिरणेषु भगवतश्चरणारुणिमैव स्यात्तत्कृतं तेषा
मग्नौ प्रतापनं परिकल्प्यते उदयकालदृश्यमरुणिमानं च तस्योद्धृतं नाराचारामिवाग्निसंतापन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रयुक्तारुणिमानुवृत्तिपरिकल्पस्सूर्यस्य महत्तापियत्वेन तात्कालिकेष्टावाप्तिरेवाजायतेन सार्वकालिके
ष्टावाप्तिरितिदर्शितं। द्वितीयश्लोके चंद्रस्य भगवन्मुखलक्ष्मीप्रम्लानस्य सुहृत्त्वेन मित्रशब्दश्लेषवशात्सू
र्यपरिकल्पित किरणस्य कमलमुकुलविकासकस्य चंद्रानुप्रवेशं च सुहृत्त्वाणे भगवन्मुखलक्ष्मीनिधान
गृहकोशमुद्रामोचनपूर्वकं ततो गृहीतभगवन्मुखलक्ष्मीकस्य तया भगवन्मुखलक्ष्म्या चंद्रप्रसादनार्थं चंद्र
स्पर्शरूपं परिकल्प्यते। एतावता प्रयत्नेन पौर्णमास्यामेव भगवन्मुखसारूप्येष्टावाप्तिर्जायते न सर्वकालिकी
ति दर्शितं। क्वचिदिष्टानवाप्तावपि तदवाप्तिभ्रमनिबंधनाविच्छित्तिविशेषो यथा। वल्लालक्षोणिपाल
त्वदहितनगरे संचरंती किराती कीर्णान्यादाय रत्नान्युरुतरखदिरांगारशंकाकुलांगी।। क्षिप्ता श्रीखं
डखंडं तदुपरि मुकुलीभूतनेत्राधमंती श्वासामोदप्रशक्तैर्मधुकरपटलैर्धूमशंकां करोति॥५७॥ अत्राप्र
भूताग्निसंपादनोद्योगात् तत्संपादनालाभेऽपि तल्लाभः। भ्रमो धूमशंकोपन्यासेन निबद्धः समं स्यादुदर्णनं यत्र द्वयो

कु०नं० ५१

रप्यनुरूपयोः॥ स्यादनुरूपंकृतंसमग्रहारेणकुचमंडलं॥५५॥ प्रथमविषमप्रतीद्वंद्वीदंसमं॥ यथावा॥ कौमुदीव
तुहीनांशुमंडलंजाह्नवीवशशिखंडमंडलं॥ पश्यकीर्तिरनुरूपमाश्रितातां विभातिनरसिंहभूपते॥५६॥ यथा
वा॥ कौमुदीवतुहीनांशुं चित्रंचित्रंवतवतमहश्चित्रमेतद्धि चित्रंजातोदैवादुचितरचनासंविधाताविधाता॥ य
न्निवानांपरिणतफलस्फीतिरास्वादनीयायच्चैतस्याकवलनकलाकोविदःकाकलोकः॥५७॥ पूर्वस्तुतिप
र्यवसायिदंनिंदापर्यवसायिरितिभेदः॥ सारूप्यमपिकार्यस्यकारणेनसमंविदुः॥ नीचप्रवणतालक्ष्मिजल
जायांतवोचिता॥५८॥ इदंद्वितीयविषमप्रतिद्वंद्विसमं॥ यथा॥ दवदहनादुत्पन्नोधूमोघनतामुपेत्यवर्षैस्तं॥
यच्छमयतितद्युक्तंसोपिहिदैवमेवविनिहंति॥ यथा॥ आदौहलाहलकृतभुजादत्तहस्तावलंबोवाल्पेशंभोर्ज
टिलमहसावद्धमंत्रीनिरूढः॥ प्रौढोराहोरपिमुखविवरंतरंगीकृतोयःसोयंचंद्रस्तपतिकिरणैर्मामितिप्रा मं२
प्तमेतत्॥५९॥ पूर्वत्रकारणस्वभावानुरूप्यंकार्यस्यतत्रलागंतुकतदापदुष्टसंसर्गानुरूपमितिभेदः॥ वि ५१

नानिष्टं तत्सिद्धिर्यदर्थं कर्त्तुमुद्यमः। मुक्तो वारणलाभोयं स्यान्नतेवारणार्थिनः। इदं समनिष्टस्याप्यवाप्तिश्चेति
अर्थसंगृहीतस्य त्रिविवक्ष्यापि विषमस्य प्रतिद्वंद्विदृष्टानवाप्तेननिष्टस्याप्रसंगाच्च। अत्र गजार्थिनयाचकस्यान
मनुसरंतं दौवारिकैर्वार्यमाणं प्रतिनर्मवचनं उदाहरणं। नचात्र निवारणमनिष्टमापन्नमिस्यनुदाहरणं
आशंकनीयं। राजद्वारिक्षणं निवारणं संभावितमितितदंगीकृत्य प्रवृत्तस्य विषमालंकारोदाहरणेत्थिवा
तर्कितोक्तया तिष्टाप्तस्य भावात्। किंच। यत्रोक्तयानिष्टसत्वेपि श्लेषमहिम्ना इष्टार्थप्रतीतिस्तत्रापि स
मालंकारोऽप्रतिहतएव। यथा। उच्चैर्गजैरटनमर्थयमानएव त्वामाश्रयन्निह निहचिरादुषितोस्मि
राजन्। उच्चाटनं त्वमपिलंभयसेतदेवमाम घनैव विफला महतांहि सेवा॥ ६२॥ अत्र व्याजस्तुतौ यद्य
पिस्तुतौ यद्यपि स्तुत्यानिंदाभिव्यक्तिविवक्षायां विषमालंकारस्तथापि प्राथमिकस्तुतिरूपवाच्यक
क्ष्यायां समालंकारोन निवार्यते। एवमिष्टार्थावाप्तिसत्वेपि श्लेषवशाद्दसतोऽनिष्टस्य प्रतीतिस्तत्रापि स

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

मालंकारस्यनक्षतिः। यथा॥ शास्त्रं न खलु कर्त्तव्यमिति चित्रा समीरितः॥ तदेवशास्त्रं कृतवान्पितुराज्ञा न लंघि
ता॥ ६३॥ अत्र पितुराज्ञा न लंघिते त्यत्र विरोधालंकारोऽपि अन्यार्थे न खल्वित्यत्र पदद्वयविभागात्मकरूपां
तरस्य विवक्षायाः सत्वेपि न खलु नातीति न खल्वित्येकपदत्वेन वस्तुसदर्थांतपरूपांतरमादाय समा
लंकारोप्यस्त्येव। श्लेषलब्धासदिष्टावाप्तिप्रतीतिमात्रेणाविगतमुदाहरणं। यथा वा। सत्संतपःसुग
ंधैयन्ताप्त्वां बुधुरविप्रतीक्षंसत् अनुभवति सुगतिमब्जांतलादज मानि॥ समस्तकमनीयं॥ ६४॥ विचित्रं तत्र
यत्नश्चेत् विपरीतः फलेच्छया॥ नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिं॥ ६५॥ यथा वा॥ सत्सुतपः सुमसे
पद्म मलिनयितुं खलवदनं विमलयति जगंति देवकीर्त्तिस्ते। मित्राह्लादं कर्त्तुं मित्रायतुस्यति प्रतापोपि॥ ६६॥
अधिकं पृथुलाधाराधेयाधिक्यावर्णनं। ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः॥ ६७॥ अत्र यत्र महाज
लौघे तानि ब्रह्मांडानि बुद्बुदायमाना निरसाधारस्माति विशालत्वं प्रदर्श्य तत्र न मांतीत्याधेयानां गुणानामा ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धिक्यं वर्णितं। यथा वा। युगांतकालप्रतिसंहृतात्मनो जगंति यस्यां सविकाशमासत। तनौ ममुस्तत्र न ते कैटभ
द्विषस्तपोधनाभ्यागमसंभवा मुदः॥६८॥ पृथ्व्याधेयाद्यदाधाराधिक्यं तदपि मन्मतं॥ किमद्भुवाग्ब्रह्म यत्रैते वि
श्राम्यंति गुणास्तव॥६९॥ अत्र यतद्दृतिप्रसक्षदृष्टमहावैभवत्वेनोक्तानां गुणानां विश्राम्यंतीत्यसंबाधा
वस्थानोक्त्या आधारस्य वाग्ब्रह्मण आधिक्यं वर्णितं। यथा वा। अहो विशालं भूपाल भुवनत्रितयोदरं॥ माति
मातुमशक्योपि यशोराशिर्यदत्र ते॥७०॥ अत्र पूर्वोदाहरणद्वये किंयद्वाग्ब्रह्म अहो विशालमिति चाधारय
योः प्रशंसा क्रियते। तथापि तनुत्वेन प्रसिद्धवत्कृतयोः शब्दब्रह्मभुवनोदरयोः गुणयशोराश्यधिकरण
त्वेनाधिक्यं कल्पयित्वैव प्रशंसा क्रियत इति तत्प्रशंसा प्रस्तुतगुणयशोराशिप्रशंसायामेव पर्यवस्यति॥
२१ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता॥ मणिमालोर्मिका तेद्य करे जपवटायते॥२२॥ अ
त्र मणिमालामयोर्मिका तावदंगुलीमात्रपरिमितत्वात्सूक्ष्मा सापि विरहिण्याः करे कंकणवत्प्रवेशिता।

कु०नं० ५३

तस्मिन्जपमालावलंबवद्रज्जुकया करस्य विरहकार्श्यात्तदति सूक्ष्मता दर्शिता। यथा वा। यन्मध्यदेशादपि ते सू
क्ष्मं लोलाक्षि दृश्यते।। मृणालसूत्रमपि ते नैव मातिस्तनांतरे।।२२।। अन्योन्यं नाम यत्र स्यादुपकारः परस्परं।। त्रिया
मशशिना भाति शशी भाति त्रियामया।।२३।। यथा वा। अध्वोर्ध्वाक्षः पिबत्यंबु पथिको विरलांगुलिः। तथा प्रपापा
लिकापि धारां वितनुते तनुं।।२४।। अत्र प्रपापालिकायाः पथिकेन स्वासक्त्या पानीयदानव्याजेन बहुकालं स्वमुखा
वलोकनं अभिलषंत्या विरलांगुलीकांजलिकरणेन तस्मिं पानीयदानानुवृत्तिसंपादनेनोपकारः कृतः। तथा प्र
पापालिकयापि स्वमुखावलोकनमभिलषतः पथिकस्य धारातनूकरणेन तस्मिं पानीयदानानुवृत्तिसंपादनेनो
पकारः कृतः। अत्रोभयोर्मिथोपाराभ्यां स्वस्वोपकारसंभवेपि परस्परोपकारो न निवार्यते। विशेषः स्यात माधा
रं विनाप्याधेयवर्णनं।। गतेपि सूर्ये दीपस्थास्तमश्छिंदंति तत्कराः।।७५।। यथा वा। कमलमनंभसि कमले
कुवलये तानि कनकलतिकायां।। सा च सुकुमार सुभगेत्युत्पातपरंपरा केयं।।७६।। अत्राधेयस्य सूर्यस्य प्र ५३

Public Domain. Digitization by eGangotri.

१ चितात्किरणानामन्यत्रावस्थितिरुक्ता॥ द्वितीयेसलिलस्य ... न्या ... स्याभावे ५४१

सिद्धाधारस्याभावेकमलकुवलययोरन्यत्रावस्थितिरुक्ता॥ क्वचित्तु सिद्धाधाररहितानामाधारांतरनिर्देशं विनैवावस्थि
तिवर्णनंदृश्यते। दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां॥ रमयंतिजगंतिगिरः कथमिवकवयो न ते वंद्याः
॥७७॥ अत्रकवीनामभावेपि तद्गिरामाधारनिर्देशं विनैवाऽऽकल्पमवस्थितिरुक्ता। विशेषः सोपियदेकं वस्त्वनेक
त्रवर्ण्यते॥ अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे॥ ७८॥ यथावा। हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे॥ वत्स
रामगतोसीति संतापेनानुमीयते॥ ७९॥ किंचिदारंभतोशक्यवस्त्वंतरकृतिश्च सः॥ त्वांपश्यतामयालब्धं कल्पवृक्ष
निरीक्षणं॥ ८०॥ यथावा। स्फुरदद्भुतरूपमुल्लसत्तापज्वलनं त्वां सृजतानवद्यविद्यं। विधिना ससृजे नवोमनोभूर्भुवि सत्यं
सविता बृहस्पतिश्च॥ ८१॥ अत्राद्यराजदर्शनारंभेण कल्पवृक्षरूपाशक्यवस्त्वंतरकृतिः। द्वितीयेराजसृष्ट्यारंभेणम
नोभवादिरूपाशक्यवस्त्वंतरकृतिः। व्याघातो यथाकारि तथाकारि क्रियेन चेत्॥ यैर्जगत्प्रीयते हंति तैरेव कुसु
मायुधः॥ ८२॥ यद्यत्साधनत्वेन लोकतोऽवगतं तत्केनचिद्विरुद्धसाधने क्रियेत चेत्तद्व्याघातः। यद्वा। यत्साधनतया

कु०नं०
५४

केनचिदुपात्तं तदन्येनतत्प्रतिद्वंद्विना तद्विरुद्धसाधनं क्रियते चेत्सोपि व्याघातः। तत्राद्यउदाहृतः। द्वितीयो यथा॥ दृशादग्धं म
नसिजं जीवयंति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः॥ ८३॥ सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी
।दयाचेद्बल इति मय्यपरित्याज्यएव ते॥ ८४॥ कार्यविशेषनिष्पादकतया केनचित्संभाव्यमानादर्थादन्येनतत्कार्यविरो
धिनी क्रिया सौकर्येण समर्थ्यते चेत्सोपि व्याघातः॥ कार्यविरुद्धक्रियायां सौकर्यकारणस्य सुतरां तदानुगुण्यं यथा जैत्रयं
त्रोमुखेन राज्ञा युवराजस्य राज्य एवस्थापने यत्कारणं तेन संभावितं बालत्वं प्रस्तुतादिरुद्धस्य सहनयनस्यैव कारण
तया युवराजेन परित्यागस्याशुक्तत्वं दर्शयता समर्थितं। यथा वा। लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया॥ दातापि
विसृजत्यर्थं तयैव ननु शंकया॥ ८५॥ अत्र पूर्वोत्तरार्धे पक्षप्रतिपक्षनिरूपणयो र्वर्ण्यतेइति लक्षणानुगतिः॥ गुंफः
कारणमाला स्याद्यथाप्राक्प्रांतकारणैः॥ नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः॥ उत्तरोत्तरकारणभूतपू
र्वपूर्वकारणभूतोत्तरैर्वा वस्तुभिः कृतो गुंफः कारणमाला। आद्योदाहृता। द्वितीया यथा॥ भवंति नरकाः पापात्पापं दा ५४

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDR
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding

रिद्यसंभवं॥ दारिद्यमप्रदानेन तस्माद्दानपरो भव॥८६॥ गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता॥ नेत्रे क
र्णांत विश्रांते कर्णौ दोस्तंभदोलिनौ॥८७॥ दोस्तंभौ जानुपर्यंतप्रलंबनमनोहरौ॥ जानुनी रत्नमुकुरा
कारे तस्य हि भूभुजः॥८८॥ उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः। पूर्वपूर्वस्योत्तरोत्तरविशेषणभा
वो वा गृहीतमुक्तरीतिः। अत्राद्यप्रकारउदाहृतो द्वितीयो यथा॥ दृक्कालालसमेव यस्य विभुता यस्त
त्र विद्योतते यत्रामुष्य सुधीभवति किरणा राशेः स्म या सा मभूत्॥ यस्तासितमुषस्सुमोस्म ह वि
वे यस्तस्य जीवातवे वो द्वाययज्जुणमेषमन्मथरिपोस्ताः पांतु वो मूर्त्तयः॥९०॥ दीपकैकावली
योगान्मालादीपकमिष्यते॥ स्मरेण हृदये तस्यास्तेनाचयि कृतास्थितिः॥९१॥ अत्र स्थिति
रितिपदमेकं स्मरेण तस्याः हृदये न त्वयि स्थितिः कृते से वं वा कद्मान्वयः॥ अतो दीपकं गृहीतमुक्त
रीतिरिति संङ्गावादेकावलीवेति दीपकैकावलीयोगः। यथा वा॥ संग्रामांगणमागतेन भवता चापे सया

शोषिते देवा कर्णपयेन येन सहस्रामघस्तमाक्षादितं॥ कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं ते
न त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयं॥ ९२॥ अत्र येन येन सहस्रामघस्तमाक्षादितमिति संक्षेप
वाक्यस्थितमेकं समाक्षादितपदं कोदंडेन शराद्दत्ताद्विषुषट् अपि विवरवाक्येषु तदुचित लिंगवचन
परिणामेनान्वेती। तिदीपकं। शरादीनामुत्तरोत्तरविशेषणभावादेकावलीचेति दीपकैकावलीयोगः॥ उत्तरोत्तर
मुत्कर्षः सारइत्यभिधीयते॥ मधुरमधुतस्मात्सुधा तस्याः कवेर्वचः॥ ९३॥ यथा वा अंतर्विष्णोस्त्रिलोकी
निवसति फणिनामीश्वरे सो पि शेते सिंधोः सोप्येकदेशे तमपि चुलकयां कुंभयो निश्चकार॥ धत्ते खघो
तलीलामयमपि नभसि श्रीनृसिंहक्षितीशस्य कीर्त्तिः कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति॥ ९४
॥ अयं श्लाघ्यगुणोत्कर्षः। अश्लाघ्यगुणोत्कर्षो यथा। तृणाल्लघुतरस्तूलस्तूलादपि च याचकः॥ वायुना
किं न नीतो सौ मामयं प्रार्थयेदिति॥ ९५॥ उभयरूपो यथा॥ गिरिर्महान् गिरेरब्धिर्महानब्धेर्नभो महत्॥

नमसोपिमहद्भुतंततोप्याशागरीयसी॥९६॥ तत्रस्वल्पयंतंमहत्वश्लाघ्यगुणः॥ प्रकृतार्थमामाशायाम
श्लाघ्यगुणः॥ यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयः॥ शत्रुंमित्रंविपत्तिंचजयरंजयभंजय॥९७॥ यथा
वा॥ शरणंकिंप्रपन्नानिविषवन्मारयंतिवा॥ नत्यज्यंतेनभुज्यंतेकृपणेनधनानियत्॥ अत्रक्रमालंका ९८
रमितिकेचिद्व्याजह्रुः॥ पर्यायोयदिपर्यायेणैकस्यानेकसंश्रयः॥ पद्मंमुक्त्वागताचंद्रंकामिनीवदनप्र
भा॥ अत्रैकस्याःकामिनीवदनप्रभायाःक्रमेणपद्मचंद्ररूपानेकाधारसंश्रयणंपर्यायः॥ यद्यपि प
द्मसंश्रयणंकंठतोनोक्तं। तथापिमुक्त्वेतिपदस्यागोत्वा[illegible]त्प्राक्संश्रयणाक्षेपेणपर्यायनिर्वा
हः अतएव·श्रोणीबंधस्त्यजतितनुतांसेवतेमध्यभागः पद्भ्यांमुक्तास्तरलगतयःसंश्रितालोच
कुच नाभ्यां॥ धत्तेवक्षःसचिवतामद्वितीयंतुवक्त्रंत्वद्गात्राणांगुणविनिमयःकल्पितोयौवनेन॥ अत्र
पर्यायंकाव्यप्रकाशकारउदाजहार॥ सर्वत्रशाब्दपर्यायोयथा॥ नन्वाश्रयस्थितिरियंतवकालकूट

केनोत्तरोत्तरविशिष्टपदोपदिष्टा॥ प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कंठेऽधुना वससि वाचि पुनः खलानां॥
१००॥ सर्वोऽप्ययं श्रुतिक्रमपर्यायः॥ संकोचपर्यायो यथा॥ प्राय। श्वारिता वसुधामशेषां छायासु विश्राम्यत त
स्तरूणां प्रौढिं गते संप्रति तिग्मभानौ शैत्यं शनैः तरुम्या ममासीत्॥१॥ अत्र शैत्यस्योत्तरोत्तरमाधारसं
कोचात्संकोचपर्यायः॥ विकासपर्यायो यथा। बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत। अधुना मृगशावा
क्षि हृदयेऽप्येव दृश्यते॥२॥ अत्र रागस्य पूर्वाधारापरित्यागेनाधारांतरसंक्रमणमिति विकासपर्यायः॥
एकस्मिन्नथ नैकं वा पर्यायः सोऽपि संमतः। अधुना पुलिनं तत्र यत्र स्रोतः पुराजति॥३॥ यथा वा। पुरा
भूदस्माकं प्रथममविभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः। इदानीं नाथस्त्वं
वयमपि कलत्रं किमपरं हतानां प्राणानां कुलिशकठिनानां फलमिदं॥४॥ अत्र दंपत्योः प्रथममभेदः त
तः प्रेयसीप्रियतमभावः ततो भार्यापतिभावः इत्याधेयपर्यायः। परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयो

मिथः॥ज— हैकं शूरं मुक्त्वा कटाक्षात्सरिपुश्रियम्॥ यथावा॥ तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्य
तेधुना॥ येन जर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोज्ज्वलं यशः॥ परिसंख्यानिषिध्यैकस्मिन्वस्तुयंत्र
णम्॥ स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवाम्॥ यथावा॥ विलंघयंति श्रुतिवर्त्म यस्यां लीलावतीनां न
यनोत्पलानि॥ बिभर्ति तस्याम पिवक्रिमाणमेको महाकालजटार्द्धचंद्रः॥ आद्योदाहरणे निषेधः शा
ब्दः॥ द्वितीये त्वार्थः॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्भवेत्॥ सद्यः शिरांसि चापान्वा नमयंतु म
हीभुजः॥ अत्र संधिविग्रहप्रमाणप्राप्तयोः शिरश्चापनमनयोर्युगपत्कर्तुमशक्ययोर्विकल्पः॥ यथा
वा॥ पततु सविरलं वारि नृत्यंतु च कलापिनः॥ अद्य कांतः कृतांतो वा दुःखस्यांतं करिष्यति॥ प्रियस्या
गमनं चेन्न मरणमाशंसनीयं। मरणे तु न प्रियसमागमसंभव इति तयोराशंसया विकल्पः॥ बहूनां यु
गपद्भावभाजां गुंफः समुच्चयः॥ नश्यंति पश्चात्पश्यंति त्रस्यंति च भवद्द्विषः॥ अविरोधेन संभावित

कु०नं० ५७ यौगपद्यानांगुम्फःसमुच्चयः।यथावा।विभ्राणाहृदयेत्वयाविनिहितप्रेमाभिधानन्नवंशल्यंयद्विदधाति
साविधुरितासाधोतदाकर्ण्यताम्॥शेतेशुष्यतिताम्यतिप्रलपतिप्रम्लायतिप्रेङ्खतिभ्राम्यत्युल्लुठति
प्रणश्यतिगलत्युन्मूर्छतित्रुट्यति॥अत्रकासाञ्चित्क्रियाणांकिञ्चित्कालभेदसम्भवेपिशतपत्रपत्र
शतभेदन्यायेनयौगपद्यंविरहातिशयद्योतनायविवक्षितमितिलक्षणानुगतिः॥अहम्प्राथमिकाभाजा
मेककार्यान्वयेपिसः॥कुलंरूपंवयोविद्याधनंचमदयन्त्यमुम्॥अत्रैकःकार्यसिद्धिहेतुत्वेनप्रक्रान्तस्तत्रा
न्येपियदहमहमिकयाखलेकपोतिकान्यायेनतत्सिद्धिंकुर्वन्तिसोपिसमुच्चयः॥यथा।मृदेआभिजात्य
मेकंसमग्रकारणंतद्देवरूपादिकमपितत्साधनत्वेनावतरति।यथावा।प्रदानंप्रच्छन्नंगृहमुपगते
संभ्रमविधिर्निरुत्सेकोलक्ष्म्यामनभिभवगन्धाःपरकथाः॥प्रियंकृत्वामौनंसदसिकथनंचाप्युप
कृतेःश्रुतेसन्ताशक्तिःपुरुषमभिजातंप्रथयति॥क्रमिकैकगतानांतुगुम्फःकारकदीपकम्॥ग ५७

च्छत्सागच्छति पुनः पान्थः पश्यति पृच्छति॥ यथा वा॥ निद्राति स्नाति भुंक्ते चलति कचभरान् शोषयत्यंतरास्ते
दीव्यत्यक्षैर्न चायं गदितुमवसरो भूय आयाहि याहि॥ इत्युद्दंडैः प्रभूणामसकृदधिकृतैर्वारितान् द्वारि दीनानस्म
श्पास्मानब्धिकन्ये सरसिरुहरुचामंतरंगैरपांगैः। आद्योदाहरणे श्रुतस्य पांथस्य कर्तृकारकस्यागमनादि
ष्वन्वयः। द्वितीये त्वध्याहृतस्य प्रभोः कर्तृकारकस्य निद्रादिष्वन्वमश्रुसेकस्यानेकवाक्येष्वन्वयेन दीपकच्छाया
पत्त्या कारकदीपकं। समाधिः कार्यसौकर्यं कारणांतरसंनिधेः॥ उत्कंठिता च तरुणी जगामास्तं भानुमान्॥
यथा वा। मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः॥ उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्॥ केनचिदारब्धस्य
कार्यस्य कारणांतरसंनिधानाद्यत्सौकर्यं तत्सम्यगाधानात्समाधिः। द्वितीयसमुच्चयप्रतिद्वंद्वायं समाधिः
। तत्र बहूनां प्रत्येकसमर्थानां खलेकपोतिकान्यायेन युगपत्साधनार्थमवतारः। अत्र त्वेकेन कार्ये समा
रिप्सिते ऽन्यस्य काकतालीयन्यायेन पतितस्य तत्सौकर्याधायकत्वमात्रमत्रोदाहरणम्। उत्कंठितेत्युत्कंठि

कु० नं०
५८

यामिस्मरणेषुपुष्कलंकारणंनत्वन्धकारमपेक्षते।अस्मात्तुछोहिनारीणामकालस्तोमनोभवइतिन्यायाद्दे
वादापतता त्वन्धकारेणतत्सौकर्यमात्रंकृतमिति।एवंद्वितीयेपियोज्यं।प्रत्यनीकंबलवतःशत्रोःपक्षेपराक्रमः
।जैत्रनेत्रानुगौकर्णावुत्पलाभ्यामधःकृतौ॥२२२॥यथावा।ममरूपकीर्त्तिमहरद्भुवियस्तमनुप्रविष्टहृ
दयेयमिति।त्वयिमत्सरादिवनिरस्तदयःसुतरांक्षिणोतिखलुतांमदनः॥२२३॥एवंबलवतिप्रतिपक्षे
प्रतिकर्त्तुमशक्तस्यतदीयबाधनंप्रत्यनीकमितिस्थितेसाक्षात्प्रतिपक्षेपराक्रमः।प्रत्यनीकमितिकै
मुतिकन्यायेनफलति।यथावा।मधुव्रतौघःकुपितःस्वकीयमधुप्रयापद्मनिमीलितेन॥बिंबंसमा
क्रम्यबलात्सुधांशोःकलङ्कमङ्केधुवमातनोति॥२२४॥कैमुत्येनार्थसंसिद्धिःकाव्यार्थापत्तिरिष्य
ते॥सजितस्त्वन्मुखेनेन्दुःकावार्त्तासरसीरुहाम्॥२२५॥अत्रसरस्सनेनपद्मानियेनजितानीतिविव
क्षितम्।तथाचसोपियेनजितस्तेनपद्मानिजितानीतिकिमुवक्तव्यमितिदण्डापूपिकान्यायेनपद्मज ५८

यरूपस्यार्थस्य सिद्धिः काव्यार्थापत्तिः। तां त्रिकापत्तिर्थाव्यावर्त्तनाय काव्यविशेषणम्। यथा वा। अधरोयम
धीराक्ष्या बन्धुजीवप्रभाहरः॥ अन्यजीवप्रभां हन्त हरतीति किमद्भुतम्॥ २२६॥ स्वकीयं हृदयं भित्वा निर्गतौ
यौ पयोधरौ॥ हृदयस्यान्यदीयस्य भेदने का कृपा तयोः॥ २२७॥ समर्थनीयस्यार्थस्य काव्यलिंगसमर्थनम्
॥ जितोसि मन्द कन्दर्प मच्चित्तेस्ति त्रिलोचनः॥ २२८॥ अत्र कन्दर्पजयोपन्यासस्य दुष्करविषयत्वात्समर्थ
नसापेक्षस्य मच्चित्तेस्ति त्रिलोचन इति स्वान्तःकरणे शिवसन्निधानप्रदर्शनेन समर्थनं काव्यलिङ्गम्। व्या
प्तिपक्षतादिसापेक्षनैयायिकलिङ्गव्यावर्त्तनाय काव्यविशेषणम्। इदं वाक्यार्थहेतुकम्। काव्यलिङ्गम्
पदार्थहेतुकं यथा। भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शिवं हा सोपानपरम्परे गिरिसुताकान्ताल
यालंकृते॥ अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे नि
धीयामहे॥ २२९॥ अत्र मोक्षस्य मोहत्वमप्रसिद्धमिति तत्समर्थने सुखालोकोच्छेदिनीति पदार्थो हेतुः। क

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDH

चित्पदार्थवाक्यार्थौ परस्परापेक्षौ हेतुभावं भजतः। यथा। चिकुरप्रकरा जयन्ति ते विदुषी मूर्द्धनि या बिभर्त्ति सेति॥ वाक्या
र्थः। पशुनाप्यपुरस्कृतेनेति पदार्थश्चेत्युभयं मिलितं हेतुः। क्वचित्समर्थनीयार्थसमर्थनार्थे वाक्यार्थे पदार्थो हेतुः। यथा॥
वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान्॥ नमन्मुक्तः संप्रत्यहमतनुरग्रे
प्यनतिभाङ्निनीश क्षन्तव्यं तदिदमपराधद्वयमपि॥ २२१॥ अत्र तावदपराधद्वयमपि समर्थनीयमस्पष्टार्थत्वा
त्तत्समर्थनं च पूर्वापरजन्मनोरनमनाभ्यां वाक्यार्थभूताभ्यां क्रियते। अत्र द्वितीयवाक्यार्थेऽतनुरित्येकपदार्थो
हेतुः। अत्रापि संप्रति नमन्मुक्त इति वाक्यार्थोऽनेकपदार्थो वा हेतुः। क्वचित्परस्परविरुद्धयोरुभयोस्समर्थनीय
योरेक एव हेतुः। यथा। जीयादम्बुधितनयाधररसमास्वादयन्मुरारिरयम्॥ अम्बुधिमथनक्लेशं कलयन्विफ
लं च सफलं च॥ २२२॥ अत्र विफलत्वसफलत्वकलनयोरेक एवाम्बुधितनयाधररसमास्वादो हेतुः। इदं का
व्यलिंगं हेत्वलंकार इति केचिदाचक्षुः। हे गोदावरि देवी तावकतटो देशो कलिङ्गः॥ कलिर्वा गदेवी बहुदेशा ५९

Sanskrit University, Balmeeki Campus, Kathmandu

ublic Domain. Digitization by eGangotri. Fund

दर्शनमखर्वी सख्या विरक्तिं गतः॥ एनामर्णवमध्यमुग्रमुरजिन्नाभीसरोजासनं ब्रह्माणं गमय क्षितौ कथमसावेकाकि
नी स्यति॥ ३३८॥ इत्यत्र ब्रह्मणः प्रापणं कथं गोदावर्य्याः कर्त्तव्यं इत्यसम्भावनीयार्थे वर्णनीयमिति श्लेषलक्षण
मितिश्च जयदेवेनोक्तं। वस्तुतस्तत्रापि पदार्थहेतुकं काव्यलिङ्गमेतत्। भेदकाभावात्। ननु साभिप्रायपदार्थवाक्या
र्थविन्यसनरूपात्परिकरात्काव्यलिङ्गस्य किं भेदकं। उच्यते। परिकरे पदार्थवाक्यार्थबलात्प्रतीयमानो र्थो वा
च्योपकारकतां भजते। काव्यलिङ्गे तु पदार्थवाक्यार्थावेव हेतुभावं भजतः। ननु यद्यपि सुरालोको ऽच्छेदिनी
त्यादि पदार्थहेतुककाव्यलिङ्गोदाहरणे प्यागे प्युन्नतिमानित्यादि वाक्यार्थहेतुककाव्यलिङ्गोदाहरणे च पदा
र्थवाक्यार्थावेव हेतुभावं भजतः। तथापि पशुनाप्यपुरस्कृतेनेति पदार्थहेतुकोदाहरणे मज्जितेत्ति त्रिलोच
न इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थस्यापि हेतुकोट्यनुप्रवेशो लभ्यते। पशुनेत्यविवेकित्वाभि
प्रायगर्भम्। विद्विषीत्यस्य प्रति निर्देशात्। त्रिलोचन इति च कन्दर्पदाहकतृतीयलोचनबलाभिप्रायगर्भम

कु०नं० ९० ।कन्दर्पजयोपयोगित्वात्तस्य।स्तसम्। तथापि न तयोः परिकर एव किंतु तदुभयापि तं काव्यलिंगमपि· प्रतीयमाना
विवेकविशिष्टेन पशुनाप्यपुरस्कृत लक्ष्यानेकपदार्थस्य प्रतीयमानकन्दर्पदाहकभालतृतीयलोचनविशि
ष्टस्य शिवस्य। चित्तेसन्निधानस्य च वाक्यार्थवाच्यस्येस्सादिपदिकरोदाहरणे सर्वशुचि निधानत्वादिनेके
नपदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वम्॥ यथा च वाक्यार्थपरिकरोदाहरणे पर्यायोक्तविषयां
तत्तक्षाक्यार्थे प्रतीयमानना हं व्यासस्त्स्यादितस्यासत्वात्रिलोचनस्सत्र च प्रतीयमानवाच्यस्यैव हेतुभावो
पपादकतया काव्यलिङ्गस्याङ्गमेव। यत्वन्नेत्रसमानकान्तिसलिले मग्नं तदिंदीवरमित्यत्रैनेकवाक्यार्थहे
तुककाव्यलिङ्गोदाहरणे त्वन्नेत्रसमानकान्तीस्यादिकानिन्दीवरशशिहंसविशेषणानि तेषां वाक्या
र्थानां हेतुभावोपपादकानीति तत्र वाक्यार्थहेतुककाव्यलिङ्गे पदार्थहेतुककाव्यलिङ्गमङ्गमिति न तयोः
काव्यलिङ्गोदाहरण लेकाचिदनुपपत्तिः। उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः। हनुमानाब्धिमत ९०

...0. In Public Domain. Digitization by eGangotri.Fundin...

रदुष्करं किं महात्मनाम्॥ ३३५॥ गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्। पुष्पमालानुषङ्गेण सूत्रं शिर
सि धार्यते॥ ३३६॥ सामान्यविशेषयोर्द्वयोरपि उक्तिरर्थान्तरन्यासः। तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवति। तत
श्च विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यस्य सामान्ये प्रस्तुते तेन सहाप्रस्तुतविशेषरूपस्य चार्थस्य न्यास
नमर्थान्तरन्यास इत्युक्तं भवति। तत्राद्यस्य द्वितीयार्द्धमुदाहरणम्। द्वितीयस्य द्वितीयः श्लोकः। नन्वयं काव्य
लिङ्गान्नातिरिच्यते। उदाहरणद्वयेप्यप्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोः सामान्ययोः विशे
षे कथमुपकरोतीति विवेक्तव्यम्। न हि सर्वथैव प्रस्तुतानन्वय्यप्रस्तुताभिधानं युज्यते। न तावदप्रस्तुतप्र
शंसायामिवाप्रस्तुत व्यञ्जकतया प्रस्तुतयोरपि सामान्यविशेषयोः स्वशब्दोपात्तत्वात्। नाप्यनुमानाल
ङ्कार इवाप्रस्तुतप्रतीतिजनकतया तद्वद्दिहमाप्तिपक्षधर्मताद्यभावात्। नापि दृष्टान्तालङ्कार इवोपमानतया वि
स्तब्धघातदोषः स्वबधाय खलस्य वीरकोपकरः। वनतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः॥ ३३७॥

कु०नं० इत्यादिषु सामान्ये विशेषस्योपमानत्वदर्शनेपि विशेषे सामान्यस्य क्वचिदपि तद्दर्शनादुपमानतयान्व
६१ येसामञ्जस्याप्रतीतेश्च। तस्मात्प्रस्तुतसमर्थकतमेवाप्रस्तुतस्योपयोग इहापि वक्तव्यः। ततश्च वाक्या
र्थहेतुककाव्यलिङ्गमेवस्यान्नत्वलङ्कारान्तरस्याप्यवकाश इति चेत् अत्र केचित् समर्थनसापेक्षा स्या
र्थस्य समर्थने काव्यलिङ्गं निरपेक्षस्यापि प्रतीतिवैभवात्समर्थनेऽर्थान्तरन्यासः। नहि यत्वन्नेत्रसमा
नकान्ति सलिल इत्यादिकाव्यलिङ्गोदाहरणेष्विव अथोपगूढे शारदा शशाङ्के प्रावृड्ययौ शान्त
तडित्कटाक्षा॥ कासां न सौभाग्यगुणोङ्गनानां नष्टः परभ्रष्टपयोधराणाम्॥ ३३८॥ दिवाकराद्र
क्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्। क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शि
रसां तीव॥ ३३९॥ इत्यादि अर्थान्तरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनापेक्षत्वमस्तीति। व
स्तुतस्तु प्रायो वाद्योयम्। अर्थान्तरन्यासेपि हि विशेषस्य सामान्येन समर्थनानपेक्षत्वेपि ६१

सामान्यंविशेषेणसमर्थनमपेक्षतएव।।निर्विशेषंनसामान्यमितिन्यायेन।बहूनामप्यसाराणांसंयोगः
कार्यसाधकइत्यादिसामान्यस्यतृणैरारभ्यतेरज्जुस्तयानागोपिवध्यते।।२८०।।इत्यादिसंप्रतिपन्नवि
शेषावतरणंविनाबुद्धौप्रतिष्ठितत्वासम्भवात्।नचतत्रसामान्यस्यकासांनसौभाग्यगुणोङ्गनानामि
त्यादिविशेषसमर्थनार्थसामान्यस्यैवलोकसम्प्रतिपन्नतयाविशेषावतरणंविनैवबुद्धौप्रतिष्ठितत्वंभ
वतीतिश्लोकेनतन्न्यसनंनापेक्षितमितिवाच्यम्।सामान्यस्यलोकसम्प्रतिपन्नत्वनियमाभावात्।न
हियोयोधूमवान्सोऽग्निमानितिव्याप्तिरूपसामान्यस्यलोकसम्प्रतिपन्नतयायथामहानसइतित
द्विशेषरूपदृष्टान्तानुपादानसम्भवमात्रेणप्रसिद्धव्याप्तिरूपसामान्योपन्यासेपितद्विशेषरूप
दृष्टान्तोपन्यासनिरपेक्षत्वंसम्भवति।नचैवंसामान्येनविशेषसमर्थनस्थलेक्वचित्तस्यसामान्य
स्यलोकप्रसिद्धत्वाभावेतस्यबुध्यारोहायपुनर्विशेषान्तरन्यसनप्रसङ्गइतिवाच्यम्।इष्टापत्तेः।अत्रै

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

कु०नं० वविषयेविकस्वरालङ्कारस्यानुपदमेवदर्शयिष्यमाणत्वात् उपमानवस्तुषुवर्णनीयसामान्याभा
६२ वेननिन्दायाः कविकुलक्षणत्वेनात्रसमर्थनापेक्षाविरहात्·नहितदास्यदास्येविगतोधिकारितां
नशारदः पार्वणशर्वरीश्वरः इत्यादिषुसमर्थनंदृश्यते। नविशेषणशास्त्रेणनाग्निनानचमूसुना।।अप्र
तीकारपारुष्याः स्त्रीभिरेवस्त्रियःकृताः।।३७१।।इत्यादिकाव्यलिङ्गविषयेषुसमर्थनापेक्षाविर
हेप्यप्रतीकारपारुष्याइत्यादिनासमर्थनदर्शनात्च। नहितत्रस्त्रीणांविषादिनिर्मितत्वाभावप्रति
पादनसमर्थनसापेक्षंप्रसिद्धत्वात्तस्मादुभयतोव्यभिचारात्समर्थनापेक्षसमर्थनेकाव्यलिङ्गंतन्निरपे
क्षसमर्थनेऽर्थान्तरन्यासइतिनविभागः। किन्तुसमर्थ्यसमर्थकयोस्सामान्यविशेषसम्बन्धेर्थान्तरन्यास
स्तदितरसंबंधेकाव्यलिङ्गमित्येवव्यवस्थावधारणीया। प्रपंचश्चचित्रमीमांसायांद्रष्टव्यः। एवमप्रकृते
नप्रकृतसमर्थनमुक्तम्। प्रकृतेनाप्रकृतसमर्थनम्। यथा।। यदुच्यतेपार्वतिपापवृत्तयेनरूपमित्यव्यभि ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding

चारितद्वचः। तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम्॥३४२॥ यथा वा॥ दानं ददत्यपि जलैः सह
साधिरूढे को विद्यमानगतिराश्रितुमुत्सहेत॥ यद्दन्तिनः कटकटाहतटान्मिमंक्षोर्मक्षूदपाति परितः पट
लैरलीनाम्॥३४३॥ यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः॥ स न जिग्ये महान्तो हि दुर्धर्षाः सागरा
इव॥३४४॥ यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्सिद्धावपरितुष्यता कविना तत्स
मर्थनाय पुनर्विशेषान्तरमुपमानीकृत्यार्थान्तरन्यासविधया वा विन्यस्यते तत्र विकस्वरालङ्कारः॥
उत्तरार्धं यथा कथंचिदुदाहरणम्। इदं त्वन्यन्मदुदाहरणम्॥ अनन्तरत्नप्रभवस्य यस्य हिमं न सौभा
ग्यविलोपि जातम्॥ एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥३४५॥ इदमुपमारी
त्या विशेषान्तरन्यासेन उदाहरणम्। अर्थान्तरन्यासेन विषयो यथा। कर्णारुन्तुदमन्तरेण रणितं गाहस्व
काक स्वकं॥ माकन्दमकरन्दशालिनमिह त्वां मन्महे कोकिलम्॥ धन्यानि स्थलवैभवेन कतिचिद्वस्तू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कु०नं०
६३ निकस्तूरिकाल्नेपालक्षितिपालभालपतिते पङ्केनशङ्कितकः॥३४६॥ यथावा॥ मालिन्यमब्जशशिनोर्मधुलि
ट्कलङ्कौ धत्तोमुखे तु तव दृक्तिलकाञ्जनाभ्यां॥ ह्रीणाविकः क्वचनमेलकतो गुणत्वं कुर्युर्गुणो हि वचक्षित्भ्रमवि
प्रलम्भौ॥३४७॥ प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम्॥ कचाः कलिन्दजातीरतमालस्तोमभेच
काः॥३४८॥ कार्यातिशयमाहेतौ तद्धेतुत्वपरिकल्पनं प्रौढोक्तिः। यथा वृक्षगतनैल्यातिशयमाहेतौ यमुना
तटरोहणे तद्धेतुपरिकल्पनम्। यथावा। कल्पतरुकामदोग्धी चिन्तामणिधनदशङ्खानाम्॥ रचितोरजोभि
रपयस्तेजः श्वासान्तराम्बरैर्वेधाः॥३४९॥ अत्रकल्पवृक्षादेकैकवितरणातिशयविवर्णनीयराजवितरणाहे
तौ कल्पवृक्षपरागादिरूपपञ्चभूतनिर्मितत्वेन तद्धेतुत्वपरिकल्पनं प्रौढोक्तिः॥ सम्भावनं यदीत्थं स्यादि
त्यूहोन्यस्य सिद्धये॥ यदिशेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव॥३५०॥ यथावा॥ कस्तूरिकामृगाणामण्डा
द्गन्धगुणमखिलमादाय॥ यदि पुनरहं विधिः स्यां खलजिह्वायां निवेशयिष्यामि॥३५१॥ यद्यर्थोक्तौ कल्प ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding...

नमतिशयोक्तिभेद इति काव्यप्रकाशकारः। किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम्। मिथ्याध्यवसि
तिर्वेश्यां वशयेत्खस्रजं वहन्॥ ३५२॥ अत्र वेश्यावशीकरणस्यासत्तासम्पादितत्वसिद्ध्यै गगनकुसुममा
लिकाधारणरूपार्थान्तरकल्पनं मिथ्याध्यवसितिः। यथा वा। अस्पक्षोणिपतेः परार्धपरमा लक्ष्मीकृताः
संख्यया प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्तयः॥ गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेरोधसि॥ ३५३॥ अत्राद्योदाहरणं निदर्शनगर्भम्। द्वितीयं तु [illegible]ग
र्भशुद्धम्। असम्बन्धे सम्बन्धरूपातिशयोक्तितो मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिद्ध्यर्थं मि
थ्यार्थान्तरकल्पनात्मना विच्छित्तिविशेषेण भेदः॥ प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम्॥ ल
लितं निर्गते नीरे सेतुमेषा चिकीर्षति॥ ३५४॥ प्रस्तुते धर्मिणि यो वर्णनीयो वाक्यार्थस्तमवर्णयि
त्वा तत्रैव सदृशस्य कस्यचिदप्रस्तुतवाक्यार्थवर्णनं ललितम्। यथा कश्चिद्दाक्षिण्यसमागततत्का

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोपेक्षितप्रतिनिवृत्तनायिकान्तरासक्तनायककानयनार्थंसखीप्रेषयितुकामांनायिकामुद्दिश्यसख्या
वचनेनतद्व्यापारप्रतिबिम्बभूतगतजलसेतुबन्धवर्णनंनेयमप्रस्तुतप्रशंसाप्रस्तुतधर्मिकत्वात्।नापि·
समासोक्तिः प्रस्तुतवृत्तान्तेवर्ण्यमानेश्लेषेणविशेषणसाधारण्येनसारूप्येणवाप्रस्तुतवृत्तान्तस्फूर्त्यभा
वात्॥अप्रस्तुतवृत्तान्तादेवसारूप्यादिहप्रस्तुतवृत्तान्तस्यागम्यत्वात्।नापिनिदर्शना·प्रस्तुताप्रस्तुतवृ
त्तान्तयोश्शाब्दोपात्तयोरैक्यसमारोपएवतस्यास्स्वरूपत्वात्।यदिविषयिणोश्शाब्दोपात्तयोः प्रव
र्त्तमानएवालङ्कारोविषयिमात्रोपादानेपिस्यात्तदारूपकमेवभेदेप्यभेदरूपायाअतिशयोक्तेरपिवि
षयमाक्रामेत्॥ननुतर्ह्यत्रप्रस्तुतनायकादिनिगरणेनतत्रशाब्दोपात्ताप्रस्तुतनीराद्यभेदाध्यवसा
यइतिभेदेअभेदरूपातिशयोक्तिरस्तु।एवंतर्हिसारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेपिसैवा
तिशयोक्तिःस्यादप्रस्तुतधार्मिकत्वान्नभवतीतीचेत्।तत्राप्रस्तुतधर्मिवाचकपदस्यापिप्रसिद्धा ६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: MIDC

तिशयोक्त्युदाहरणे ऽपि वप्रस्तुतधर्मिलक्षकत्वसम्भवात्। नन्वप्रस्तुतप्रशंसायां सारूप्यादप्रस्तुतवाक्या
र्थात्प्रस्तुतवाक्यार्थो ऽवगम्यते न त्वतिशयोक्तौ। विवक्षितविषयवाचकैस्तत्र सदैव विषयो लक्ष्यत इति चेत्। तर्ही
हापि प्रस्तुतगतादप्रस्तुतगतादप्रस्तुतवृत्तान्तरूपाद्वाक्यार्थात्प्रस्तुतवृत्तान्तरूपो वाक्यार्थो ऽवगम्यत
इत्यतिशयोक्तितो भेदोस्तु। वस्तुतस्तु॥ सोपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिस्सा मदवि प्र
स्मृतस्वपरादिकिं भूयसोक्तेन वा॥ पूर्वं निश्चितवानसि भ्रमर हे यद्वारणो ऽद्याप्यसावन्तःशून्यकरो नि
षेव्यत इति भ्रातः क एष ग्रहः॥३५५॥ इत्याद्यप्रस्तुतप्रशंसोदाहरणे प्रथमप्रतीतादप्रस्तुतवाक्यार्था
त्प्रस्तुतवाक्यार्थो ऽवगम्यत इत्येतन्न घटते अप्रस्तुते वारणस्य भ्रमरासेव्यत्वे कर्णचापलमात्रस्य भ्र
मरनिरासकारणस्य हेतुत्वसम्भवे ऽपि रसनाविपर्ययान्तःशून्यकरत्वयोर्हेतुत्वासम्भवेन मदस्याप्रस्तु
तत्वेमल एव हेतुत्वेन रसनाविपर्ययादीनां तत्र हेतुत्वान्वयार्थं वारणपदस्य दुष्टप्रभुरूपविषयक्रोडी

कु॰ नं॰ कार्येणैवप्रवृत्तेवक्तव्यत्वादेवमस्तीति यद्यप्रस्तुतस्याबोधनादिविच्छित्तिविशेषात्तत्राप्रस्तुतप्रशंसा या अति
६५ शयोक्तितोभेदोघटते तदत्रापि प्रस्तुतं स्वपदेन निर्दिश्य तत्राप्रस्तुतवर्णनारूपस्य विच्छित्तिविशेषस्य
सद्भावात्ततोभेदः सुतरां घटते। पश्यनीलोत्पलद्वंद्वात्‌· नापी कापि स्फुरति गगने तत्सरं सूक्ष्मपद्येत्यादि
ष्वप्रस्तुतं धर्मिणः कस्यचित्स्ववाचकेनाभिनिर्दिष्टत्वादतिशयोक्तिरेव। एतेन गतमेतदुपन्यवर्णनादिषु अ
स्म स्तवन्धोस्तवन्धवर्णनरूपातिशयोक्तिरस्तीति शङ्कानिरस्ता। तथासति। कस्त्वं भोः॰ कथयामी सादावपित
त्वप्रसङ्गात्। साध्यानिबन्धनप्रस्तुतवाक्यार्थावगतिरूपविच्छित्तिविशेषेणालङ्कारान्तरकल्पनान्वि
हापितुल्यम्॥ तस्मात्सर्वालङ्कारविलक्षणमिदं लक्षितं। यथावा। क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥३५६॥ अत्रापि दृष्टान्तभ्रान्तिर्नकर्तव्या। ईदृश्या मत्या सूर्यवं
शं वर्णयितुमिच्छामीति प्रस्तुतार्थस्योपन्यासात्॥ तस्मतिबिंबाप्रस्तुतार्थवर्णनाद्दावेविषमालङ्कारविन्या ६५

सेनत्व केवलं तासमर्थस्यागम्यमानत्वात्। यथा वा अनाविर्देशः कतमस्त्वमाधव सन्तमुक्तस्य दशा घनस्य। त्वदाप्त
सङ्केततया कृतार्थाश्रयाऽपि नानेन जनेन सज्या॥ २५७॥ अत्र कतमो देशस्त्वया परिसक्त इति प्रस्तुतार्थमुपन्य
स्य वसन्तमुक्तवनस्य दशामनापीति तत्र तिविम्बभूतार्थमात्रोपन्यासाल्ललितालङ्कारः। उत्कण्ठितार्थसंसिद्धि
र्विनायत्नं प्रहर्षणं॥ तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका॥ २५८॥ उत्कण्ठात्र विशेषः। सर्वेन्द्रियसुखास्वा
दो यत्रास्ति स अभिमन्यते॥ तस्याप्तिराशासंकल्पा उत्कण्ठां कवयो विदुः॥ २५९॥ इत्युक्तलक्षणात्। तद्विषय
स्य तदुपायसम्पादनयत्नं विना सिद्धिः प्रहर्षणमुदाहरणं स्पष्टम्॥ यथा वा। मेघैर्मेदुरमम्बरं वनभुवः श्या
मास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय॥ इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रु
मं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः॥ २६०॥ अत्र राधामाधवयोः परस्परमुत्कण्ठितत्वं प्राप्तिद्व
तरमयेच ग्रन्थकारेण निवद्धमिति सत्त्रोदाहरणे लक्षणानुगतिः॥ वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्ष

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

म्॥ दीपमुद्योजयेद्यावत्तावदभ्युदितोरविः॥२६१॥ इष्टम्॥ यथावा। चातकस्त्रिचतुरान्पयःकणान्याचते
जलधरंपिपासया॥ सोपिपूरयतिविश्वमम्भसाहन्तहन्तमहतामुदारता॥२६२॥ यत्नादुपायसिध्यर्थात्साक्षा
ल्लाभःफलस्यच॥ निध्यञ्जनौषधीमूलंखनतासाधितोनिधिः॥२६३॥ फलोपायसिध्यर्थायत्नात्मध्येउ
पायासिद्धिमनपेक्ष्यसाक्षात्फलस्यैवलाभोविप्रहर्षणम्॥ यथा। निध्यञ्जनसिद्ध्यर्थंमूलिकांखनतस्त
त्रैवनिधेर्लाभः। यथावा। उच्चित्यप्रथममधःस्थितंमृगाक्षीपुष्पौघंश्रितविटपंगृहीतुकामा॥ आरोढुंप
दमदधादशोकयष्ट्यांमूलंपुनरपितेनपुष्पिताभूत्॥२६४॥ अत्रपुष्पग्रहणोपायभूतारोहसिध्यर्थात्तद
निधानात्तत्रैवपुष्पग्रहणंलाभः॥ इष्यमाणविरुद्धार्थसम्प्राप्तिस्तुविषादनम्॥ दीपमुद्योजयेद्यावन्निर्वाण
स्तावदेवसः॥२६५॥ यथावा॥ रात्रिर्गमिष्यतिभविष्यतिसुप्रभातंभास्वानुदेष्यतिहसिष्यतिपङ्कजश्रीः॥ इ
त्थंविचिन्तयतिकोशगतेद्विरेफेहाहन्तहन्तनलिनींगजउज्जहार॥२६६॥ एकस्यगुणदोषाभ्यामुल्लासोन्य ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यतौ यदि। अपि मांपावये साध्वी स्नातेती च्छ निजा कृवी॥ २६७॥ काठिन्यं कुचयोस्स्रष्टुं वाञ्छ-सन्त्यः पदपद्मयोः॥
निन्दन्ति च विधातारं त्वद्धाटीष्वरियोषितः॥ २६८॥ तद्भाग्यं धनस्यैव यन्नाश्रयति सज्जनम्। लाभोऽयमेव भूपाल
सेवकानां न चेद्वधः॥ २६९॥ कस्यचिद्गुणेनान्यस्य गुणः दोषेण दोषो गुणेन दोषो दोषेण गुणो वा यद्वर्ण्यते स उल्ला
सः। द्वितीयार्धमाद्यस्योदाहरणम्॥ तत्र पतिव्रतामहिमगुणेन तत्स्नानतो गंगायाः पावनत्वगुणो वर्णितः। द्वि
तीयश्लोको द्वितीयस्योदाहरणम्। अत्र राज्ञो धाटीषु पलायमानानामरियोषितां पदयोर्धावनपरिश्रमा
दिदोषेण तयोः काठिन्यमसकृत्प्रार्थ्य कुचयोः स्रष्टवतो धातुर्निघृणत्वदोषो वर्णितः॥ तृतीयश्लोकस्तृती
यचतुर्थयोरुदाहरणं। तत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयणदोषत्वेन राज्ञः क्रौर्यदोषेण तत्सेवका
नां वधं विना निर्गमनं गुणत्वेन वर्णितम्। अनेनैव क्रमेणोदाहरणान्तराणि॥ मदयंत्यस्य संक्षोभाद्दंसेनां सा निपी
डितः॥ एकः क्षितीमदङ्गेषु शोषमङ्गभुवो भरः॥ २७०॥ अत्र नायिकासौन्दर्यगुणेन तदङ्गसन्निपीडितस्य [illegible]स

कु० सं०
६७

स्यकृतित्वगुणो वर्णितः। लोकानन्दनचन्दनद्रुमसखे नास्मिन्वने स्थीयतां दुर्वंशैः कठिनैरसारहृदयैराक्रा
न्तमेतद्वनम्॥ ते ह्यन्योन्यनिघर्षजातदहनज्वालावलीसङ्कुलानस्मान्येव कुलानि केवलमिदं सर्वं दहेयुर्वन
म्॥३७१॥ अत्र वेणूनां परस्परसंघर्षसंजातदहनसङ्कुलत्वदोषेण वननाशरूपदोषो वर्णितः॥ दाताऽर्थिनो म
धुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदान्धबुध्या॥ तस्यैव गण्डयुगमण्डनहानिरेषा भृङ्गाः पुनर्विक
चपद्मवने चरन्ति॥३७२॥ अत्र भ्रमराणामलङ्कारत्वगुणेन गजस्य तत्प्रतिक्षेपो दोषत्वेन वर्णितः॥ आ
घ्रातं परिचुंबितं परिमुकुलीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः॥ हे सद्रत्न तवैतदेव कु
शलं यद्वानरेणादरादन्तःसारविचारणाव्यसनिना चूर्णीकृतं नाश्मना॥३७३॥ अत्र वानरस्य चापलदोषेण रत्न
स्य चूर्णनाभावो गुणत्वेन वर्णितः। अत्र प्रथमचतुर्थयोरुल्लासो न्वर्थः। मध्यमयोश्च त्रिन्यायेन लाक्षणिकः। ता
भ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा॥ स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरं॥३७४॥ मीलन्ति मदि ६७

CC-0. In Public Domain. Digitization by eGangotri. Fund

पमानिकाहानिरमृतद्युतेः॥ताभ्यांगुणदोषाभ्यांतौगुणदोषौ।अत्रकस्यचिद्गुणेनान्यस्यगुणलाभेद्वितीयार्द्धमुदा
हरणम्।दोषेणदोषस्याप्राप्तौतृतीयार्द्धम्॥यथावा॥मृदुक्तिश्चेदन्तर्मुदमातिमुधीभूयसुधियः किमस्मानामस्मा
दारसपुरुषानादरभरैः॥यथाभूतस्तद्दलरमरमणीमापिरमणीकुमाराणामन्तःकरणहरणंनैवकुरुते॥
३७५॥लंचेत्संचारस्तेदृषेणलघुताकानामदिग्दन्तिनांमालैः कंकणभूषणानिकुरुषेहानिर्नहेमामपि॥
मूर्द्धन्यंकुरुषेक्षितांशुमयशः किंनामलोकत्रयीदीपस्यांबुजबान्धवस्यजगतामीशोस्तिकिंब्रूमहे॥३७६
॥अत्राद्येकवितारमणीगुणाभ्यामरसबालहृदयोल्लासोरूपगुणाभावोवर्णितः॥द्वितीयेपरमेश्वरानङ्गी
कारदोषेणदिग्गजादीनांलघुतादिदोषाभावोवर्णितः॥दोषस्याभ्यर्थनानुज्ञातत्रैवगुणदर्शनात्।विषदस्स
नुनः शश्वद्यासुसङ्गीर्यतेहरिः॥३७७॥यथावा॥मय्येवजीर्णतांयातुयत्त्वयोपकृतंहरे।नरः प्रत्युपकारा
र्थी।विपत्तिमभिकांक्षति॥३७८॥इयंहनूमन्तंप्रतिराघवस्योक्तिः।अत्रप्रत्युपकाराभावोदोषः तदभ्युपग

University

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

कु० नं०
९८

मो हेतुर्गुणो विपत्साकांक्षाया अप्रसक्तिः साच व्यतिरेकमुख प्रयुक्तेन सामान्येन विशेषसमर्थन रूपेणार्था
न्तरन्यासेन दर्शिता॥ यथावा॥ भजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसम्पदः प्रथमना
थनाथामहे॥ भवद्भवनदेहली विकटतुंड दण्डाहति स्फुरन्मुकुटकोटिभिर्मघवदादिभिर्भूयते॥३७९॥
लेशस्यादोषगुणयोर्गुणदोषत्वकल्पनम्॥ अखिलेषु विहङ्गेषु हन्तस्वच्छन्दचारिषु॥३८०॥ शुकपञ्ज
रबन्धस्ते मधुराणां गिरां फलम्॥ दोषस्य गुणत्वकल्पनम् गुणस्य दोषत्वकल्पनं च लेशः। राज्ञो वृकुमते
विदुषि पुत्रे चिरं राजधान्या प्रवसति। तद्दर्शनोत्कण्ठितस्य गेहस्य स्तुतवर्णनम् अप्रस्तुतप्रशंसा रूपम्॥ तत्र प्रथ
मार्द्धे इतरविहङ्गानामनुकूल दोषस्य स्वस्वच्छन्दचरणानुकूलतया गुणत्वं कल्पितम्॥ द्वितीयार्द्धे मधुरता
यि लक्ष्यगुणस्य पञ्जरबंधहेतुतया दोषत्वं कल्पितम्॥ न चात्र व्याजस्तुतिराशङ्कनीया॥ नह्यत्र विहङ्गान्त
राणां स्तुतिव्याजेन निन्दायां शुकस्य निन्दाव्याजेन स्तुतौ च तात्पर्यम्। किन्तु पुत्रदर्शनोत्कण्ठितस्य दोषगुण ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यो गुणत्वदोषत्वाभिमान एवात्र श्लोके निबद्धः। यथा वा। सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा॥ अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो युक्ता
युक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः॥ २८२॥ दण्डी छत्त्रोद्दजहार॥ सर्वैवगुणवान्जायो ग्यस्तो
पतिस्फूर्जितः॥ रणोत्सवे मनस्तः कं प्यस्य कामोत्सवादपि॥ २८३॥ चपलो निर्दयश्चासौ जनः। किं तेन
मे सखि॥ आगःप्रमार्जनायैव चाटवो येन शिक्षिताः॥ २८४॥ अत्राद्यश्लोके राज्ञो वीरोत्सेकस्तुतिः
॥ कन्याया निरन्तरं भोगाभिलिप्सितो दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धसख्या राजकोपप
रिजिहीर्षया गुण एव दोषो गुणत्वेन वर्णितः। उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्नुवत्या पिता
प्रागन्यतो मानपरिग्रहानुगुण्यं प्रतिज्ञाय तदनिर्वाहमाशङ्कमानया सखीनामुपहासं परिजिही
र्षन्त्या नायिकया तस्य चाटुकारिता गुण एव दोषत्वेन वर्णितः। न चाद्यश्लोके स्तुतिर्निन्दापर्यवसायि

CC-0. In Public Domain. Digitization by eGangotri. Funding: MHRD

कु॰न॰ ९९

नीद्वितीयश्लोके निन्दास्तुतिपर्यवसायिनीति व्याजस्तुतिराशङ्कनीया॥ राजपुत्रकोपादिपरिहारार्थमिह
निन्दास्तुत्योरन्याविद्धितं लेशएवोद्भाटनेन ततो विशेषादिति। वस्तुतस्तु इह व्याजस्तुतिसद्भावेपि न दो
षः। न ह्येतावता लेशमात्रस्य व्याजस्तुत्यन्तर्भावः प्रसज्यते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शित
त्वात्। नापि व्याजस्तुतिमात्रस्य लेशान्तर्भावः प्रसज्यते। भिन्नविषयव्याजस्तुत्युदाहरणेषु। कस्त्वं
वानर रामचन्द्रभवने लेखार्थसंवाहको। पद्माक्षं मुकुरीक्षते न धनिनां ब्रूषे न चाटुस्मृषेत्यादिषु दो
षगुणीकरणस्य गुणदोषीकरणस्य चाभावात्। तत्रान्यगुणदोषाभ्यामन्यत्रगुणदोषयोः प्रती
तेः विषमैक्येपि॥ इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारिर्दिङ्नागानां मदजलमषीभाञ्जि ग
ण्डस्थलानि। अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्याभासन्ते वद धवलितं किं यशोभिस्त्व
दीयैः॥ ३८५॥ इत्याद्युदाहरणेषु लेशास्पर्शात्। अत्रेन्दुलक्ष्मादिधवलीकरणाभावदोष एव गुणत्वे ९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्पर्यवस्यति। किन्तु परिसंख्यारूपेण ततोऽन्यत्सर्वं धवलितमिस्म्यो गुणः प्रतीयते। क्वचिद्व्याजस्तुत्यु
दाहरणे गुणदोषीकरणमलेपि लक्ष्यते विषयान्तरमपि दृश्यते। यथा। सर्वदा सर्वदोऽसीति मिथ्या संस्तूय
से बुधैः॥ नारयो लेभिरे पृष्ठं न वक्षः परयोषितः॥ २८६॥ अत्र हि वाच्यमानिन्द्यापरिसंख्यारूपेण
तं ततोऽन्यत्सर्वमभिमतमर्थिनां दीनानां दीयत इति स्तुत्यन्तरमपि प्रतीयते। एवञ्च। येषूदाहरणेषु
कस्ते शौर्यमदो योद्धुमित्यादिषु गुणदोषीकरणादिकमेव व्याजस्तुतिरूपतया व्यवतिष्ठते। तत्र ले
शव्याजस्तुत्योस्संकरोऽस्तु। इत्थमयमेव हि व्याजस्तुत्यप्रस्तुतप्रशंसयोरपि प्राक्संकरो दर्शि
तः। सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः॥ नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा॥ २८७॥ अ
त्र नायिकावर्णनपरेण दृग्युग्मविपुलापदेनास्याः अनुष्टुभो युग्मविपुलानामलक्ष्यं सूच्यार्थसू
चनं मुद्रा। यद्यप्यत्र ग्रन्थेऽकृतनाम्नो नास्ति सूचनीयत्वं तथापि। अस्योत्तरार्द्धे लक्ष्ये लक्षणमुक्तछन्दः॥

स्त्रपातित्वेन तस्य सूचनीयत्वमस्तीति तदभिप्रायेण लक्षणं योज्यम्॥ एवं रत्नमालायाम्। तद्रत्ननामनि
वेशनेन तत्तन्नामककुन्दादिकसूचनं नक्षत्रादिमालायामग्निदेवतानामभिर्नक्षत्रसूचनमित्यादि
वयमेवालङ्कारः। एवं नाटकेषु वक्ष्यमाणार्थसूचनेऽपि। क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः॥
चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते॥ १२८॥ अत्र चतुरास्यादिपदैर्वर्णनीयस्य ब्रह्मविष्णुरुद्रा
त्मकता प्रतीयते इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशनं रत्नावली॥ यथा वा। रत्नाप्रि
यलाञ्छने कठिनतावासे यशालिङ्गिते प्रह्लादैकरसे क्रमादुपचिते भूभृद्गुरुत्वामहे। कोकस्पर्द्धिनि भोग
भाजि जनितानङ्गे खलीनोन्मुखे भाति श्रीरमणावतारदशकं बाले भवत्सास्तने॥ १२९॥ प्रसिद्धसहपा
ठानां प्रसिद्धक्रमानुसरणेप्ययमेवालङ्कारः। यथा॰ यस्य वह्निमयो हृदयेषु जलमयो लोचनपुटेषु मारु
तमयः श्वसितेषु क्ष्मामयोऽङ्गेषु॰ आकाशमयस्त्वन्तेषु। पञ्चमहाभूतमयो मूर्त्तिरिवादृश्यत निहतप्राति

सामन्तान्तःपुरेषु प्रतापः। एवमष्टलोकपालनवग्रहादीनां प्रसिद्धसहपाठानां यथाकथंचित्प्रकृतोप
मानोपरञ्जनकतादिप्रकारेण निवेशने रत्नावल्यलङ्कारः। प्रकृतान्वयं विना क्रमिकतत्तन्नाम्नां श्लेषभ
ङ्ग्या निवेशने प्ययमेवालङ्कारः॥ तद्गुणस्स्वगुणत्यागादन्यदीयगुणग्रहः॥ पद्मरागायते नासामौक्तिकं
तेऽधरत्विषा॥ २९०॥ यथा वा। वीरत्वद्रिपुरमणीपरिधातुं पल्लवानि संस्पृश्य॥ नहरति वनभुवि निजक
रुरुह रुचिरखचितानि पाण्डुपत्रधियं॥ २९१॥ पुनस्स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतं॥ हरकण्ठांशु
लिप्तोपि शेषस्त्वद्यशसा सितः॥ २९२॥ यथा वा। विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फु
रन्त्यः॥ रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥ २९३॥ अयमेव तद्गुण इति केचिदा
जगुः। पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि॥ दीपे निर्वापिते प्यासीत्काञ्चीरत्नैर्महन्महः॥ २९४॥
लक्षणे च कारात्पूर्वरूपामीति लक्ष्यवाचकदनुवृत्तिः। यथा वा। ध्वांरवक्लिभिरावृतं वहिरपि प्रस्खिलग

कु०नं० ७१ गुर्जरैरन्तःकञ्चुकिभिर्लसन्मणिधरैर्व्याप्ता भूमयः॥ अत्रानन्तमहिबीजैरेव शयनं लब्धिर्दि
षाम्याद्रिरजन्यैव चीरन्तनयत्नापितीं शून्ये विराज्यस्थितिः॥३९५॥ सङ्गतान्यगुणानङ्गीकारमाहु
रतद्गुणम्॥ चिरं रागिणि मच्चित्ते निहितापि न रज्यसि॥३९६॥ यथा वा॥ गंडाभोगे विहरति मदैः पिच्छि
लो दिग्गजानां वैरिस्त्रीणां नयनकमले स्वञ्जनानि प्रमार्ष्टि॥ यद्यप्येषा हिमकरकराद्वैतसौवस्तिकी त्वत्
कीर्त्तिर्दिक्षु स्फुरति तदपि श्रीनृसिंहक्षितीन्द्र॥३९७॥ ननु चान्यगुणेन चान्यत्रगुणोदयात्तदुदयरूपाभ्या
मुल्लासावज्ञालङ्काराभ्यां तद्गुणातद्गुणयोः को भेदः। उच्यते उल्लासावज्ञानलक्षणयोर्गुणशब्दो [redacted]
[redacted] दोषप्रतिपक्षवाची अन्यगुणेनान्यत्रगुणोदयतदनुदयौ च न तस्यैव गुणस्य सङ्क्रमासङ्क्रमणे किन्तु
सद्गुणरूपदोषेन सदसच्छिक्षयोर्ज्ञानोल्लासनुल्लसितवत्तद्गुणजन्यत्वेन सम्भावितयोर्गुणान्तरयोरु
ल्लासानुल्लासौ। तद्गुणातद्गुणयोः पुनर्गुणशब्दो रूपरसगन्धादिगुणवाची। तत्रान्यदीयगुणग्रह ७१

In Public Domain. Digitization by eGangotri.Fund...

णाग्रहणेचारक्तस्फटिकमालिन्यादिन्यायेनान्यदीयगुणेनैवारुणनारुणनोववक्षितेः तथैववोद्धाहरणा
निप्रदर्शितानि। यद्यपिअवज्ञालङ्कृतिरतद्गुणश्चविशेषोक्तिविशेषावेव। कार्याजनिर्विशेषोक्तिस्स
तिपुष्कलकारणेइतितत्सामान्यलक्षणाक्रान्तत्वात्। तथाप्युल्लासतद्गुणप्रतिद्वन्द्वितयाविशेषाका
रणालङ्कारान्तरतयापरिगणितावितिध्येयम्॥ प्राक्सिद्धस्वगुणोत्कर्षोऽतद्गुणः परसन्निधेः॥ नी
नीलोत्पलानिदधतेकटाक्षैरतिनीलताम्॥ २९८॥ यथावा॥ कपिरपिचकापिशायनमदमत्तोवृश्चि
केनसन्दष्टः॥ अपिचपिशाचग्रस्तः किंब्रूमोवैकृतंतस्य॥ २९९॥ कपिर्जातस्तावतःसिद्धस्यवैकृतस्य
मद्यसेवादिभिरुत्कर्षः॥ मीलितंयदिसादृश्याद्भेदएवनलक्ष्यते॥ रसेनालक्षिलाक्षाप्यश्चरणेसह
जारुणे॥ ३००॥ यथावा॥ मल्लिकामालभारिण्यःसर्वाङ्गीणार्द्रचन्दनाः॥ क्षौमवत्योनलक्ष्यन्तेज्योत्स्ना
यामभिसारिकाः॥ [illegible]॥ अत्राद्येचरणालक्तकरक्तयोररुणिमगुणसाम्याद्भेदानध्यवसायः॥ द्वितीयो

...Nep... University...

मि

कु० नं० ७२ दाहरणे चन्द्रिकाऽऽभिसारिकाणां धवलिमगुणसाम्याद्भेदानध्यवसायः॥ सामान्यं यदि सादृश्याद्विशेषो नो
पलक्ष्यते॥ पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम्॥४०२॥ यथा वा। रत्नस्तम्भेषु संक्रान्तप्रतिबिम्ब
शतैर्वृतः॥ लङ्केश्वरः सभामध्ये न ज्ञातो वालिसूनुना॥४०३॥ मीलितालङ्कारे एकेनापरस्य भिन्नस्वरूपा
नवभावरूपं मीलनं क्रियते॥ सामान्यालङ्कारे तु भिन्नस्वरूपावभासेऽपि व्यावर्तकविशेषो नोपलक्ष्य
त इति भेदः॥ मीलितोदाहरणे तरुणादेर्वस्त्वन्तरत्वेनागन्तुकं पावकादिना नावभासते। सामान्योदाहर
णे तु पद्मानां मुखानां च व्यक्त्यन्तरं तया भानमस्त्येव। तथा रावणस्य तत्प्रतिबिम्बानां च। किन्त्विदं पद्ममि
दं मुखमयं बिम्बोऽयं प्रतिबिम्ब इति विशेषः। परं नोपलक्ष्यते। अत एव भेदतिरोधानान्मीलितं तदतिरो
धानेऽपि सामान्येन व्यावर्तकानवभासे सामान्यमित्युभयोरन्वर्थता। केचित्तु द्वयस्य लक्षणसाम्या
न्मोऽकेनचिद्बलीयसा तदन्यस्य स्वरूपतिरोधाने मीलितम्॥ स्वरूपप्रतीतावपि गुणसाम्याद्भेदति ७२

रोधानेसामान्यम्। एवञ्च। अपागतरलेदृशौतरलवक्रवर्णागिरोविलासभरमन्थरागतिरतीवकान्तम्मुख
म्॥ इतिस्फुरितमङ्गकेमृगदृशांस्वतोलीलयातदत्रनमदोदयःकृतपदोपिसंलक्ष्यते॥ ४०४॥ इत्यत्रमीलि
तालङ्कारः॥ अत्रहङ्कारत्वादीनांनारीवपुषःसहजधर्मत्वान्मदोदयकार्यत्वाच्चतदुभयसाधारण्या
त्कृष्टतारत्वादिमोगिनावपुषामदोदयस्यस्वरूपमेवतिरोधीयते॥ लिङ्गसाधारण्येनतज्ज्ञानोपाया
भावात्मल्लिकामाल्यभारिण्यइत्यादिषुतुसामान्यालङ्कारइत्याहुः॥ तन्मतेपद्माकरप्रविष्टानामित्या
दौभेदाध्यवसायेपिव्यावर्त्तकास्फुरणेनालङ्कारान्तरेणभाव्यम्॥ सामान्यालङ्कारावान्तरभेदेनवा॥
पूर्वस्मिन्मतेस्वरूपतिरोधानेनालङ्कारान्तरेणभाव्यम्॥ मीलितावान्तरभेदेनवा। भेदवैशिष्ट्ययो
लि स्फूर्तावुन्मीँतविशेषकौ॥ हिमाद्रिंत्वद्यशोमृष्टंसुराःशीतेनजानते॥ ४०५॥ लक्षितान्युदितेच
न्द्रेपद्मानिचमुखानिच॥ ४०६॥ मीलितन्यायेनभेदानध्यवसायेप्राप्तेकुतोपिहेतोर्भेदस्फूर्तौमीलित

प्रतिद्वन्द्विउन्मीलितम्॥ तथा सामान्यरीत्या विशेषास्फुरणे प्राप्ते कुतश्चित्कारणाद्विशेषस्फूर्त्तौ नत्सति द्वन्द्वी वि
शेषः॥ क्रमेणोदाहरणद्वयम्। तद्गुणरीत्या विभेदाध्यवसायप्राप्तानुन्मीलितं दृश्यते। यथा वा। नत्सङ्गाद्धास
प्रसरसहचरैस्तावकीनैर्यशोभिर्धवलितं नोपमाने निजगति पतितः श्रीनृसिंहक्षितीन्द्रः॥ नेदापघोषनामीक
मलपरिमलप्रौढिमासादपिष्टपदे वानां नाभविष्यत्कथमपि कमलाकामुकस्यावबोधः॥ ४०७॥ काकः
कृष्णः पिकः कृष्णः को भेदः पिककाकयोः॥ वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥ ४०८॥ इदं वि
शेषकस्योदाहरणान्तरम्॥ अत्र द्वितीयौ काकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थान्तरसङ्क्र
मितौ वाच्यौ। यथा वा। वाराणसीवासवतां जनानां साधारणे शङ्करलाञ्छनेपि॥ पार्थप्रहारव्रणमुत्तमाङ्गं
प्राचीनमीशस्य करोति॥ ४०९॥ किंचिदाकूतसहितं स्यादूढोत्तरमुत्तमम्॥ यत्रासौ वेतसीपान्थ
तत्रेयं सुतरा सरित्॥ ४१०॥ सरित्तरणमार्गं पृष्टवन्तं प्रति कामयमानाया उत्तरमिदं वेतसीकुञ्जे स्था

च्छयमित्याकूतम्॥ ग्रामेऽस्मिन्प्रस्तरप्राये न किंचित्पांथ विद्यते॥ पयोधरोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वो
द्वस॥४११॥ आस्तरणादिकमर्थयमानं पान्थं प्रत्युक्तिरियम्॥ स्तनोन्नतिं दृष्ट्वा रन्तुमिच्छसि चेद्वस॥
अविदग्धजनप्रायेऽस्मिन्ग्रामे कश्चिद्द्वगामिष्यतीत्येतादृशं प्रतिबन्धकं किंचिदपि नास्तीति हृदयम्॥
इदमुन्नेयप्रश्नस्योत्तरस्योदाहरणं। निबद्धप्रश्नमुत्तरं यथा। कुशलं तस्या जीवति कुशलं पृच्छामि जी
वतीत्युक्तम्॥ पुनरपि तदेव कथयसि मृतां नु कथयामि या श्वसितीति॥४१२॥ ईर्ष्यमाणानन्तरम
नुतप्यमानानायिकायाः सखीमागतां प्रति कुशलं तस्या इति नामकप्रश्नः॥ जीवतीति सख्या उत्तरम्॥
जीवन्त्याः कुतः कुशलमिति तदभिप्रायः। अन्यत्पृष्टमन्यदुत्तरमिति नामकस्य पुनः कुशलं पृच्छा
मीतिप्रश्नः। एवमस्योत्तरमुक्तमित्यपि प्रायेण जीवतीत्युक्तमिति सख्या वचनं सखीवचनोद्घाटनार्थं
पुनरपि तदेव कथयसीति नामकस्याक्षेपः। मृतां नु कथयामि या श्वसितीति तस्या अभिप्रायोद्घाटनम्। प्रमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णे सतितस्याः कुशलं भवति मदागमनसमये पि श्वासेषु संचरत्सु कथं तां मृतां कथयेयमिति सभिप्रायः।
॥प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते॥ केदारपोषणरताः के खेटाः किं चलं वयः॥ ४१३॥ अत्र केदार
पोषणरता इति प्रश्नाभिन्नमुत्तरम्॥ के खेटाः किं चलमिति प्रश्नद्वयस्य वयः इत्येकमुत्तरम्। उदाहरणान्त
राणि विदग्धमुखमण्डने द्रष्टव्यानि॥ सूक्ष्मं पराशयाभिज्ञेतरस्याकूतचेष्टितम्॥ मयि पश्यति सा केशैः सीमन्तम
णिमावृणोत्॥ ४१४॥ कामुकस्यावलोकने सङ्केतकालप्रश्नभावं ज्ञातवत्याश्चेष्टेयम्॥ अस्तंगते सूर्ये संकेतका
ल इत्याकूतम्॥ यथा वा। संकेतकालमनसं विटं ज्ञात्वा विदग्धया। आसीन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥
४१५॥ विहितं परवृत्तान्तज्ञातुस्याकूतचेष्टितं॥ प्रिये गृहागते प्रातः कान्तातल्पमकल्पयत्॥ ४१६॥ रात्रौ सपत्नीगृ
हे श्रान्तो स्वपितीति तल्पकल्पना कृतं। यथा वा। वक्त्रस्यन्दिस्वेदविन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे। पुंस्त्वं तन्व्या
व्यंजयन्तीव यस्याः स्मेरा पाणौ खड्गलेखां लिलेख॥ ४१७॥ अत्र स्वेदानुमितं पुरुषायितं पुरुषोचितखड्गलेख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेन प्रकाशितम्॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्॥ सखि पश्य गृहारामपरागैरस्मि धूसरा॥ ४१८॥
अत्र चौर्यरतकृतभूपृष्ठलुण्ठनलग्नधूलीजालस्य गोपनम्॥ यथा वा॥ कस्य वा न भवेद्रोषः प्रियायाः सव्रणेऽधरे॥ स
भृंगं पद्ममाघ्रासीर्वारिता विमयाधुना॥ ४१९॥ उपपतिना खण्डिताधरायाः नायिकायाः सकाशमागच्छन्तं प्रियम
पश्यन्त्येव सख्या नायिकां प्रति हितोपदेशव्याजेन तत्प्रति नायिकापराधगोपनम्॥ छेकापह्नुतेरस्याश्चायं
विशेषः। तस्यां वचनस्यान्यथा नयनेनापह्नवः। अस्यामाकारस्य हेत्वन्तरवर्णनेन गोपनमिति लक्षणे लक्ष्यनामि
चोक्तिग्रहणमाकारस्य गोपनार्थं हेत्वन्तरप्रत्यायकव्यापारमात्रोपलक्षणम्॥ ततश्च। आयान्तमालोक्य हरिं प्र
तोल्यामाल्याः पुरस्तादनुरागमेका॥ रोमाञ्चकम्पादिभिरुच्यमानं भामा जुगूह प्रणमन्सखीनम्॥ ४२०॥ इत्यत्रा
पि व्याजोक्तिरेव। तत्र ह्यनुरागकृतस्य रोमाञ्चाद्याकारस्य भक्तिरूपहेत्वन्तरप्रत्यापकेन प्रणामेन गोपनं कृतम्॥
सूक्ष्मपिहितालंकारयोरपि चेष्टितग्रहणमुक्तिसाधारणव्यापारमात्रोपलक्षणम्॥ ततश्च। नलिनीदलेवला

कामरकतपात्र इव दृश्यते शुक्तिः॥ इतिसमसंकेतमुविरतालापावंतदाब्रवीदालीम्॥ ४२१॥ इत्यादिष्वपि
सूक्ष्माख्यलङ्कारः प्रसरति। अत्रश्लोके तावत्किमावयोः संकेतस्थानमभिव्यतीति प्रश्नाशयं सूचयति॥
कार्मुके तदभिप्रायविदग्धया तदासखीम्प्रतिसाकूतमुक्तमिति सूक्ष्मालङ्कारोभवति। यतोत्रबलाकाया
मरकतपात्रप्रतिष्ठितशङ्खशुक्त्युपमया तस्या निश्चलत्वेनाश्वस्तत्वं तेन तत्प्रदेशस्य निर्जनत्वं तेन तदेवावयो
स्संकेतस्थानमिति कार्मुकं प्रतिसूचनं चलक्ष्यते॥ नचात्रध्वनिराशंकनीयः। दूरेप्रजल्पमानस्यापि संकेतस्था
नप्रश्नोत्तरस्य स्वोक्त्यैवाविष्कृतत्वात्। एवमपिहितालंकारेप्युदाहर्त्तव्यम्॥ इदंचान्यत्रावधेयम्। यत्रासौवे
तसीपान्थेत्यादिपूर्वोक्तसूक्ष्मापिहितयोरुदाहरणेषु भावोनस्वोक्त्याविष्कृतः। किंतुवस्तुसौंदर्य
बलादूह्यबोद्धव्यविशेषविशेवितादृश्यः॥ तत्रवस्तुतोनालङ्कारत्वं ध्वनिभावापन्नत्वात्। प्राचीनैः स्वोक्त्या
विष्करणे सत्यलङ्कारापादकतास्तीत्युदाहृतत्वादस्माभिरप्युदाहृतानि। शंकांहि यत्रासौवेतसीपान्थतत्रेयं ७५

सुतरां सहृदिदृक्षाद्दविति प्रश्नन्ति मध्वानं कामिन्याहृतस्यूचनमि साधर्थान्तरकल्पनयाभावाविष्करणमित्य
तः प्रागलिखिते चूताहरणे सुमङ्केत कालमनस्य पुंस्त्वं तन्याप्य जयंती भामाजगृहे ति भावाविष्करणमस्तिते ष्वे
वतत्तदलङ्कारइति· गूढोक्तिरन्योद्देश्यं चेपरं प्रत्याति कथ्यते॥ वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः॥ १२२॥
यं प्रति किञ्चिद्वक्तव्यं तटस्थे भाविज्ञायीति तद्देवतद्रूपं कञ्चित्प्रतिश्लेषेणोच्यते॥ चेत्साऽगूढोक्तिः। वृषे सा
चुदाहरणम्। इह परकलत्रमुपभुञ्जानं कामुकं प्रति वक्तव्यं तटस्थे भाविज्ञायीति परक्षेत्रे सस्यानि भक्षयन्त
मुक्षाणं कांचित्समीपे चरन्तं निर्दिश्य कथ्यते। नेयमप्रस्तुतप्रशंसा। कार्यकारणत्वादिसम्बन्धत्वाभावात्। ना
विश्लेषमात्रम्॥ अप्रकृतार्थस्य प्रकृतार्थान्वयित्वेनाविवक्षितत्वात्। तस्य केवलमितरवंचनार्थं निर्दि
ष्टतया विच्छित्तिविशेषसद्भावात्। यथा॥ नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च सा सत्कामा
पि हृष्यिणी तिरयरवः प्रासादृष्टाभ्यन्तरम्॥ शय्यामात्रसहायिनी पदि जनः श्रान्तो न मां सेवते त्वा मि

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDR

कु०नं०
७६

लागमला लनी मरजंनी लक्ष्मीपतेरक्षमामम्॥ ४२३॥ अत्र लक्ष्मीपतिना भोजारस्यागमनं प्रार्थ्यमानाया
स्तरस्य वंचनामभगवन्तम्प्रसान्नो शास्य प्रस्तामनम्॥ विवृतोक्तिः श्लिष्टगुप्तं कविना विष्कृतं यदि॥ यथा पेहि
परक्षेत्रादिति व क्तिसमसूचनम्॥ ४२४॥ क्लेशेनगुप्तवस्तु यथा कथञ्चित्कविना आविष्कृतं चेद्विवृतोक्तिः॥
यथा पेहीत्युदाहरणे पूर्ववद्वस्तुसमसूचनमिति कविना विष्कृतं। यथा वा॥ वत्सेमागाविषादं श्वसनमुरुजवं सम
स्तजोर्ध्वप्रवृत्तं कम्पः कोवा गुरुत्वेकिमिह बलमिदं जं भितेनात्र पाहि॥ प्रस्तावस्यानंसुराणामिति मथशा
मनच्छमनाकारयित्वा यस्मै लक्ष्मीमदाद्वस्तदहृतदुरितं मन्थमूढः पयोधिः॥ ४२५॥ इदं च परवंचनायगु
प्ता विष्करणम्॥ त्रपागुप्ता विष्करणं॥ यथा॥ दृष्टमा केशव गोपरागहृतया किंचिन्नदृष्टं मया तेनेह स्खलिता स्मि
नाथ पतितां किन्नाम नालंबसे॥ एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिर्गोप्यैवं गदितस्सलेश
मवताद्गोष्ठे हरिर्वश्चिरम्॥ ४२६॥ अत्र कृष्णस्य पुरतो विषमे परिस्खलनमभिहितवत्यास्तत्कामयमा ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नायागोपिकाभाववचनेविषमेपथिस्खलनपतनत्राणप्रार्थनारूपेणस्फुटितिप्रतीयमानेनार्थेनगुप्तं
विवक्षितमर्थान्तरगुप्तंसलेशंससूचनमित्यनेनाविष्कृतम्। एवंनैषधादिषुचेतोनलंकामय
तेमदीयंनान्यत्रकुत्रापिचसाभिलाषमितिदमयन्तीवाक्यादिकमप्युदाहरणम्। सर्वमिदंशब्द
शक्तिक्रोडीकृतंगुप्तार्थाविष्करणम्॥अर्थशक्तिमूलस्यगुप्तार्थाविष्करणम्। यथा॥ गच्छाम्यच्युत
दर्शनेनभवतःकिंतृप्तिरुत्पद्यतेकिंत्वेवंविजनस्थयोर्हतजनःसंभावयत्यन्यथा॥ इत्यामन्त्रण
भङ्गिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपींहरिःपातुवः॥४७
॥अत्रगच्छाम्यच्युतेत्याद्यामन्त्रणेनरमारन्तुमेतावत्कालंस्थितंतत्रलब्धमितिसर्वशक्तिलभ्यंव
स्तुतृतीयपादेनाविष्कृतम्। सर्वमेतत्कविनिबद्धवक्तृगुप्ताविष्करणम्॥ कविगुप्ताविष्करणंयथा। सुप्त
लंकुपितेसपत्नमशनंसक्ताकथायोषितांदूरादेवविवर्जिताःसुरभयःस्रग्गन्धधूपादयः॥ कोपंरा

Public Domain. Digitization by eGangotri Funding: MoE-IKS

गिनिमुंचमप्यवनते दृष्टे प्रसीदाधुना स संलक्षितहासवान्तिदयिते सर्वासमाश्चा दिशः॥ ४२८॥ तत्रताव
दीप्यां कलुषिदयितापसादनमापारोप्य इति प्रतीयते। दृष्टिरोगार्त्तस्य दृष्टिं प्रसाक्रोशो विवक्षिता
र्थः। दृष्टेरसस्पदस्य प्लुतोच्चारणेन संम्बुद्धिरूपतामवगमय्या विष्कृतः। कविनिबद्धवक्तृगर्भ्पपरव
ञ्चनायथर्थं कविगुप्तस्वप्रौढिप्रकटनार्थमिति भेदः॥ युक्तिः परामिसन्धानं क्रियया मर्मगुप्तये॥ त्वामालि
खन्ती दृष्ट्वान्यं धनुःपौष्पं करे लिखत्॥ ४२९॥ अत्र पुष्पचापलेखनक्रियया मन्मथो मया लिखित इति भ्रा
न्त्युत्पादनेन स्वानुरागरूपमर्मप्रकाशनोमपरवञ्चनं कृतम्। यथावा। दुम्पसो निशिजल्पतोर्गृहशुके
नाकर्णितं यद्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्याति मन्नं वधूः॥ कर्णालम्बितपद्मरागशकलं वि
न्यस्य चञ्चूपुटे व्रीडार्त्ता विदधाति दाडिमफलव्याजेन वाग्बन्धनम्॥ ४३०॥ अत्र शुकवाक्यमुद्रणमात
मुखेन स्वकीयरहस्यानिर्वचनशुश्रूषुजनवचनं कृतम्। व्याजोक्ता वा काव्यगोपनं यत्कौतरसगोपनामि ७६

Sanskrit University, Balmeeki Campous, Kath

तिभेदः। यद्वा॰ व्याजोक्त्या वृत्तागोपनमिह तु क्रियया तद्धितिभेदः॥ एवञ्चायां त्तमालोकमहरिप्रतोल्या
मितिश्लोके पिमुक्तिरेव। लोकप्रवादानुकृतिर्लोकोक्तिरितिभण्यते। सहस्व कतिचिन्मासान्मीलयित्वा विलो
चने॥४३१॥ अत्र लोचने मीलयित्वेति लोकप्रवादानुवृत्तिः। यथा वा। मदीमेवरदराजस्तवे॥ नाभेवते वरद्ववां
छितदातभावं व्याख्यासतो नवहस्तेवरदानमुद्राम्॥ विश्वप्रसिद्धतरविश्वकुलप्रसूतेर्यज्ञोपवीतवहनं
हि नखल्वपेक्ष्यम्॥४३२॥ अत्रोत्तरार्धे लोकप्रवादानुकारः॥ छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता
॥ भुजङ्ग एव जानीते भुजङ्गचरणं सखे॥४३३॥ केनचित्कस्यचिद्वृत्तान्तं पृष्टस्य समीपस्थं निर्दिश्यायमेव त
स्य वृत्तान्तं जानाति। मुक्तवतो मम हेः पादान्हिरेव जानातीति लोकप्रवादानुकारः। अत्र सच्चायं च लोकवि
दितेधनार्जनादिव्यापारे सहचारिणाविति तद्विषय तमालोकोक्त्यनुवादस्य प्रयोजने स्थिते रहस्ये
पि अनङ्गव्यापारे तस्याय सहचर इति मर्मोद्घाटनमिति तेन गर्भितं गर्भीकृतम्। यथा वा। मलयमरु

तां प्राप्ता मा विकासितमल्लिकापरिमलभग्नो ग्रीष्मस्त्वमुत्सहसे यदि। घनघटयितुं त्वनिःश्लेहं मय एव निवर्त्त-
ते प्रभवति गवां किं नश्छिन्नं स एव धनञ्जयः॥ ४३४॥ अत्र धनलिप्सा प्रोषितांगना सखीवचने मय एव गवां
निवर्त्तते प्रभवति स एव धनञ्जय इत्यस्या अर्जातिप्रसिद्धलोकवादानुकारः॥ अत्राति सौन्दर्यशालिनीमिमा-
मपहाय धनलिप्सया मा प्रस्थितो रसानभिज्ञ इति गोप्राय एतस्य निवर्तकस्तु तस्य जेता धनेनाकृष्टस्य तद्वि-
मुखीकरणे प्रत्याकर्षकलादिसमर्थान्तरमपि गर्भीकृतम्॥ वक्रोक्तिः श्लेषकाकुभ्यामपरार्थकल्पन-
म्॥ मुंच मानं दिनं प्राप्तं नेह नादीहशंति के॥ ४३५॥ अत्र मानं मुंच प्रभाता रात्रिरित्यभिप्रायेणोक्तायां वाचि
नं दिनं प्राप्तं मा मुञ्चेत्यर्थान्तरं श्लेषेण परिकल्पितम्॥ यथा वा अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता
॥ त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥ ४३६॥ इदमविकृतश्लेषवक्रोक्तेर्यथा॥ भवित्री स्मोरुत्रि-
दलग्ना निरधुना सते रामः स्थानानद्युधि पुरतो लक्ष्मणस्तव॥ इयं यास्यत्युच्चैर्विपदमधुना वानरच

मूलं विशेषं दधष्टाक्षरपरविलोपासरत्पुनः ॥४३७॥ सर्वमिदं शब्दश्लेषमूला यावत्कोक्तेरुदाहरणम्। अर्थ
श्लेषमूला यथा। भिक्षार्थी क्व प्रयातः सुतनु बलिमखे ताण्डवं क्वाद्य भद्रे मन्ये वृन्दावनान्ते क्व नु स मृगशिशु
र्नैव जाने वराहम्। बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवात्र वेत्ता लीलासंलाप इत्थं जलनिधिहिमवत्क
न्ययोस्त्रायतां वः ॥४३८॥ काक्वा यथा। असमालोच्य कोपस्ते नोचितोऽयमितीरिता। नैवोचितोऽयमिति तं
ताडयामास मालया ॥४३९॥ अत्र नैवोचितोऽयमिति काकुस्वरविकारेण उचित एवेत्यर्थान्तरकल्पनम्॥
स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्। कुरङ्गैरुत्तरङ्गाक्षैस्तब्धकर्णैरुदीक्षितम् ॥४४०॥ यथा
वा। तौ सन्मुखप्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ। पार्श्वोपसर्पणमुभावपि भि
न्नदिक्कं कृत्वा मुहुर्मुहुरुपासरतां सलज्जम् ॥४४१॥ भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनम्। अ
हं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः ॥४४२॥ स्थानभीषणलोकावनपरमिदम्। यथा वा। अद्यापि

कु० नं० ७८

तिष्ठति दृशोरिदमुत्तरीयं धर्त्तुं पुनः स्तनतया सतितं प्रवृत्तेः॥ वाचं निशम्य नयनं नयनं ममेति। किंचित्तदा यदकरो
त्स्मितमायताक्षी॥४४३॥ उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम्॥ सानौ यस्याभवद्युद्धं तद्धूर्जटिकि
रीटिनोः॥४४४॥ इदं श्लाघ्यचरितस्यान्याङ्गत्वेनुदाहरणम्। अभ्युदाहरणं यथा॥ रत्नस्तम्भेषु संक्रांत
प्रतिबिंबशतैर्वृतः॥ ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः॥४४५॥ अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादि
वर्णनम्॥ अर्थिदातरि राजेन्द्रे याचकाः कल्पशाखिनः॥४४६॥ इयमौदार्यात्युक्तिः॥ शौर्यात्युक्तिर्यथा॥ राज
न्सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः॥ त्वद्वैरिराजवनितावाष्पपूरेण पूरिताः॥४४७॥ सम्पदत्युक्ता
वुदात्तालङ्कारः शौर्यात्युक्तावत्युक्त्यलङ्कार इति भेदमाहुः। अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः॥
॥अवकाशो न पर्याप्तस्तव बाहुलतान्तरे॥४४८॥ अल्पं निर्मितमाकाशमनालोच्यैव वेधसा॥ इदमेवंवि
धं भाविभवत्याः स्तनमंडलम्॥४४९॥ इत्यसदुक्तितारतम्येनातिशयोक्त्यत्युक्त्योर्भेदः। निरुक्तिर्योग ७८

Public Domain. Digitization by eGangotri ... Sanskrit University, Balmeeki Campus, ...

तोनाम्नामन्यार्थे खप्नकल्पनम्॥ ईदृशीश्च रितैर्जानेमसंदोषाकरो भवात्॥ ४५०॥ यथा वा पुराकवीनां गण
नाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा॥ अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव॥ ४५१॥ प्र
तिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम्॥ न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः॥ ४५२॥ निर्ज्ञातो निषे
धः स्वतोनुपयुक्तत्वादर्थान्तरं गर्भीकरोतीति तेन चारुतान्वितोयं प्रतिषेधो नामालङ्कारः॥ उदाहरणं यु
द्धरंगे प्रसव तिष्ठमानं शाकुनिकं प्रति विदग्धवचनम्॥ तत्र युद्धस्याक्षद्यूतत्वाभावो निर्ज्ञात एव कीर्त्य
मानस्तत्रैव तव प्रागल्भ्यं न युद्धेष्विति निग्रहोक्तीत्युपहासं गर्भीकरोतीति तच्च कितवेत्यनेनाविष्कृतम्॥
यथा वा। न विषेण न शस्त्रेण नाग्निना न च मृत्युना॥ अप्रतीकाररूपाः स्त्रीभिरेव स्त्रियः कृताः॥ ४५३
॥ अत्र स्त्रीणां विषादिनिर्मितत्वाभावः प्रसिद्ध एव कीर्त्यमानस्तासां च विषाद्यतिशायित्वमर्थं मिष
मुमेवार्थं व्यक्तीकरोति। स चाप्रतीकाररूपा इति प्रतीकारवत्त्वो विषादिभ्यस्तासां विशेषं दर्शयता।

कु॰न॰
७९

विशेषणेनाविष्कृतः। सिद्धस्यैव विधानं यत्तदाहुर्विध्यलङ्कृतिम्॥ पंचमोदंचने काले कोकिलः कोकिलो
भवेत्॥ ५४॥ निर्ज्ञातविधानमनुपयुक्तिबाधितं सदर्थान्तरगर्भीकरणेन चारुतरमिति तं विधिनामान
मलङ्कारमाहुः। उदाहरणे कोकिलस्य कोकिलविधानमनुपयुक्तं सदतिमधुरपंचमध्वनिशालितया
सकलजनहृदयलंगर्भीकरणेन चारुतरमिति तं विधिनामानमलङ्कारमाहुः। उदाहरणे कोकिलस्य को
किलविधानमनुपयुक्तं सदतिमधुरपञ्चमध्वनिशालितया सकलजनहृदयलंगर्भीकरोति। तच्च
पञ्चमोदञ्चनइतिकाल विशेषणेनाविष्कृतम्॥ यथा वा। रे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जी
वातवे विसृज शूद्रमुनौ कृपाणम्॥ रामस्य गात्रमसि निर्भरगर्भखिन्नसीताप्रवासनपटोः करुणा
कुतस्ते॥ ५५॥ अत्र रामस्य स्वहस्तं प्रति रामगात्रमसीति वचनमनुपयुक्तं। सद्रामस्य सनेन स्वस्या
सन्तनिष्करुणत्वं गर्भीकरोति तच्च निर्भरेत्यादिविशेषणेनाविष्कृतम्। यथाप्पनयोर्विधिनिषेधयो ७९

रुदाहरणेषु मङ्ग्यार्थान्तरसङ्क्रमितवाच्यरूपाणि तथाविधध्वनिभावास्पदानि। स्वोक्त्यैव मङ्ग्यवि
शेषाविष्करणात्॥ मङ्ग्याविष्करणे चालङ्कारत्वमेवेति प्राकृप्रस्तुताङ्कुरप्रकरणे व्यवस्थितत्वात्। पूर्वं
बाधितौ विधिप्रतिषेधौ आक्षेपभेदत्वेनोक्तौ। इह तु अप्रतिषिद्धौ विधिप्रतिषेधौ तत्प्रतिद्वन्द्विनावलङ्का
रान्तरत्वेन वर्णितौ। विधिभेदः। हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते। असावुदेति शीतांशुर्मानच्छेदाय सुभ्रु
वाम्॥ ५६॥ यथा वा। एषते विद्रुमच्छायो मरुमार्गे इवाधरः॥ कस्य ना तनुते तन्वि पिपासाकुलितं म
नः॥ ४५७॥ मानेनेच्छति वारयत्युपशमे क्ष्मामालिखन्त्यां ह्रियां स्वातन्त्र्ये परिवृत्य तिष्ठति करौ व्याधू
य धैर्यं गते। तृष्णे त्वामनुबध्नता फलमियत्प्राप्तं जनेनामुना यत्स्पृष्टो न पदा स एव चरणौ स्प्रष्टुं न
सम्मन्यते॥ ४५८॥ इत्याद्युदाहरणम्॥ हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते। लक्ष्मीविलासाः कटाक्षा
वेङ्कटप्रभोः॥ ४५९॥ अत्र कार्यविरयं भावतः शशीघ्रादिप्रसाधनार्थं कार्यकारणाभेदव्यपदेशः। य

श्यावा। आस्तुर्दातमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान् विश्वासो नयनोत्सवो मृगदृशां कीर्तेः प्रकाशोपरः॥ आ
नंदः कलिताकृतिः सुमनसां वीरश्रियो जीवितं धर्मस्यैकनिकेतनं विजयते वीरः कलिङ्गेश्वरः॥ ४६०॥ अ
त्र दानमहोत्सवाद्युत्कर्षस्वाहिनाथ्यवक्षितेरात्तितदामुष्याद्दिव्यपदेशः॥ ॥ इत्थं शतमलङ्कारा लक्ष्यमिलानि
दर्शिताः॥ प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः॥ ४६१॥ चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितम्॥ भा
वस्य चोदयः सन्धिः शबलत्वमिति त्रयः॥ ४६२॥ अष्टौ प्रमाणालङ्काराः प्रत्यक्षप्रमुखाः क्रमात्॥ एवं पंच
दशान्यानप्यलङ्कारान्प्रचक्षते॥ ४६३॥ तत्र विभावानुभावव्यभिचारिभिर्व्यञ्जितो रतिहासशोकादिश्चित्तवृ
त्तिविशेषो रसः। स च यत्र परस्याङ्गं भवति तत्र रसवदलङ्कारः। विभावानुभावाभ्यामभिव्यञ्जितो निर्वेदा
दिस्त्रयस्त्रिंशद्भेदो देवतागुरुनृपद्विजकलत्रादावभिव्यज्यमाना रतिश्च भावः। स यत्रान्यस्याङ्गं प्रेयोल
ङ्काराः [redacted] अनौचित्येन प्रवृत्तौ रसाभासो भावाभासश्चोच्यते स यत्र परस्याङ्गं तदूर्ज

ष्टिः भावस्य प्रशाम्यदवस्था भावशान्तिस्तस्याः परङ्गत्वेन समाहितम्। भावस्योद्गमावस्था भावोदयः। द्वयोर्वि
रुद्धयोर्भावयोः परस्परस्पर्द्धाभावसन्धिः। बहूनां पूर्वपूर्वोपमर्द्देनोत्पत्तिर्भावशबलता तेषा।मितराङ्गत्वे भा
वोदयादयस्त्रयोलङ्काराः॥ तत्र रसवदुदाहरणम्॥ मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः॥ येनैकचुलु
के दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ॥४६३। अत्र मुनिविषयरतिरूपस्य भावस्याद्भुतरसोऽङ्गम्॥ यथा वा। अयं
स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥४६५॥ अत्र करुणस्य शृंगारोऽङ्ग
म्॥ प्रेयोलङ्कार एव भावालङ्कार उच्यते। स यथा। कदा वाराणस्याममरतटिनीरोधसि वसन् वसानः कौपीनं
शिरसि निदधानोऽञ्जलिपुटं॥ अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दि
वसान्॥४६७। अत्र शान्तरसस्य कदेति पदसूचितश्चिन्ताख्यो व्यभिचारी भावोऽङ्गम्॥ यथा वा। अमुष्याः
परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधयस्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः। आश्चर्ये

णमुहुर्मुहुस्तुतिभिरितिप्रस्तौमिमावद्भुवस्तावद्विभ्रदिमां स्मृतस्तवप्रभुजोवाच स्तुतो मुद्रिताः॥४६८॥अत्रप्रभुविषय
रतिभावस्य वसुमतीविषयरतिभावोऽङ्गम्॥ऊर्जस्विमयथा॥ त्वत्प्रसार्थिवमु-चापेशात्तहूणीः सन्त्रासतः सखरं यान्तीर्वी
राविलुण्ठितुं सरभसं याताः किराता वने। तिष्ठन्ति स्तिमिताः प्रफुल्लपुलकास्ते विस्मृतोपक्रमाः स्तासानुत्तरालैस्तने
ऽतितरां लोलैरपाङ्गैरपि॥४६९॥अत्रप्रभुविषयरतिभावस्य शृङ्गाररसाभासोऽङ्गम्॥यथा वा॥ लमिलोचनगोच
रतां गते सफलं जन्मनास्मि हे भूपते। अजनिष्ट ममेति सादरं मुधि विज्ञापयति द्विषांगणः॥४७०॥अत्रकवेः
प्रभुविषयस्य रतिभावस्य तद्विषयद्विषद्गणरतिरूपो भावाभासोऽङ्गम्॥समाहितं यथा॥ पश्यामो मयि किं प्रपद्यत
इति स्थैर्यं मयाऽलम्बितं किं मां नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः॥ इत्यन्योन्यविलक्षदृष्टिचतुरे
तस्मिन्नवस्थान्तरे सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया॥४७१॥अत्रशृङ्गाररसस्य कोपशान्ति
रङ्गम्॥भावोदयो यथा॥ तदवधि विश्रम्य दमालुरे धिमे दिनं निनीषामि भवद्विलोकिनी॥अदर्शि पादेनाविले

स्य पत्रिणा तवैव रूपेण समः सम स्त्रियः ।।४७२।। अत्र नलं प्रति दमयन्त्या औत्सुक्यरूपभावस्योदयः शृङ्गार
स्याङ्गम् । भावसन्धिर्यथा । एकाभूत्कुसुमायुधेषुधिरिव प्रव्यक्तपुङ्खावली जेतुर्मङ्गलपालिकेव पुलकै
रन्या कपोलस्थली ।। लालाक्षी क्षणमात्रभाविविरहक्लेशासहा पश्यतो द्रागाकर्णयते वीरभवतः प्रौढाह
वाडम्बरम् ।।४७३।। अत्र रमणीप्रेमरमणो औत्सुक्यमोहसन्धिः प्रभुविषयभावस्याङ्गम् । भावशबलत्वं
यथा । काकार्यं शशलक्ष्मणः कच कुलं भूयोऽपि दृश्येत सा दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्त
मुखम् ।। किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा ध
न्योऽधरं धास्यति ।।४७४।। अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शवलता । विप्रलम्भ
शृङ्गारस्याङ्गम् । प्रमाणालङ्कारे प्रत्यक्षं यथा ।। कान्तकान्तवदनप्रतिबिम्बे भग्नवालसहकारसु
गन्धौ ।। स्वादुनि प्रणदितालिनि शीते निर्ववार मधुनीन्द्रियवर्गः ।।४७५।। यथा वा । किं तावत्सरसि

कु०नं० रोजमेतदाराद्धहो त्विन्मुखमवभासते भुवस्याः॥ संशय्य क्षणमिति निश्चिकाय कश्चिद्विबोकैर्बकसहवा
८२ सिनां परोक्षैः॥४७६॥ पूर्वत्र संशयमात्रं तु विशेषदर्शनजन्यसंशयोत्तरप्रत्ययमिति भेदः। अथानुमानं यथा॥
यथा रन्ध्रं व्योमन्युज्ज्वलजलदधूमः स्थगयति स्फुलिंगानां रूपं दधति च यथा कीटमणयः। यथा विद्युज्ज्वा
लोल्लसितपरिपिङ्गाश्च ककुभस्तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः॥४७७॥ यथा वा। यत्रैताल
ल हरीचलाचँदृशो व्यापारयन्ति भ्रुवौ यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः॥ तच्चक्रीकृतचापपुं
खितशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं सदा स्मरः॥४७८॥ पूर्वं रूपकसंकीर्ण
मिदमतिशयोक्तिसंकीर्णमिति भेदः। शुद्धानुमानं यथा। निलीयमानैर्विहगैर्निमीलद्भिश्च पंकजैः॥ वि
कसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः॥४७९॥ यथा वा। सौमित्रे ननु सेव्यतां तरुतलं चंडांशुरुज्जृम्भ
ते चंडांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति॥ वत्सैतद्विदितं कथन्नु भवता धत्ते कुरंगं यतः। का ८२

स्मितेयमस्मि हाकुरङ्गनयने चन्द्रानने जानकि ॥४८०॥ उपमानं यथा। तां रोहिणीं विजानीहि ज्योतिषामत्र
मण्डले ॥ यस्तन्वि तारकान्यासः शकटाकारमाश्रितः ॥४८१॥ यथा वा। अत्रमन्मथमिवाति सुन्दरं दान
वारिमिव दीप्ततेजसम्। शैलराजमिव धैर्यशालिनं वेत्थि वेङ्कटपतिं महीपतिम् ॥ पूर्वोदाहरणे उपमान
मूलभूतमतिदेशवाक्यं दर्शितम्। अत्रातिदेशवाक्यार्थसादृश्यप्रसक्षरूपमुपमानं फलंनसहृदर्शि
ता मिति विशेषः। शब्दप्रमाणं यथा। विवक्षितादोषमपि च्युतात्मना त्वयैकमीशं प्रति साधुभावितम्
॥ यमामनन्त्यात्मभुवो पि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥४८२॥ अत्र शिवः परमेष्ठिनो पि कार
णमिसत्र श्रुति रूपं शब्दप्रमाणं उपन्यस्तं। एवं स्मृतिपुराणागमलौकिकवाक्यरूपाण्यपि शब्दप्रमा
णान्युदाहरणानि। तत्र स्मृतिर्यथा ॥ बालात्कृतपापानि सन्तु नाम कृतानि वः ॥ सर्वान्वलक्षतानर्थान्नक्त
तान्मनुरब्रवीत् ॥४८३॥ पूर्वश्रुतिरभिमतार्थप्रमाणत्वेनोपन्यस्ता ॥ इह तु स्मृतिरनभिमतार्थेन दूषणप

रैणतथानी नेतिभेदः। आचारात्मतुष्ट्योरपि मीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमापकतया शब्दप्रमाण
एवान्तर्भावः। तत्राचारप्रमाणं यथा। महाजनाचारपरम्परेदृशी स्वनामनानामाददते न साधवः। अतोभिधा
तुं न तदुत्सहे पुनः किलाचारमुंच विगायति॥८५॥ आत्मतुष्टिप्रमाणं यथा। असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः॥ सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥८६॥ अत्र
दुष्यन्तेन आत्मतुष्ट्या शकुन्तलापरिग्रहस्य धर्मत्वं श्रुत्यनुमतमनुमीयते। एवं श्रुतिलिङ्गादिकमपि मी
मांसकोक्तप्रमाणसम्भवदिहोदाहर्त्तव्यम्॥ तत्र श्रुतिर्यथा। त्वं हि नामैव वरदो नाधत्से वरमुद्रिकाम्॥ न
हि श्रुतिप्रक्षिप्तार्थे लिङ्गमाद्रियते बुधः॥८७॥ अत्र करिगिरीश्वरस्य वरदस्याभिधानश्रुत्या सर्वा
भिलषितदातृत्वं समर्थितम्॥ लिङ्गं यथा। विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः। ननु मूर्त्तिभि
रष्टाभिरित्थंभूतोस्मि सूचितः॥८८॥ अत्र शिवस्य श्रुतिप्रसिद्धोसर्वोपकारकपृथिव्याद्यष्टमूर्ति ८३

परिग्रहलिङ्गेन तत्प्रवृत्तीनां लोकानुग्रहैकप्रयोजनत्वं समर्थितम्॥ लिङ्गस्य मूलभूतवेदानुमा
पकतया वैदिकशब्दप्रमाण एवान्तर्भावः। एवं लौकिकलिङ्गानामपि लौकिकशब्दोन्नायकतया लौकि
कशब्दप्रमाण एवान्तर्भावः। अतः लोलभ्रूलतया विपक्षदिगुपन्यासे विधूतं शिरस्तदुत्तांतपरिक्ष
ने ऽकृतमनस्कारो विलक्षः स्थितः॥ ईषत्ताम्रकपोलकान्ति निमुखे दृष्ट्यानतः स्मीरुस्पृष्टो गुरु
संनिधावपि विधिर्दीर्घ्यानताकालोचितः॥ ४८९॥ इत्यादिचेष्टारूपं प्रमाणान्तरं नाशङ्कनीयम्॥
क्वचित् शब्दप्रमाणकल्पनयाचमत्कारः। यथा॥ किमसुभिर्ग्लपितैर्जडमन्यसे मयि निमज्जतु भी
मसुतामनः॥ ममा किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥ ४९०॥ अत्र म्रिय
माणानां मनश्चन्द्रं प्रविशतीत्येतदर्थिकायाः श्रुते। नलमुखचन्द्रविषयत्वे कल्पिते तथा व्याख्या
तस्मरवाक्यं प्रमाणत्वयोपन्यस्तम्॥ अर्थापत्तिर्यथा॥ निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि॥ अ

कु० न० न्यथानोपपद्येतपयोधावभरस्थितिः॥४८१॥यथावा॥ व्यक्तंबलीमान्यदिहेतुरागमादपूरयत्सांजलधिंजगा
८४ न्हवी॥ गङ्गौघनिर्भर्त्सितशम्भुकन्धरासवर्णमर्णः कथमन्यथाप्स्यतत्॥४८२॥अनुपलब्धेर्यथा॥ स्फुट
ममद्यवलग्नंतन्विनिश्चितंतेतदनुपलभमानास्तर्कयन्तोपिलोकाः॥कुचगिरिवरयुग्मंयादिना
धारमास्तेतदिहमकरकेतोरिन्द्रजालंप्रतीमः॥४८३॥ सम्भवोयथा॥ अभूतपूर्वंममभाविकिंवासर्वं
सहेमेसहजंहिदुःखम्॥ किन्तुत्वदग्रेशरणागतानांपराभवोनाथनतेनुरूपः॥४८४॥ यथावा॥ येना
मकेचिदिहनःप्रथयन्त्यवज्ञांजानन्तितेकिमपितान्प्रतिनैषयत्नः॥ उत्पत्स्यतेस्तिममकोपिसमानधर्मा
कालोह्ययंनिरवधिर्विपुलाचपृथ्वी॥४८५॥ यथावा॥ भ्रातःपान्थकुतोभवान्नगरतोवार्त्तानवावर्तते
वाढंब्रूहियुवाप्ययोःसमयेसक्वापियंजीवति॥ सत्यंजीवतिजीवतीतिकथितावार्त्तामयापिश्रुता॥ वि
स्तीर्णाद्विधिबीजनोपिविविधःकिंकिंनसम्भाव्यते॥४८६॥ अत्रापोदाहरणेअभूतपूर्वंममभाविकिंचे ८४

तिसम्भवप्रमाणसिद्धोऽर्थो दर्शितः। द्वितीयोदाहरणे सम्भवोपपादकं कालानन्त्यादिकमपि दर्शितम्। तृती-
योदाहरणे तु सम्भवो विकण्ठोक्त इति भेदः। ऐतिह्यं यथा॥ कल्याणी बत गाथेयं लौकिकी प्रतिभाति
मे॥ एति जीवन्तमानन्दो नरं वर्षशतादपि॥ ४८७॥ अत्र लौकिकी गाथेयं प्रसिद्धिरिष्टप्रवक्तृका प्र-
वादपारंपर्येता दर्शिता॥ ॥अथैतेषामलङ्काराणां यथासंभवं क्वचिन्मेलने लौकिकालङ्का-
राणां मेलन इव चारुत्वादतिशयोपलम्भात् लक्ष्यसिंहन्यायेन पृथगलङ्कारावस्थितौ तन्निर्ण-
यः क्रियते। तत्र तिलतण्डुलन्यायेन स्पष्टे संदेहेन एकवाचकानुप्रवेशेन चतुर्विधः स्फुटावगम्यभे-
दालङ्कारमेलने संसृष्टिः। नीरक्षीरन्यायेनास्फुटभेदालङ्कारमेलने सङ्करः। स चाङ्गाङ्गिभावेन
समप्राधान्येन संदेहेन एकवाचकानुप्रवेशेन च चतुर्विधः। एवं च मिहाकाशः पंचालङ्काराः। त-
त्र संसृष्टिर्यथा॥ ॥कुसुमसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रमसम्भृतशोभया। चलितया विदधे क

कु० नं० लमेखलाकलकलोलकलोलकलोदशा मया॥४९८॥ अत्र शब्दालङ्कारयोरनुप्रासयमकयोः संसृ
८५ ष्टिः॥ लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः॥ असत्पुरुषसेवेव दृष्टिर्विफलतां गताः॥४९९॥ अ
त्रोत्प्रेक्षयोरुपमायाश्चेत्यर्थालङ्काराणां संसृष्टिः॥ यथा वा॥ आनन्दमन्थरपुरन्दरमुक्तमाल्यं मौलौ
हठेन निहितं महिषासुरस्य॥ पादाम्बुजं भवतु मे विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः॥
५००॥ अत्र शब्दार्थालङ्कारयोरनुप्रासोपमयोः संसृष्टिः। अङ्गाङ्गिभावसङ्करो यथा। तलेष्ववेपन्त
महीरुहाणां छायास्तदा मारुतकम्पितानाम्॥ शशाङ्कसिंहेन तमोगजानां लूनाकृतीनामिव गात्र
खण्डाः॥५०१॥ अत्र शशाङ्कसिंहेनेति तमोगजानामिति च रूपकम्॥ यद्यप्यत्र शशांक एव सिंहस्त
मांस्येव गजा इति। मयूरव्यंसकादिसमासाश्रयणेन रूपकवच्च शशांकः सिंह इव तमांसि गजा इवेत्यु
पमितसमासाश्रयणेनोपमापि वक्तुं शक्या। तथापि लूनाकृतीनामिति विशेषणानुगुण्याद्रूपकमि ८५

द्धिः । तस्य हि विशेषणस्य प्रधानेन सहान्वये न भास्मन्तु गुणेन । गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति
न्यायमुपमितसमासाश्रयणे तस्य पूर्वपदार्थप्रधानत्वाच्छशाङ्कस्य तत्समासे च प्रधानता भवेत् । तत्र न विशेष
णमुख्यार्थान्वयस्यावकाशस्य मतिः स्वरूपनाशोपचरिता कृतिलवनकर्तृत्वान्वयसंभवे विमुख्यार्थान्वये स्याद
श्यमेवादरणीयं । स्वरूपनाशाङ्गीकारणप्रवृत्तमालक्षणमूलातिशयोक्त्या रूपकसिद्धिः । तत्र रूपकमुत्प्रे
क्षायां अङ्गम् । तदुत्थापकत्वात् । रूपकाभावे हि छायामालूनगात्रखण्डाइवावयवं त्वे सेनाबद्धकृत्बुपमैव सि
ध्येत् । वैषम्यादिसाधर्म्यात् । न च्छायामानां सद्यः कृतगात्रत्वं उतादात्म्यसंभावनोपयुक्तं लूनाकृतित्वरूपा
धिकविशेषणोपादानात् । स संतथोक्तावाकृतिलवनादिधर्मरूपकार्यसमारोपनिमित्ताशशाङ्कतम
सोऽहं त्वहन्तमचेतनवृत्तान्तसमारोपरूपासमासोक्तिरपेक्षणीया । एवमुक्तौ रूपकमिति विशेषः । एवम
त्रातिशयोक्तिरूपकोत्प्रेक्षाणामङ्गाङ्गिभावेन सङ्करः । समप्राधान्यसङ्करो यथा । अविनुनःसवितुस्तु

In Public Domain. Digitization by eGangotri Funding
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रगावलीसमतिलङ्घितुङ्गपयोधरा। स्फुरितमध्यगतारुणनायकामरकतैकलतेव नभःश्रियः
॥५०२॥ अत्र पयोधरादिशब्दश्लेषमूलातिशयोक्त्याङ्गभूतयोत्थाप्यमानेव सवितृतुरगावल्या
मरकतैकावलीतादात्म्योत्प्रेक्षा नभोलक्ष्म्या नायिकाव्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्था
प्यते। पयोधरश्लेषस्योभयोपकारकत्वात्। तत उत्प्रेक्षासमासोक्त्योरेकः कालः परस्परापेक्षया
चारुत्वसमुन्मेषश्चोभयोस्तुल्य इति विनिगमनाविरहात्समप्राधान्यम्। यथा वा। अङ्गुलीभिरिव के
शसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः। कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी॥५०३
॥ अत्राङ्गुलीभिरिति वाक्योक्तोपमया तत्सामपाठमुखकुड्मलीकरणलिङ्गानुगुण्याच्चोपमित
समासाश्रयणेन लब्धया सरोजलोचनमिति समासोक्तोपमयाङ्गभूतयोत्थाप्यमानैव शशिक
तकनिशामुखचुम्बनोत्प्रेक्षा निशाशशिनोर्दम्पत्यव्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्था

Domain. Digitization by eGangotri

प्यते उपमयो रुभयत्रोत्थापकत्वाविशेषात्। समासो। किं गर्भतां विनाचुम्बनोत्प्रेक्षाया निरासलम्बनात्। नुत
श्चात्रास्युत्प्रेक्षासमासे तयोरेककालयोस्समं प्राधान्यं। यद्यप्यत्रोपमाभ्यां शशिनिशागतावेव धर्मौ समर्थ्येते
। तथा शशिनामकयोर्निशानामकयोश्च साधारणधर्मौ। साधारणधर्मसमर्पणं चोत्प्रेक्षासमासोक्त्योरपेक्षि
तम् उत्प्रेक्षायाः प्रकृताप्रकृतसाधारणगुणक्रियारूपनिमित्तसापेक्षत्वात् समासोक्ते विशेषणसाम्यमू
लकत्वात्तथापि वाक्योक्तोपमायामिव कारस्य मरिचिभिरेव समवमानत्वमभ्युपगम्यान्वयभेदलब्धस्य
प्रकृताप्रकृतयोरेकैकविषयस्यार्थद्वयस्य समासोक्तोपमायां सरोजसदृशं लोचनमिति समासान्तरमभ्यु
पगम्य समासभेदलब्धार्थद्वयस्य वा भेदाध्यवसायेन साधारण्यसम्पादयतयोत्प्रेक्षासमासोक्त्युग
तानिर्वाह्या। यद्वा इह प्रकृतकोटिगतानां प्रातिस्विकरूपेण भेदवदनुगतसादृश्यप्रयोजकरूपेणाभेदोप
क्लृप्तिः। स चात्र विवक्षित एव। भेदाभेदोभयप्रधानोपमेयालङ्कारिकसिद्धान्तात्। तत्र चत्रमोजकांश निष्क

Sanskrit University ... Collection

र्न्यायेनाभेदगर्भतांशोपजीवनेन साधारण्यं तस्माद्यत्र प्रधानभूतोत्प्रेक्षा समासोक्तिं गता निर्वाह्या। न हि
प्रकाशशीतानयनशक्तिमतः सौरतेजसः शीतानयनशक्तिमात्रेण शीतालूनयोगिता न दृष्टा। एवम
नभ्युपगमे च। पाण्ड्योऽयमंसार्पितलम्बहारः कॢप्ताङ्गरागो हरिचन्दनेन। आभाति बालातपरक्तसा
नुः सनिर्झरोद्गार इवाद्रिराजः॥५०४॥ इत्यादावुपमायां न निर्वहेत्। न ह्यत्राद्रिराजतया पाण्ड्यस्योपमा
नोपमेययोरनुगतः साधारणो धर्मो निर्दिष्टः। एकत्र बालातपनिर्झरौ अन्यत्र हरिचन्दनहारा इति
धर्मभेदात्। तस्मात्तत्रातपहरिचन्दनयोर्निर्झरहारयोश्च सदृशयोरभेदांशोपजीवनमेव गतिः। विनिष्टी
वतरङ्गाग्रैः समुद्रः फेनचन्दनं॥ तदादायकरैरिन्दुर्लिम्पतीव दिगङ्गनाः॥५०५॥ अत्रोत्प्रेक्षयोः काल
भेदेऽपि समप्राधान्यम्। अन्योन्यनिरपेक्षवाक्यद्वयोपात्तत्वात्तदादायेति फेनचन्दनरूपकमात्रोपजी
वनेन पूर्वोत्प्रेक्षानपेक्षणात्। न चैवं लिम्पतीव तमोऽङ्गानीतिवदुत्प्रेक्षाद्वयस्य संसृष्टिरेवेयमिति वा ८७

च्यम्। लोकसिद्धपेषणलेपनपौर्वापर्यस्यानुकारिणोत्प्रेक्षाद्वयपौर्वापर्येण चारुतातिशयसमुन्मेषतंस्सं
सृष्टिवैषम्यात्। तस्माद्दर्शादिवदेका फलसाधनतया समप्रधानमिदमुत्प्रेक्षाद्वयपौर्वापर्येण चारुताति
शयसमुन्मेषतस्संसृष्टिवैषम्यात्। तस्माद्दर्शादिवदेकफलसाधनतया समप्रधानमिदमुत्प्रेक्षाद्वयम्।
सन्देहसङ्करो यथा। शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा॥ इति गुणस
मयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥५०६॥ इयमिति सर्वनाम्ना मघजंदतव
तानुमती विशिष्टरूपेण निर्दितेतदा बिम्बप्रतिबिम्बभावापन्नधर्मविशिष्टयोः सदृशयोरैकारोपरू
पनिदर्शना। यदि तेन सा स्वरूपेणैव निर्दिश्यते। बिम्बभूतो धर्मस्तु पूर्वप्रस्तावात् समगुणयोगप्रीतम इति
पौरविशेषणाच्चगम्यते। तत्र प्रस्तुते धर्मिणि तद्वृत्तांतप्रतिबिंबभूताप्रस्तुतवृत्तांतारोपरूपलालितमिसंत
ध्ययसाया सन्देहः॥ विलिम्पेनुः साक्षादमृतांसवापीयदिभवेत्कलङ्कस्तत्र सोमादिचविकचेन्दीवरव

Public Domain. Digitization by eGangotri Funding: MID...

नम्॥ ततः स्नानक्रीडाजनितजडभावैरवयवैः कदाचित्पुंचेयं मदनशिखिपीडापरिभवम्॥ ५०७॥ अ
त्रपघेतावत्साधनं सम्पद्येतदातापः शाम्यती त्यर्थे कविसंरंभश्चेत्तद्धेतुपात्तसिध्यर्थ मूह इति सम्भा
वनालङ्कारः। एतावत्साधनं कदापि न संभवत्येवात त्तापशान्तिरपि गगनकुसुमकल्पे त्यर्थे कविसं
रंभश्चेत्तदुपात्तमिथ्यात्वसिध्यर्थ मिथ्यात्वकल्पना त्वं पामिथ्याध्यवसितिरित्युभयसम्भवात्सन्दे
हः। एवम् सितांस्फटिककुम्भान्तःस्थितिश्वेतीकृतैर्जलैः॥ मौक्तिकैस्तुतां मुलेस्तु बद्धैस्ते समंयशः॥
५०८॥ इत्यादिष्वपि संभावना मिथ्याध्यवसितिसन्देहसङ्करो द्रष्टव्यः। सुखेन गालं मुञ्चन्मूलेवसति
चेत्कृणी॥ फलमस्त्वेहत्य तृणातरुणा किं प्रयोजनम्॥ ५०९॥ अत्र महोरगवृत्तान्ते वर्ण्यमाने राजद्वार
स्तवावलवृत्तान्तोपि प्रतीयते तत्र किंवस्तुतस्तथाभूतो रगवृत्तान्तकीर्त्तनमप्रस्तुतप्रशंसा। यद्वा।
वर्ण्यमानमहोरगवृत्तान्तकीर्त्तनेन समीपस्थितखलमर्मोद्घाटनं क्रियत इत्युभयस्यापि प्रस्तुतत्वात्स

...University, Balmeeki Campus, Kathmandu

स्फुटालङ्कारस्मृतिसंदेहः। एकवाचकानुप्रवेशसङ्करस्तु शब्दार्थालङ्कारयोरेवेति लक्षयितुं काव्यप्रकाशका
रउदाहार। स्पष्टोल्लसत्किरणकेसरसूर्यबिम्बविस्तीर्णकर्णिकमथो दिवसारविन्दम्। श्लिष्टाष्टदिग्दल
कलापमुखावतारबद्धान्धकारमधुपावलि सञ्चुकोच॥५१०॥ अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ। यत्रै
कस्मिन्श्लोके पदभेदेन शब्दार्थालङ्कारयोः स्थितिस्तत्र तयोः संसृष्टिः॥ इह तु सङ्कर इति अलङ्कारसर्व
स्वकारस्तु एकस्मिन्वाचकेऽनुप्रवेशो वाच्ययोः स्वारसिकः। वाच्यप्रतियोगिकत्वाद्वाचकस्येति शब्दार्था
लङ्कारयोरप्येकवाचकानुप्रवेशसङ्करमुदाजहार। सत्पुष्करद्योतितरङ्गशोभिन्यमन्दमारब्धमृदङ्ग
वाद्ये। उद्यानवापीपयसीव यस्यामेणीदृशो नाट्यगृहे रमन्ते॥५११॥ अत्र नाट्यगृहवापीपयसोः सत्पुष्करे
त्यादिविशेषणे शब्दसाम्यं श्लेषः। अमन्दमारब्धेत्यादिविशेषणेऽर्थसाम्यमुपमा तदुभयमेकस्मिन्निवशा
द्वेऽनुप्रविष्टमिति। तदपि न मन्यामहे। सत्पुष्करेत्यादिविशेषणेऽपि श्लेषभित्तिकाभेदाध्यवसायरूपाति

शयोक्तिलभ्यस्य धर्मसाम्यस्यैव तत्रैव शब्दप्रतिपाद्यतया शब्दसाम्यस्य तत्प्रतिपादकत्वात् श्लेषाभिव्यक्तिका
भेदाध्यवसायेन धर्मसाम्यलाभानङ्गीकारे अहो रागवती संध्या जहाति स्वयमम्बरम्॥ इत्यादिश्लिष्ट
विशेषणसमासोक्त्युदाहरणे विशेषणसाम्याभावेन समासोक्त्यभावप्रसङ्गात्। शब्दसाम्यस्यैव
शब्दप्रतिपाद्यत्वे वितस्योपमावाचकत्वस्यैव प्राप्त्या श्लेषवाचकत्वाभावाच्च शब्दतोऽर्थतो वा कवि
वक्षितसाम्यप्रतिपादने सर्वविधेऽप्युपमालङ्कारस्वीकारात्। अन्यथा। यथा प्रह्लादनाच्चन्द्रः प्रतापा
त्तपनो यथा॥ तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥५१२॥ इत्यत्राप्युपमा न स्यात्। न ह्यत्रान्व
र्थनामरूपशब्दसाम्यं विना किंचिदर्थसाम्यं कविविवक्षितमस्ति। तस्माद्यत्रैकस्मिन्नर्थे प्रतिपा
द्यमानेऽलङ्कारद्वयलक्षणयोगादलङ्कारद्वयमतीतिस्तत्र तयोरलङ्कारयोरेकवाचकानुप्रवेशः
। यथा· विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम्॥ विफलज

लमेकप्रक्रियागौरवेण याचिमहत चित्तस्तत्र भैमीवनेन॥५१३॥अत्र हि प्रतिपाद्यमानोऽर्थः समृद्धिमद्वस्तु
वर्णनमुदात्तमिति लक्षणानुसारादुदात्तालङ्काररूपः।असंबन्धे सम्बन्धकथनमतिशयोक्तिरिति ल
क्षणादतिशयोक्तिश्च।न च सर्वत्रोदात्तस्यासम्बन्धे सम्बन्धवचनरूपलनिर्णीतमिति तेन विविक्ताल
ङ्कारद्वयलक्षणसमावेशोऽस्तीति वाच्यम्।दिव्यलोकगतसम्पत्समृद्धिवर्णनादिष्वतिशयोक्तस्य स्प
ष्टस्योदात्तस्य शौर्यदार्ढ्यादिविषयवर्णने सूदात्तास्पृष्टाया अतिशयोक्तेश्च परस्परविविक्तत
या विश्रान्तेः।तयोश्चेहार्थवशात्सम्पन्नसमावेशयोर्नाङ्गाङ्गिभावः।एकेनापरस्यानुत्थानात्।स्वा
तन्त्र्यपारतन्त्र्याविशेषादर्शनाच्च।नापि समप्राधान्यम्।यैः शब्दैरिह सम्बन्धिवस्तु प्रतिपाद्यते॥
तैरेव तस्यैव वस्तुनोऽसम्बन्धे सम्बन्धरूपस्य प्रतिपाद्यमानतया प्रतिपादकशब्दस्यैव स्थितभे
दाभावात्।नापि सन्देहसङ्करः।क्वचिदलङ्काराणामपि सङ्करो दृश्यते।यथा।मुक्ताः केलिविसू

कु॰सं॰
९०

अहारगलिताः संमार्जनीभिर्हृताः प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालांघ्रिलाक्षारुणाः ॥ दूराद्दाडि
मबीजशङ्कितधियः कर्षन्ति केलीशुका यद्विद्वद्भवने भोजनृपतेस्तत्त्यागलीलायितम् ॥५१॥ अ
त्रतावद्विदुषां सम्पत्समृद्धिवर्णनमुदात्तालङ्कारः। तन्मूलकोबालांघ्रिलाक्षारुणाः इत्यत्र तद्गुणालङ्का
रः। तन्मूलः शङ्कितधियः इत्यत्र तत्रैव वक्ष्यमाणभ्रान्त्युपपादकः। पदार्थहेतुककाव्यलिङ्गालङ्कारश्चे
तितयोरेकवाचकानुप्रवेशसङ्करः। तन्मूलः शङ्कितधियः इत्यत्र भ्रान्तिमदलङ्कारः। ताभ्यां चोदा
त्तालङ्कारस्याङ्गताङ्गीतदिति तयोश्चात्रस्य चाङ्गाङ्गिभावसङ्करः। एवं विद्वद्गृहवैभवस्य हेतुमतोरा
ज्ञो वितरणविलासहेतोश्चाभेदकथनं हेत्वलङ्कारः। सचाराज्ञो वितरणविलासस्य निरतिशयोत्कर्षा
भिव्यक्तिपर्यवसायी एतावन्मात्रे कविसंरम्भश्चेदुक्तरूपोदात्तालङ्कारपरिपुष्टेः हेत्वलङ्कारे विश्रान्तिः
। कीदृशी सम्पदिति प्रश्नोत्तरतया निरतिशयैश्वर्यवितरणरूपाप्रस्तुतकार्यमुखेन तदीयसम्पदुत्क ९०

र्वप्रशंसनेकविसंरम्भश्चेत्कार्यनिबन्धनाप्रस्तुतप्रशंसालङ्कारे विश्रान्तिः। कार्यस्यापि वर्णनीयत्वेन प्रस्तुतत्वाभिप्रा
येतु प्रस्तुताङ्कुरे विश्रान्तिः अत्र च विशेषणानध्यवसायात्सन्देहसङ्करः॥ किञ्च विदग्धहृद्वैभववर्णनस्यासम्ब
न्धे सम्बन्धकथनरूपतयाऽतिशयोक्त्युदात्तालङ्कारेण सहैकवाचकानुप्रवेशसङ्करः। तन्मूलस्याप्रस्तु
तप्रशंसालङ्कारस्य प्रस्तुताङ्कुरस्य वा राजसंपत्समृद्धिवर्णनात्मकोदात्तालङ्कारेण सहैकवाचकानुप्रवेश
सङ्करः। वाचकस्य प्रतिपादकमात्रपरतया भ्रमरकसाधारण्यादेषां त्रयाणामेकवाचकानुप्रवेशसङ्क
राणां समप्राधान्यसङ्करः॥ न ह्येतेषां परस्परमन्यत्राङ्गत्वमस्ति। उदात्तादिमात्रस्यैव हेलालङ्कारादिना
हृतापादकत्वेनातिशयोक्तिसङ्करस्याङ्गतयानपेक्षणात्। एवमत्र श्लोके चतुर्णामपि सङ्कराणां मध्या
योग्यं सङ्करः॥ एवमन्यत्राप्युदाहरणान्तराण्यूह्यानि॥ ॥अमुं कुवलयानन्दमकरोदप्पदीक्षितः॥ नियो
गाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः॥५१५॥ ॥चन्द्रालोको विजयते शारदागमसम्भवः॥ हृद्यः कुवलया

नं० ४३७२

कुं० नं० ९१

नन्दोयत्प्रसादादभूदयम्॥५१६॥ ॥इति श्रीमदद्वैतविद्याचार्यश्रीभरद्वाजकुलजलधिकौस्तुभश्रीरङ्गरा
जाध्वरीन्द्रवरसूनोरप्पयदीक्षितस्य कृतिः कुवलयानन्दः समाप्ततामगोधीत्॥ ॥श्रीशाके तु एगावनीकु
निनिशाजान्यन्विते वासरे शुभ्रांशोर्धवले दले सुविमले ह्याशी विख्याणां तिथौ॥ तैषे मासवरे पुरे पुरि
पोक्ती रेचनाकौकसां नधाः स्वालहिते च्छया कुवलयानन्दं सुदालेखदधीः॥१॥ श्रीमद्द्विजासन्वय
भूषणानामन्ते निवासी शुकदेवनाम्नाम्॥ विद्वांप्रियश्श्री शिवशर्म्मनामा लिलेखवलीलाधरभूसु
राग्र्यः॥ शुभं भूयाच्छुभं भूयाच्छुभं भूयात्सुकृत्सुकृः॥ कृष्णस्यैव गुरोश्चैव प्रसादात्सर्वदा मम॥१॥ ॥

९१